

अनन्तशयनविश्वविद्यालयः
अनन्तशयनसंस्कृतग्रन्थावलिः
ग्रन्थाङ्कः १६७.

ऐतरेयब्राह्मणं

श्रीषड्गुरुशिष्यविरचितसुखप्रदाख्य-
वृत्तिसहितम्

द्वितीयः सम्पुटः । १६-२५ अध्यायाः

[redacted]

सम्पादकः
डाक्टर्. पि. के. नारायणपिळ्ळ. एम्. ए; पिंएच्. डि.
पौरस्त्यग्रन्थप्रकाशनकार्यालयाध्यक्षः

अनन्तशयने सुन्दरविलासमुद्रालये मुद्रितः.

१९५२

मूल्यं रूप्यकपञ्चकम्

विषयानुक्रमणी

Introduction to this publication will appear in the last Volume.

शब्दप्रवृत्तिनिमित्तकथनम् ४
षोडशिशस्त्रनिष्पादकगौरिवीतनानदाख्यसामविधिः ६
नानदनामनिर्वचनमैतिहासः ,,
नानदशब्दनिरुक्तिः ७
सामापेक्षया षोडशिशंसनप्रकारकथनम् ,,
छन्दोविहरणविधिः, तत्प्रकारश्च ८
अतिच्छन्दसां कासांचिदृचां शंसनविधिः १४
अतिच्छन्दःशब्दनिर्वचनम् १५
अतिच्छन्दसामृचामनुष्टुप्त्वसम्पादनार्थं महानाम्नीनामकानामृचामुपसर्गसंयोजनविधिः ,,
महानाम्नीप्रशंसा १७
अतिरात्रसंस्थार्थ इतिहासः २३
पर्यायनामनिर्वचनम् २५
छन्दसामपिशर्वरनाम्ना व्यवहारे हेतुः २६
अपिशर्वरनामनिर्धचनम् २७
चतुश्शस्त्रेषु पर्यायेषु प्रथमपर्याये होतुः शस्त्रविधिः ,,
अथ त्रिष्वपि पर्यायेषु शस्त्रयाज्याविधिः प्रयोगश्च २८
रात्रौ पवमानान्वयाभावादहोरात्रयोः पवमानवत्त्वेन तुल्यत्वे चोद्यपरिहारौ ३०
तथा रात्रौ पञ्चदशस्तोत्राभावात् पञ्चदशस्तोत्रवत्वेनाहोरात्रयोः साम्ये चोद्यपरिहारौ ,,

[redacted]

विषयानुक्रमणी

षोडशोऽध्यायः ।

विषयः	पार्श्वम्
षोडश्यर्थ इतिहासः	१
पृष्ठ्यषळहस्य चतुर्थेऽहनि षोडशिशंसनविधिः	२
षोडशिप्रशंसा	,,
उक्थानां परस्तात् षोडशिशंसनविधिः	३
चोद्यपरिहाराभ्यां षोडशिशब्दप्रवृत्तिनिमित्तकथनम्	४
षोडशिशस्त्रनिष्पादकगौरिवीतनानदाख्यसामविधिः	६
नानदनामनिर्वचनार्थैतिहासः	,,
नानदशब्दनिरुक्तिः	७
सामापेक्षया षोडशिशंसनप्रकारकथनम्	,,
छन्दोविहरणविधिः, तत्प्रकारश्च	८
अतिच्छन्दसां कासांचिदृचां शंसनविधिः	१४
अतिच्छन्दःशब्दनिर्वचनम्	१५
अतिच्छन्दसामृचामनुष्टुप्त्वसम्पादनार्थं महानाम्नीनामकानामृचामुपसर्गसंयोजनविधिः	,,
महानाम्नीप्रशंसा	१७
प्र प्रव इत्यादीनां स्वत एवानुष्टुभामृचां शंसनविधिः	१८
अधिकार्यपेक्षया शस्त्रशंसनव्यवस्था	१९
शस्त्रयाज्याविधिः	२१
शस्त्रयाज्याया अनुष्टुप्त्वसम्पादनार्थं पुरीषपदसंज्ञकपञ्चाक्षरोपसर्गसंयोजनविधिः	२२
अतिरात्रसंस्थार्थ इतिहासः	२३
पर्यायनामनिर्वचनम्	२५
छन्दसामपिशर्वरनाम्ना व्यवहारे हेतुः	२६
अपिशर्वरनामनिर्वचनम्	२७
चतुश्शस्त्रेषु पर्यायेषु प्रथमपर्याये होतुः शस्त्रविधिः	,,
अथ त्रिष्वपि पर्यायेषु शस्त्रयाज्याविधिः प्रयोगश्च	२८
रात्रौ पवमानान्वयाभावादहोरात्रयोः पवमानवत्त्वेन तुल्यत्वे चोद्यपरिहारौ	३०
तथा रात्रौ पञ्चदशस्तोत्राभावात् पञ्चदशस्तोत्रवत्त्वेनाहोरात्रयोः साम्ये चोद्यपरिहारौ	,,

विषयः पार्श्वम्

स्तोत्रापेक्षयाधिक्येन शस्त्रशंसनस्य प्रशंसा ३१

सप्तदशोऽध्यायः

आश्विनशस्त्रविधानार्थं इतिहासः ३३
आश्विनशस्त्रे ऋक्सहस्रस्य शंसनीयत्वम् ,,
शस्त्रशंसनप्रकारः ३४
आख्यायिकामुखेनाश्विनशस्त्रप्रतिपद्विधिः ३६
तत्र मतान्तरोपन्यासो दूषणं च ३७
आख्यायिकामुखेनाश्विनशस्त्रे आग्नेयोषस्यैन्द्रकाण्डानां शंसनविधिः ३९
चोद्यपरिहाराभ्यां शस्त्रस्याश्विनत्वसमर्थनम् ४१
आजिगमनेऽग्न्यादीनां वाहनकथनम् ४२
पूर्वपक्षनिराकरणपूर्वकं सौर्ये छन्दस्त्रयशंसनविधिः ४४
पूर्वपक्षनिराकरणपूर्वकं सौर्यच्छन्दःसु सूर्यो न इत्यृचैव प्रारम्भणीयत्वकथनम् ४४
ऐन्द्रादिप्रगाथविधिः ४५
शस्त्रपरिधानीयर्ग्विधिः ४७
तत्रैव फलकामनानुसारेण ऋगन्तरविधिः ,,
याज्याद्वयविधिः ४८
गवामयनसंज्ञकस्य संवत्सरसत्रस्यारम्भणीयाख्यद्वितीयदिनानुष्ठानविधिः ४९
आरम्भणीयशब्दनिर्वचनम् ५०
चतुर्विंशनामनिर्वचनम् ,,
तस्मिन्नहनि प्रयोक्तव्यसंस्थाविधिः ,,
स्तोत्रशस्त्रादिसंख्याविधिः ५१
स्तोत्रगतर्क्संख्या ,,
अस्मिन्नेवाहनि संस्थान्तरविधिः ५२
अग्निष्टोमपक्षे स्तोमविशेषविधिः ,,
पक्षद्वयेऽप्युक्थ्यस्यैव साधीयस्त्वकथनम् ५३
पृष्ठस्तोत्रे बृहद्रथन्तराख्यसामद्वयविधिः प्रशंसा च ५४
साम्नोरुभयोर्विकल्पेनैव कर्तव्यतोक्तिः सहकरणनिन्दा च ५५
त्यक्तस्य साम्नो योनिशंसनविधिः ५६
वैरूपादीनामक्रियमाणानां च साम्नां योनिशंसनविधिः ,,

विषयः	पार्श्वम्
गवामयने पूर्वोत्तरपक्षयोर्यथाक्रममानुलोम्यप्रातिलोम्येनानुष्ठानविधिः	५७
चतुर्विंशमहाव्रतयोरह्नोः प्रशंसा	५८
उभयोरह्नोर्निष्केवल्यस्य तुल्यत्वकथनम्	५९
अतिरात्राख्याद्यन्तदिनप्रशंसा	,,

अष्टादशोऽध्यायः ।

विषयः	पार्श्वम्
गवामयने मासक्लृप्तिविधानायाभिप्लवषडहविधिः	६१
अभिप्लवषडहस्तवः	६३
पञ्चभिः षडहैर्मासक्लृप्तिनिरूपणम्	६४
मासपूरकपञ्चषडहस्तवः	६५
संवत्सरसत्रप्रकृतिभूतगवामयनविधिः	६८
गवामयनसम्बन्धिकथा	६९
आदित्यानामङ्गिरसां चायनयोर्निरूपणम्	७१
तयोरहःक्लृप्तिः	७२
अयनद्वयगतपृष्ठ्याभिप्लवषडहस्तवः	,,
विषुवन्नामकक्रतुविधिः	७३
विषुवत्प्रशंसा	७४
विषुवत्पार्श्ववर्तिस्वरसामाख्याहःप्रशंसा	७५
विषुवद्रूपेणोपचरितस्य सूर्यस्य प्रशंसा	७८
स्वरसामाख्याहरनुष्ठानविधिः	७९
स्वरसामशब्दनिरुक्तिः	८०
अभिजिद्विश्वजित्स्तवः	,,
अभिजिद्विश्वजिन्नामकाहर्द्वयानुष्ठानेन नवरात्रत्वसम्पत्तिकथनम्	८२
विषुवति क्रतौ पृष्ठसामविधिः	,,
विषुवति प्रयोगनिरूपणम्	८४
पशुसामिधेन्यादिषु विशेषः	,,
निष्केवल्यशस्त्रे निविद्धानविधिः	८५
दूरोहणशंसनविधिः	८६
दूरोहणप्रशंसा	८७
दूरोहणरोहणार्थमन्त्रप्रदर्शनं व्याख्यानं च	८८
स्वर्गकामस्य तार्क्ष्यसूक्तशंसनविधिः	९१
तार्क्ष्यसूक्तप्रशंसा	,,
प्रकारान्तरेण दूरोहणशंसनविधिः	९४
मनुष्यसाम्येन विषुवदहःप्रशंसा	९५
पूर्वपक्षनिराकरणपूर्वकं संवत्सरसत्र एव विषुवदहनि शस्त्रस्य शंसनीयत्वकथनम्	,,

विषयः	पार्श्वम्
महाव्रतेऽहन्यालम्भनीयपशुस्वरूपनिरूपणं देवताप्रशंसा च	९६

एकोनविंशोऽध्यायः

द्वादशाहार्थाख्यायिका	९७
भरतद्वादशाहाहःक्लृप्तिः	,,
व्यूह्ळद्वादशाहविधिः	९८
तत्र दीक्षादिषु नियमः	,,
चोद्योत्तरमुखेन जगत्यादिभ्यो न्यूनाक्षराया बृहत्या बृहतीत्याख्याने हेतुकथनम्	,,
यजनयाजनयोरधिकारिनिरूपणम्	९९
पूर्वं पूर्वं दीक्षमाणानां प्राशस्त्यप्रपञ्चनम्	,,
द्वादशाहप्रशंसा	१००
व्यूढद्वादशाहीयनवरात्रगतानां त्र्यहाणां प्रशंसा	,,
दीक्षाकालविधानार्थाख्यायिका	१०१
दीक्षाकालविधिः	,,
दीक्षायाः पुरस्तात् प्राजापत्यपश्वालम्भविधिः	१०२

विषयः	पार्श्वम्
सामिधेन्यादिषु विशेषः	१०२
चोद्योत्तरमुखेन जामदग्नीनामेवाप्रीणां कर्तव्यत्वविधिः	,,
वायुप्रजापत्योरेकत्वसमर्थनपूर्वकं वायव्यपुरोडाशविधिः	,,
व्यूह्ळद्वादशाहे व्यूह्ळत्वप्रशंसार्थाख्यायिका	१०३
व्यूहनविधिः प्रशंसा च	,,
आख्यायिकामुखेन बृहद्रथन्तरप्रशंसा	,,
यागेषु शुक्लपक्षस्यैव मुख्यत्वम्	१०३
वैरूपादिसाम्नामुत्पत्तिः	,,

त्रिंशोऽध्यायः

नवरात्रप्रारम्भः	१०६
नवरात्रप्रथमाहर्निर्वाहकदेवतादिकथनम्	१०७
प्रथमेऽह्नि विनियोज्यानां मन्त्राणां लक्षणम्	१०८
आज्यप्रउगशस्त्रविधिः लक्षणसमन्वयश्च	१०९
मरुत्वतीयशस्त्रं लक्षणसमन्वयश्च	११०

विषयः पार्श्वम्
निष्केवल्यशस्त्रं लक्षणप्रदर्शनं च १११२
निष्केवल्यनिविद्धानात् प्राक् तार्क्ष्यसूक्तशंसनविधिः ११३
तार्क्ष्यप्रशंसा ,,
निविद्धानसूक्तम् ११४
निष्केवल्यमरुत्वतीययोर्निविद्धानसूक्तप्रशंसा ११५
वैश्वदेवशस्त्रविधिः लक्षणसमन्वयश्च ,,
आग्निमारुतशस्त्रविधिः लक्षणसमन्वयश्च ११८
द्वितीयाह प्रस्तावः १२१
द्वितीयस्य ह्नो देवतादिनिरूपणम् ,,
तस्मिन्नहनि शंसनीयानां मन्त्राणां लिङ्गानि ,,
आज्यप्रउगशस्त्रे १२२
मरुत्वतीयशस्त्रम् १२४
निष्केवल्यशस्त्रम् १२६
वैश्वदेवशस्त्रम् १२८
आख्यायिकामुखेन शार्यातस्य यज्ञस्यत्र इति निविद्धानसूक्तस्य प्रशंसा १३०
आग्निमारुतशस्त्रनिरूपणम् १३१
विषयः पार्श्वम्

एकविंशोऽध्यायः

तृतीयाहर्वर्णनम् १३३
तृतीयस्याह्नो देवतादिकथनम् ,,
तदहःशंसनीयमन्त्रलिङ्गानि १३४
आज्यशस्त्रविधिः १३५
आज्यशस्त्रप्रशंसार्थाख्यायिका ,,
वैरूपमिति नाम्नः प्रवृत्तिनिमित्तकथनम् ,,
प्रउगशस्त्रविधिः १३७
मरुत्वतीयशस्त्रविधिः १३९
निष्केवल्यशस्त्रविधिः १४१
यो जात इति निविद्धानीयसूक्तविधिः प्रशंसा च १४३
गृत्समदोपाख्यानम् १४४
वैश्वदेवशस्त्रविधिः १४६
आग्निमारुतशस्त्रविधिः १४९
चतुर्थाहःप्रारम्भः १५१
चतुर्थेऽहनि कर्तव्यन्यूङ्खप्रस्तावः ,,
न्यूङ्खविधिः १५३
मन्त्रमध्ये न्यूङ्खस्य स्थानविधौ मतभेदनिरूपणम् १५४
तत्र सिद्धान्तः १५६
प्रातरनुवाके आज्यशस्त्रे माध्यन्दिनसवने च स्थानविशेषविधिः १५७
चतुर्थस्याह्नो देवतादिनिरूपणम् १५८

विषयः	पार्श्वम्
तदहःशंसनीयमन्त्रलिङ्गानि	१५९
आज्यशस्त्रविधिः	१६०
आज्यसूक्तप्रशंसा	१६१
प्रउगविधिः	१६४
मरुत्वतीयशस्त्रविधिः	१६५
निष्केवल्यशस्त्रविधिः	१६८
वैश्वदेवशस्त्रविधिः	१७२
आग्निमारुतशस्त्रविधिः	१७४

द्वाविंशोऽध्यायः

विषयः	पार्श्वम्
पञ्चमाहर्निरूपणम्	१७६
पञ्चमस्याह्नो देवतादिः	,,
तस्मिन्नहनि शंसनीयमन्त्रलिङ्गानि	१७७
आज्यशस्त्रविधिः	१८०
प्रउगशस्त्रविधिः	,,
मरुत्वतीयशस्त्रविधिः	१८१
निष्केवल्यशस्त्रविधिः	१८३
महानाम्नीशब्दनिरुक्तिः	१८४
शक्वरीशब्दनिर्वचनम्	१८५
सिमाशब्दनिर्वचनम्	१८६
वैश्वदेवशस्त्रविधिः	१८९
आग्निमारुतशस्त्रविधिः	१९१
षष्ठाहःप्रारम्भः	१९२
षष्ठेऽहनि ऋतुयाजेषु विशेषकथनम्	१९३
तत्र प्रैषवषट्कारयोरकरणे करणे च दोषप्रदर्शनपूर्वकं सिद्धान्तकथनम्	१९४
प्रातर्मध्यन्दिनसवनयोः प्रस्थितयाज्यानां पुरस्तात् पारुच्छेपीनामृचां शंसनविधिः	१९५
रोहितशब्दनिरुक्तिः	१९६
सप्तपदानां पारुच्छेपीनामृचां षष्ठेऽहनि शंसने चोद्यपरिहारौ	,,
उपाख्यानमुखेन पारुच्छेपीयसप्तमपदस्तुतिः	१९७
षष्ठाहर्विधिः	१९९
तस्याह्नो देवतादिकथनम्	,,
तदहःशंसनीयमन्त्रलिङ्गानि	२००
आज्यशस्त्रविधिः	,,
प्रउगविधिः	२०१
मरुत्वतीयशस्त्रविधिः	२०२
निष्केवल्यशस्त्रविधिः	२०५
वैश्वदेवशस्त्रविधिः	२०७
नाभानेदिष्ठोपाख्यानम्	२१०
सत्योक्तिप्रशंसा	२१९
नाभानेदिष्ठेन सह शंसनीयानां सूक्तान्तराणां विधिः	,,
असाहित्ये दोषप्रदर्शनम्	२२०
सहोक्तिप्रशंसा	२२१

विषयः पार्श्वम्

आग्निमारुतशस्त्रविधिः २२३

त्रयोविंशोऽध्यायः

सप्तमेऽहनि शंसनीयमन्त्रलिङ्गानि २२५
आज्यशस्त्रविधिः २२६
आज्यसूक्तस्तवः ,,
प्रउगविधिः २२८
मरुत्वतीयशस्त्रविधिः २२९
कयाशुभेतिसूक्तप्रशंसा २३०
निष्केवल्यशस्त्रविधिः २३२
सप्तमस्याह्नो बृहत्पृष्ठत्वम् ,,
रथन्तरपृष्ठत्वनिन्दापूर्वकं बृहत्पृष्ठस्यैव कर्तव्यतोक्तिः २३३
अभिशब्दस्य प्रशब्दतुल्यार्थत्वनिरूपणम् २३५
वैश्वदेवशस्त्रनिरूपणम् २३६
आग्निमारुतशस्त्रविधिः २३८
अष्टमेऽहनि शंसनीयमन्त्रलिङ्गानि २३९
आज्यप्रउगशस्त्रविधिः २४०
मरुत्वतीयशस्त्रविधि २४१
निष्केवल्यशस्त्रविधिः २४४
मरुत्वतीयनिष्केवल्ययोः प्रशंसा २४७

विषयः पार्श्वम्

वैश्वदेवशस्त्रविधिः २४८
आग्निमारुतशस्त्रविधिः २५०

चतुर्विंशोऽध्यायः

नवमेऽहनि शंसनीयमन्त्रलिङ्गानि २५२
आज्यशस्त्रविधिः ,,
प्रउगशस्त्रविधिः २५५
मरुत्वतीयशस्त्रविधिः २५४
निष्केवल्यशस्त्रविधिः २५७
मरुत्वतीयनिष्केवल्यसूक्तप्रशंसा २६०
वैश्वदेवशस्त्रविधिः ,,
आग्निमारुतशस्त्रविधिः २६२
पृष्ठ्यषडहच्छन्दोमस्तुतिपूर्वकं दशमाहःप्रशंसा २६६
दशमस्याह्न अविवाक्यत्वकथनम् २६८
गार्हपत्यहोमार्थं सर्पणविधिः २६९
होममन्त्रः व्याख्यानं च २७०
आग्नीध्रीयहोमार्थं सर्पणविधिः होममन्त्रश्च २७२
मानसस्तुत्यर्थं सर्पणविधिः २७३
सर्पराज्ञीकथा २७५
मानसस्तोत्रप्रकारः २७६

विषयः	पार्श्वम्
सर्पराज्ञीशंसनानन्तरं चतुर्होतृमन्त्रशंसनविधिः	२७७
चतुर्होतृमन्त्रप्रशंसा	,,
मानसग्रहभक्षान्ते औदुम्बरीस्पर्शनविधिः	२७८
औदुम्बरीस्पर्शनादूर्ध्वं वाग्यमविधिः	२७९
अहोरात्रयोर्वाग्विसर्गे दोषप्रदर्शनपूर्वकं वाग्विसर्गकालविधिः	२८०
तत्र मतान्तरम्	२८१
वाग्विसर्गस्य देशविधिः	,,
वाग्विसर्गमन्त्रः प्रशंसा च	२८२
चतुर्होतृमन्त्रव्याख्यानार्थमाहावविधिः	२८३
चतुर्होतृमन्त्रस्तद्व्याख्या च	२८४
ग्रहाख्यमन्त्राः, तद्व्याख्यानं च	,,
प्रजापतितनुसंज्ञकानां मन्त्राणां ब्रह्मोद्यसंज्ञकमन्त्रस्य च शंसनविधिः	२८५
प्रजापतितनुसंज्ञकमन्त्राः, तद्व्याख्यानं च	,,
ब्रह्मोद्यमन्त्रस्वरूपम्	२८७

पञ्चविंशोऽध्यायः

विषयः	पार्श्वम्
अग्निहोत्रविधिः	२८९
होमद्रव्यस्य पयसः प्रशंसा	२९०
प्रश्नोत्तरमुखेन दोहनकाले धेनोरुपवेशने प्रायश्चित्तम्	२९३
ध्वनिकरणे प्रायश्चित्तम्	२९४
धेनोः स्पन्दने पयसः क्षरणे च प्रायश्चित्तम्	२९५
सर्वस्यापि पयसः क्षरणेऽन्यगोक्षीरेण होमविधिः	,,
तदभावे दधियवाग्वादिभिः, तेषामप्यभावे श्रद्धया होमविधिः	२९६
श्रद्धाहोमप्रशंसा	,,
अग्निहोत्रे दक्षिणाकथनम्	२९७
सायंप्रातराहुतिभ्यां गवामयनसादृश्यप्रतिपादनम्	२९९
आब्दिकाग्निहोत्रेणाग्निचित्यालाभकथनम्	३००
प्रातरग्निहोत्रस्य सूर्योदयादनन्तरकर्तव्यत्वविधिः	३०१
उदितहोमप्रशंसा	३०३
अनुदितहोमनिन्दा	३०६
उदितहोमार्थमादित्यप्रशंसा	,,
पुनरप्यनुदितहोमनिन्दापूर्वकमुदितहोमप्रशंसा	३०९
प्रकारान्तरेणोदितहोमप्रशंसा	३१०
सर्वप्रायश्चित्तार्थं व्याहृतित्रयसृष्टिकथनम्	३११

विषयः पार्श्वम्
प्रणवोत्पत्तिः ३१६
प्रणवस्तवः ३१७
होत्रादिभ्योऽपि प्रायश्चित्तम् ३२०
व्याहृतिप्रशंसा ३२१
प्रश्नोत्तराभ्यां ब्रह्मत्वनिर्णयः ३२२

विषयः पार्श्वम्
ब्रह्मणो वाग्यमार्थ इतिहासः ३२५
ब्रह्मणो वाग्यमविधिः ३२६
,, दक्षिणानयने चोद्यपरिहारौ ३२७
ब्रह्मणो दक्षिणाधिक्ये हेतुः ३२८

शुद्धिपत्रिका

पार्श्वम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
६	८	साधनो	साधनयो
१२	६	तस्माद्	तस्मात्
१६	१९	पिव	पिब
१८	१४	नदमि(त्युक्ता ! ष्णिक्)	नदमित्यु(क्ता ! ष्णिक्)
३२	१८	बह्वीः	बह्वी
४०	१७	अश्विनावश्नु	अश्विनावाश्नु
४२	१५	उपास्तु	उषास्तु
५६	९	बैराज	वैराज
८०	२	साम्नेति	सामेति
१०२	१६	यामतया	यामताया
१०६	६	तथष्टमम्	तथाष्टमम् ।
,,	९	गेचरे	गोचरे ।
१०७	२५	पूर्वम्व्यह	पूर्वस्व्यह
११२	१७	ह्यक्तं	ह्युक्तं
११५	२	निविद्धान	निविद्धाने
११७	५	इत्यवाचा	इत्यवोचा
,,	१५	लाके	लोके
,,	२१	इकारंलोप	इकारलोप
११९	२	रूम्पदादित्वत्	सम्पदादित्वात्
१२२	८	वृपि	वृषि
१३४	३	अभ्यासन	अभ्यासेन
१४४	२२	शुनकस्येवं	शुनकस्यैव
१५७	८	न्यूङख	न्यूङ्ख
१५८	४	मध्यन्दिन	मध्यन्दिने
१६१	८	पाङक्तम्	पाङ्क्तम्

पार्श्वम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१६७	१४	शंसस्य	संशल्य
१६८	९	वे	वै
१७१	८	गीष्वार्यं	गीर्ष्वाय
१७२	२	सवित	सवितु
१७३	५	शुक्रैत	शुक्रैतु
१७७	११	रूप	रूपं
१८४	६	गीतां	गीतं
१८७	७	द्विपदो च ते	द्विपदोच्यते
१९१	१४	सूञ्ये	सूञ्यते ।
१९४	१५	जिह्वा	जिह्वाः
१९८	४	यन्य	यान्य
”	”	वसून्यसं	वसून्यासं
२००	११	रै	रैः
२०३	१०	सं यो वषा वष्ण्येभिः	स यो वृषा वृष्ण्येभिः
२१३	१८	सहस्र	सहस्रं
२१४	२	परिवषणं	परिवेषणं
२२८	९	छन्दोमाप्ख्यैः	छन्दोमाख्यः
२४१	१४	द्वचतृचौ तिस्रो द्वचो	द्वृचतृचौ तिस्रो द्वृचो
२४८	७	प्रनिपद्	प्रतिपद्
२५१	१४	चा मि् न्तम	चान्तिमम्
२६९	४	स्वकार्यज्ञ	स्वकार्यज्ञा
”	५	संशयेत्योाद	संशयेत्यादि
२७०	७	कण्टकाख्यकर्म	कण्टकाख्यः कर्म
२७७	११	चतुर्होतन्	चतुर्होतॄन्
२७८	६	पूर्वाद्रिणो	पूर्वादिणो
२८२	३	यज्ञनैव	यज्ञेनैव
२८३	६	चतुर्होतषु	चतुर्होतृषु
”	१०	अहावस्य	आहास्यव

पार्श्वम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
२८३	२३	वैजन्त्यां	वैजयन्त्यां
२८५	१३	षट्	षद्
२८७	१६	मानाति	माना
२९३	१४	शेपिणं	शेषिणं
३०९	१८	संसधैका	संसद्यैका
३२१	७	जुहश्राथ	जुह्वाथ
३३०	११	समाप्ताः	समाप्ता

॥ श्री ॥

। ॐ ।

ऐतरेयब्राह्मणं

श्रीषड्गुरुशिष्यविरचितसुखप्रदाख्यवृत्तिसहितम् ।

अथ षोडशोऽध्यायः

अथ षोळशिनं वक्तुमितिहासं ब्रवीति ह —

॥ देवा वै प्रथमेनाह्नेन्द्राय वज्रं समभरन् ॥

वै पुरा । ङ्यर्थे टाद्वयम् $ । एवमुत्तरत्रापि ।

पृष्ठ्याहर्गणेऽह्न्याद्ये (व ? वै) वज्रं कर्तुं पुरा सुराः ।
प्रकृतिद्रव्यमनयन्निन्द्रवीर्यसमृद्धये ॥

॥ तं द्वितीयेनाह्नासिञ्चन् ॥

$ ‘प्रथमेनाह्ना प्रथमदिवसनिष्पाद्येन सोमप्रयोगेण ......। अत्र सर्वत्राहःशब्दोऽह्ना निष्पाद्यसोमप्रयोगमभिधत्ते’ इति सायणः ।

वज्रं कृतं वह्नितप्तं द्वितीयेऽहन्यपाययन् ।
* प्राक् चोक्तं त्रिषमृद्धत्वं कृतितापनपायनैः ॥

॥ तं तृतीयेनाह्ना प्रायच्छन् ॥

तृतीयेऽह्नि ददुर्वज्रमिन्द्राय तु तदा सुराः ।

अथेन्द्रः,

॥ तं चतुर्थेऽहन्प्राहरत् ॥

ड्लुक्, अह्नि । शत्रून् प्रति चिक्षेप ।

॥तस्माच्चतुर्थेऽहन्षोळशिनं शंसति ॥

अहन् – अहनि । सूत्र्यते हि — §‘अग्निष्टोमः प्रथमं षोळशी चतुर्थमुक्थ्या इतरे । इति पृष्ठ्यः’ इति ।

॥ वज्रो वा एष यत्षोळशी ॥

यत् यः । वै इव । ‘षोळशिना वीर्यकामः स्तुवीत’ इति श्रुतेः वीर्यकारित्वाद्वज्रत्वम् ।

॥ तद्यच्चतुर्थेऽहन्षोळशिनं शंसति वज्रमेव तत्प्रहरति ॥

शंसति यत् प्रहरति तत् ।

॥ द्विषते भ्रातृव्याय वधम् ॥

प्रहरतीत्येव ।

---

* Vol. I. Page 287.

§ आ० श्रौ० सू० ८. ४. २०, २१.

॥ योऽस्य स्तृत्यस्तस्मै स्तर्तवै ॥

‡ उक्तार्थम् । किञ्च,

॥ वज्रो वै षोळशी पशव उक्थानि ॥

'पशुकाम उक्थ्यं गृह्णीयादि'ति श्रुतेः उक्थ्यानां पशुत्वम् ।

॥ तं परस्तादुक्थानां पर्यस्य शंसति ॥

तं षोळशिनम् । उक्थानां परस्तात् उपरिष्टात् । पर्यस्य व्यतिषज्य ।

॥ तं यत् परस्तादुक्थानां पर्यस्य शंसति, वज्रेणैव तत् षोळशिना पशून् परिगच्छति । तस्मात् पशवो वज्रेणैव षोळशिना परिगता मनुष्यानभ्युपावर्तन्ते ॥

वज्रेण वीर्यकारिणा द(ण्डान्?ण्डेन) । अभि प्रति ।

॥ तस्मादश्वो वा पुरुषो वा गौर्वा हस्ती वा परिगत एव स्वयमात्मनेऽत एव वाचाभिषिद्ध उपावर्तते वज्रमेव षोळशिनं पश्यन् वज्रेणैव षोळशिना परिगतः ॥

तस्मात् तथाहि पुरुषो दासादिः । * अतः टार्थे तसिल्, अनया । $परिगतः अभिभूतः । अभिषिद्धः न्यर्थेऽभि, निव(र्तति?र्तितः) । वज्रषोळशि[1]समदण्डादि पश्यन् स्वयमेव । परिगतः सुरमः परिगतं

---

[1] 'शिना स' क. घ. पाठः.

---

‡ Vol. I. Page 203. * 'अत एव षोडशिवज्रनियमितत्वादेव', $ 'परिगतः नियमितः' अभिषिद्धः अभितो बद्धः' इति सायणः ।

निवारकम् (?)। आत्मने टार्थे ङे, स्वभावेन।

॥ वाग्घि वज्रः ॥

दुस्सहा वाग् वज्र इव।

॥ वाक् षोळशी ॥

अनुबाहुल्याद्वाक् च।

॥ तदाहुः किं षोळशिनः षोळशित्वमिति ॥

षोळशी षोळशयुतः कथमत्र तु षोळश।
शब्दप्रवृत्तौ को हेतुरिति केचिदचूचुदन् ॥

परिहरति—

॥ षोळशः स्तोत्राणां षोळशः शस्त्राणां षोळशभिरक्षरैरादत्ते षोळशभिः प्रणौति षोळशपदां निविदं दधाति तत् षोळशिनः षोळशित्वम्[¶] ॥

[*]अग्निष्टोमे द्वादशासन्नुक्थ्ये त्रीणि ततः स्वयम्।
षोळश स्तोत्रशस्त्राणां टिलोपो द्वन्द्वतस्तु ङे ॥
[1]आदानप्रणवौ चापि वि(सृ?हृ)ते षोळशाक्ष(र?रैः)।
निविच्च षोळशपदा खलु त्वस्मदादिका ॥
यस्याः क्रमः सूत्र्यते[2] हि व्याकुलत्वनिवृत्तये —

[‡]'मत्सदर्हि वृत्रमपां जिन्वदुदार्यमुद्यां दिवि समुद्रं पर्वताँ इह' इति।

---

[1] 'अदान' ख. पाठः। [2] सूच्यते' ख. घ. पाठः।

[¶] न वै षोडशी नाम यज्ञोऽस्ति यद्वाव षोडशँ स्तोत्रँ षोडशँ शस्त्रं तेन षोडशी तत् षोडशिनः षोडशित्वम्' इति तै० सं० ६. ६. ११.

[*] तथा च तै० ब्रा०— 'द्वादशाग्निष्टोमस्य स्तोत्राणि' इति (१. २. २.)।

[‡] आ० श्रौ० सू० ६. २. ११.

पञ्चहेतुभिः शस्त्रमिदं षोळशिनामकम् ।

अथ चोदयति —

॥ द्वे वा अक्षरे अतिरिंच्येते षोळशिनोऽनुष्टुभमभिसंपन्नस्य ॥

$ सूत्र इन्द्र जुषस्वाद्या विहृत्य पठिता हि या ।
अर्धर्चस्तु द्वितीयोऽस्या भवत्यष्टादशाक्षरः ।
आनुष्टुभत्वं प्राप्ताया द्व्यक्षराधिक्यमस्ति हि ॥

परिहरति —

॥ वाचो वाव तौ स्तनौ ॥

§ अनुष्टुभस्तु वाग्देव्या अधिके द्वे स्तनाविव ।
स्तनौ हि खलु दृश्येते देहादेव पृथक्कृतौ ॥

किञ्च,

॥ सत्यानृते वाव ते ॥

ततः किम् ।

॥ अवत्येनं सत्यं नैनमनृतं हिनस्ति य एवं वेद ॥

एनं वेदितारम् ॥

प्रथमः खण्डः

$ आ० श्रौ० सू० ६. ३. १. § वाचोऽनुष्टुप्त्वं च 'वाग्वा अनुष्टुप्' इति तैत्तिरीयसंहितायाम्. ६. ६. ११.

अथ षोळशिशस्त्रार्थं गीयते यद्धि सामगैः ।
तदत्र गौरिवीताख्यं नानदं (साम) वे(दि?)ति च ॥

[†]॥ गौरिवीतं षोळशिसाम कुर्वीत तेजस्कामो ब्रह्मवर्चसकामः ॥

तेजो दीप्तिर्वेदवृत्तसम्पत्तिर्ब्रह्मवर्चसम् ।
अन्तर्णीतण्यर्थकोऽत्र कृञ् यष्टा कारयेदिति ॥

॥ तेजो वै ब्रह्मवर्चसं गौरिवीतम् ॥

साध्यसाधनोरैक्यमायुर्घृतमिदं यथा ।

॥ तेजस्वी ब्रह्मवर्चसी भवति य एवं विद्वान् गौरिवीतं षोळशिसाम कुरुते ॥

गौरिवीतं कारयन् स्याद् ब्रह्मवर्चसदीप्तियुक् ॥

[¶]॥ नानदं षोळशिसाम कर्तव्यमित्याहुः ॥

ब्रह्मवादिनः ।

नानदं नाम निर्वक्तुमितिहासं ब्रवीत्यथ —

॥ इन्द्रो वै वृत्राय वज्रमुदयच्छत् तमस्मै प्राहरत् ॥

वृत्राय क्षिप्तवान् ।

॥ तमभ्यहनत् ॥

वृत्रं निहतवानिन्द्रो न शपो लुगहन् लङि ।

[†] गौरिवीतेन महर्षिणा दृष्टं साम गौरिवीतम् । तच्च अभि प्रगोपतिम् (ऋक्सं० ८. ६९. ४.) इत्यस्यामृच्युत्पन्नं साम । [¶] प्रत्यस्मै पिपीषते (ऋक्सं० ६. ४२. १.) इत्यस्यामृच्युत्पन्नं साम ।

॥ सोऽभिहतो व्यनदत् ॥

सः वृत्रः वि नाना अनदत् ।

॥ यद्व्यनदत्तन्नानदं सामाभवत् ॥

यत् यदा । तत्तदा ।

॥ तन्नानदस्य नानदत्वम् ॥

किञ्च,

॥ अभ्रातृव्यं वा एतद् भ्रातृव्यहा साम यन्नानदम् ॥

अभ्रातृव्यमिति व्याचष्टे— भ्रातृव्यहेति । दीर्घश्छान्दसः ।

॥ अभ्रातृव्यो भ्रातृव्यहा भवति य एवं विद्वान् नानदं षोळशिसाम कुरुते ॥

तद् भ्रात्रा (?) कारयति ।

॥ तद्यदि नानदं कुर्युरविहृतः षोळशी शंस्तव्यः ॥

तत् तत्र । कुर्युः सामगाः । शंसितव्यो होत्रा । कुतः ।

॥ अविहृतासु हि तासु स्तुवते ॥

सामगाः ।

[१]'अथ षोडश्यसावी'ति प्रोक्तं शस्त्रं ब्रवीति ह—

॥ यदि गौरिवीतं विहृतः षोळशी शंस्तव्यः ॥

कुर्युरित्येव । कुतः ।

---

[१] आ० श्रौ० सू० ६. २. १, २.

॥ विहृतासु हि तासु स्तुवते ॥

[+]'विहृतस्येन्द्र जुषस्व प्र'त्याद्युक्तं भवेदिह ॥

द्वितीयः खण्डः

---

[*]॥ अथातश्छन्दांस्येव व्यतिषजति ॥

व्यतिषङ्गो [†] विहारः ।

[1]सूत्रोक्तेन्द्रजुषस्वादिस्तोत्रन्यासानुरूपकात् ।
परमात्वावहन्त्वादिछन्दांसि विहरेदिह ।
पादाः पूर्वेऽत्र[2] पूर्वस्याः परासां च परे तथा[$] ।

कथम् ।

॥[§] आ त्वा वहन्तु हरय [¶]उपोषु शृणुही गिर इति गायत्रीश्च पङ्क्तीश्च व्यतिषजति ॥

इतिराद्यर्थः ।

[‡]आत्वावहन्तु तिस्रः स्युरुपोष्वेका [×]सुसन्दृशम् ।

---

[1] 'त' क. ख. पाठः [2] 'पूर्वे तु' घ. पाठः

[+] आ० श्रौ० सू० ६. ३. १. [*]विहारे तैत्तिरीयसंहिता यथा—'कनीयांसि वै देवेषु छन्दांस्यासन् ज्यायांस्यसुरेषु ते देवाः कनीयसा छन्दसा ज्यायश्छन्दोऽभिव्यशंसन् ततो वै तेऽसुराणां लोकमवृञ्जत' इति ६. ६. ११. [†] 'स्वस्वस्थानाद् विभज्यान्यत्र नयनं विहरणम्' इति सायणः। [$] पादान् व्यवधायार्धर्चशः शंसेत् । पूर्वासां पूर्वाणि पदानि' इति आ० श्रौ० सू० ६. ३. ३, ४. [§] ऋक्सं० १. १. ३०. १. [¶] ऋक्सं० १. ६. ३. १. [‡] आ त्वा वहन्तु हरय इति तिस्रो गायत्र्यः । उपोषु शृणुही गिरः सुसन्दृशं त्वा मघवन्नित्येका द्वे च पङ्क्ती' इति आ० श्रौ० सू० ६. १. ३, ४. [×] ऋक्सं० १. ६. ३. ३.

द्वे पङ्क्तयस्तिस्र एव पादावन्त्यौ च संहतौ ।
*'गायत्र्यः पङ्क्तिभि'रिति सम्यगेव हि सूच्यते ॥

यथा —

आ त्वा वहन्तु हरय उपोषु शृणुही गिरः ।
वृषणं सोमपीतये मघवन् मा तथा ह्वोम् ॥

इन्द्र त्वा सूरचक्षसो यदा नः सूनृतावतः ।
कर आदर्थयास इद्यो जान्विन्द्र ते हरोम् ॥

इत्यादि ॥

॥ गायत्रो वै पुरुषः ॥

अवत्सधेनुन्यायेन गायत्रो ब्राह्मणस्त्विह† ।
‡सृष्टावग्रे सहोत्पन्नौ गायत्री ब्राह्मणस्तथा ॥

॥ पाङ्क्ताः पशवः ॥

पशुः प्राङ्क्तो हि सन्दृष्टः पञ्चसङ्ख्यान्वयः खलु ।
पादैर्मुखेन पञ्चत्वं पशोः पङ्क्तिश्च पञ्चपात् ॥

॥ पुरुषमेव तत्पशुभिर्व्यतिषजति ॥

तत् तत्र । व्यतिषङ्गः सम्बन्धः ।

॥ पशुषु प्रतिष्ठापयति ॥

---

* आ० श्रौ० सू० ६. ३. ५. † 'लोके पुरुषो गायत्रः उपनीतेन गायत्र्या अनुष्ठेयत्वाद्' इति सायणः. ‡ गायत्र्या ब्राह्मणस्य च सहोत्पन्नत्वं मुखत उत्पन्नत्वेन । तथाच तै० सं० — 'स मुखतस्त्रिवृतं निरमिमीत तमग्निर्देवतान्वसृज्यत गायत्री छन्दो रथन्तरं साम ब्राह्मणो मनुष्याणाम्' इति (७. १. १.) ।

चेति शेषः । पुरुषमित्येव ।

॥ यद्धु गायत्री च पङ्क्तिश्च ते द्वे अनुष्टुभौ ॥

उ खलु ।

त्रिभिर्गायत्र्यष्टकैश्च पङ्क्तिः पञ्चभिरष्टकैः ।
चतुष्षष्टयक्षरत्वेन द्वे हि स्यातामनुष्टुभौ ॥

॥ तेनो वाचो रूपादनुष्टुभो रूपाद् वज्ररूपान्नैति ॥

उ खलु† । न एति न च्यवते ।
वज्रत्वं चैव वाक्त्वं च श्रुतेः सिद्ध[1]मनुष्टुभः ।

॥ ‡यदिन्द्र पृतनाज्ये ‖ऽयं ते अस्तु हर्यत इत्युष्णिहश्च बृहतीश्च व्यतिषजति ॥

§यदिन्द्रेत्युष्णिहास्तिस्रो बृहत्योऽयं त इत्यपि ।
उष्णिगष्टाक्षरावाद्यौ तृतीयो द्वादशाक्षरः ।
बृहत्या अष्टकावाद्यौ ततो द्वादशकाष्टकौ ।
उष्णिहां तूत्तमान् पादान् द्वौ कुर्याच्चतुरादितः ।
चतुष्कमष्टकं चेति, बृहत्या द्वादशाक्षरे ।
चतुष्कोष्णिहसंयुक्ते त्वर्धर्चाः षोळशाक्षराः ।
$‘उष्णिहो बृहतीभिरुष्णिहा’मित्यादि सूत्र्यते ॥

यथा— यदिन्द्र पृतनाज्येऽयन्ते अस्तु हर्यतः, देवास्त्वा दधिरे पुरः सोम आ हरिभिस्सुतोम्, आदित्तेह जुषाण इन्द्र हरिभिर्न आगहि, यता

---

[1] ‘सृष्टि’ ख. पाठः ।

---

† ‘तेनो तेनैव’ इति सायणः ‡ ऋक्सं० ६. १. ५. ५. ‖ ऋक्सं० ३. ३. ८. १. §‘यदिन्द्र पृतनाज्येऽयं ते अस्तु हर्यत इत्यौष्णिहबार्हतौ तृचौ’ इति आ० श्रौ० सू० ६. २. ५. $ आ० श्रौ० सू० ६. ३. ७.

हरी ववक्षतुरातिष्ठ हरितं रथोम् इत्यादि ॥

॥ औष्णिहो वै पुरुषः ॥

[*] पुरुषः क्षत्रियश्चेह द्वितीयत्वेन तुल्यता ॥

॥ [†] बार्हताः पशवः ॥

चतुष्पात्तु समृद्धेश्च बृहतेः पशुभिः समाः (?) ।

॥ पुरुषमेव तत् पशुभिर्व्यतिषजति, पशुषु प्रतिष्ठापयति । यदुष्णिक् च बृहती च ते द्वे अनुष्टुभौ ॥

अष्टाविंशत्यक्षरोष्णिक् षट्त्रिंशद् बृहतीति च[1] ।
चतुष्षष्ट्यक्षरत्वेन द्वे हि स्यातामनुष्टुभौ ॥

॥ तेनो वाचो रूपादनुष्टुभो रूपाद् वज्ररूपान्नैति ॥

॥ [‡] आधूर्ष्वस्मै [¶] ब्रह्मन् वीर ब्रह्मकृतिं जुषाण इति द्विपदां च त्रिष्टुभं च व्यतिषजति ॥

[§] आधूर्षु द्विपदा विंशत्यक्षरा व्यूहनेन च ।
चतुष्पञ्चाक्षरा [⁋] ब्रह्मंस्त्रिष्टुभा विहरेद्यथा ॥
आधूर्ष्वस्मै ब्रह्मन् वीर ब्रह्मकृतिं जुषाणः, दधाताश्वानर्वाचीनो

---

[1] 'बृहती मता' घ. ङ. पाठः ।

---

[*] 'उपनीतः पुरुषो व्याहृत्यक्षरचतुष्टयोपेतां चतुर्विंशत्यक्षरां गायत्रीं व्यतिषजति । उष्णिक् चाष्टाविंशत्यक्षरा । ततः पुरुषस्यौष्णिहत्वम्' इति सायणः । [†] तथाच तै० सं० 'छन्दांसि पशुष्वाजिमयुस्तान् बृहत्युदजयत् तस्माद् बार्हताः पशव उच्यन्ते' इति (५. ३. २) । [‡] ऋक्सं० ५. ३. २५. ४. [¶] ऋक्सं० ५. ३. १३. २. [§] 'आधूर्ष्वस्मा इति द्विपदा' आ० श्रौ० सू० ६. २. ५. [⁋] 'ब्रह्मन् वीर ब्रह्मकृतिं जुषाण इति त्रिष्टुप्' आ० श्रौ० सू० ६. २. ६.

हरिभिर्याहि तूयोम् । इन्द्रो न वज्रयासिन्नूषु सवने मादयस्व, हिरण्यबाहुरुपब्रह्माणि शृणव इमा नोमिति ॥

॥ द्विपाद् वै पुरुषः वीर्यं त्रिष्टुप् ॥

§ वीर्यवदिन्द्रसम्बन्धात् ।

॥ पुरुषमेव तद्वीर्येण व्यतिषजति वीर्ये प्रतिष्ठापयति तस्माद् पुरुषो वीर्ये प्रतिष्ठितः ॥

तस्मात् तथाहि । स्पष्टयति —

॥ सर्वेषां पशूनां वीर्यवत्तमः ॥

वीर्यान्वितो हि पुरुषो गजादीनधितिष्ठति ॥

॥ यदु द्विपदा च विंशत्यक्षरा त्रिष्टुप् च ते द्वे अनुष्टुभौ ॥

उ खलु ।
चतुरेकादश त्रिष्टुब्विंशतिर्द्विपदेति च ।
चतुष्षष्ट्यक्षरत्वेन द्वे हि स्यातामनुष्टुभौ ॥

॥ तेनो वाचो रूपादनुष्टुभो रूपाद् वज्ररूपान्नैति ॥

॥ ‖एष ब्रह्मा *प्रतेमहे विदथे शंसिषं हरी इति द्विपदाश्च जगतीश्च व्यतिषजति ॥

× प्र ते जगत्यास्तिस्रश्चतुर्द्वादशाः
(एष ब्रह्मेति तिस्रश्च) चतुर्धाकरणेन च ।

---

§ 'त्रिष्टुभो वीर्यहेतुत्वाद् वीर्यत्वम्' इति सायणः । ‖ आ० श्रौ० सू० ६. २. ६.
* ऋक्सं० ८. ५. ५. १. × प्रक्षिप्तमिदम् ।

चतुश्चतुष्का वेत्येतत् पूर्वान्तं च पदादिमम् [‡]।
[❀] 'द्विपदाश्चतुर्धा कृत्वा प्रथमा'मादि सूत्र्यते ॥
[$] प्रते जगत्यास्तिस्रश्च चतुर्द्वादशका इमाः ॥

यथा— एष ब्रह्मा प्र ते महे विदथे शंसिषं हरी, य ऋत्वियः प्र ते वन्वे वनुषो हर्यतं मदोम् । इन्द्रो नाम घृतं न यो हरिभिश्चारु सेचते, श्रुतो गृण आ त्वा विशन्तु हतिवर्पसं गिरोम् । विस्तुतयो हरिं हि योनिमभि ये समस्वरन्, यथापथो हिन्वन्तो हरी दिव्यं यथा सदोम् । इन्द्रत्वद्यायं पृणन्ति हरिभिर्न धेनवः, न्ति रातय इन्द्राय शूषं हरिवन्तमर्चतोम् । त्वामिच्छवसोऽस्य वज्रो हरितो य आयसो, वसस्पते हरिर्निकामो हरिरागभस्त्योम् । यन्ति गिरो द्युम्नी सुशिप्रो हरिमन्युसायकः, न संयत इन्द्रे निरूपा हरिता मिमिक्षरोमिति ॥

॥ द्विपाद् वै पुरुषो [§] जागताः पशवः ॥

'जगती हि तानाहरत्' इति [¶] प्रागध्यगीष्महि ॥

॥ पुरुषमेव तत् पशुभिर्व्यतिषजति पशुषु प्रतिष्ठापयति तस्मात् पुरुषः पशुषु प्रतिष्ठितः ॥

तस्मात् तथाहि ।

॥ अत्ति चैनान् ॥

एनान् पशून् । अत्ति उपभुङ्क्ते ।

[‡] उत्तमायाश्चतुर्थमक्षरमन्त्यं पूर्वस्याद्यमुत्तरस्य' इति आ० श्रौ० सू० ६. ३. १०.
[❀] आ० श्रौ० सू० ६. ३. ९. [$] 'प्र ते महे विदथे शंसिषं हरी इति तिस्रो जगत्यः' इति आ० श्रौ० सू० ६. २. ६. [§] पशूनां जागतत्वे च तै० सं० —'सा पशुभिश्च दीक्षया चागच्छत् तस्माज्जगती छन्दसां पशव्यतमा' (६. १. ६) इति । [¶] Vol. I. Page 518.

॥ अधि च तिष्ठति ॥

एनानित्येव । अधितिष्ठति च ।
गो(ग)जाश्वादिकान् सर्वान् पुरुषो ह्यधितिष्ठति ।

॥ वशे चास्य ॥

पशवो भवन्तीति शेषः । अस्य पुरुषस्य ॥

॥ यदु द्विपदा च षोळशाक्षरा जगती च ते द्वे अनुष्टुभौ ॥

उ खलु ।
एष इत्यादि द्विपदाः ‡सूत्रोक्ताः षोळशाक्षराः ।
प्रते जगत्यस्तिस्रोऽपि चतुर्द्वादशकाः खलु ॥
चतुष्षष्ट्यक्षरत्वेन द्वे द्वे[1] स्यातामनुष्टुभौ ।
जगतीद्विपदात्रित्वे संसिद्धाः षडनुष्टुभः ॥

॥ तेनो वाचो रूपादनुष्टुभो रूपाद् वज्ररूपान्नैति ॥

॥ ¶ त्रिकद्रुकेषु महिषो यवाशिरं § प्रोष्वस्मै पुरोरथमित्यतिच्छन्दसः शंसति ॥

नपुंसकत्वाभावश्छान्दसः ।
त्रिकद्रुकेष्विति तृचः प्रोष्वस्मै पु[2] तथा तृचः ।
ननु त्रिक[3]द्र्वित्याद्याष्टिर्द्वितीया त्वतिशक्करी ।
तृतीया च प्रोषुतृचः सर्व एव हि शाक्करः ।
अतिच्छन्द इति च्छन्दो नेति चेदुत्तरं भृणु ।

---

[1] 'हि' घ. ङ. पाठः. [2] 'च' घ पाठः, [3] 'द्रुका' घ. ङ. पाठः.

---

‡ आ० श्रौ० सू० ६. २. ६. ¶ ऋक्सं० २. ६. २८. १. § ऋक्सं० ८. ७. २१. १.

जगत्या उत्तरं सर्वमतिच्छन्दः श्रुतौ श्रुतम्[‖] ।
अतो ह्येतौ तृ(चौ वि? चावाति)च्छन्दसावित्यमन्त्रयत्[‡] ।

अतिच्छन्दःशब्दं निराह—

॥ छन्दसां वै यो रसोऽत्यक्षरत् सोऽतिच्छन्दसमभ्यत्यक्षरत्तदतिच्छन्दसोऽतिच्छन्दस्त्वम् ॥

रसः सारांशः । अभि प्रति । अतिजगत्युत्कृतिपर्यन्तं चतुर्दशकम् ।

॥ सर्वेभ्यो वा एष छन्दोभ्यः संनिर्मितो यत् षोळशी ॥

यत् यः । संनिर्मितः संभृत्य निर्मितः ।

तद्यदतिच्छन्दसः शंसति सर्वेभ्य एवैनं तच्छन्दोभ्यः संनिर्मिमीते ॥

शंसति यत् निर्मिमीते तत् । एनं षोळशिनम् ।

॥ सर्वेभ्यः छन्दोभ्यः संनिर्मितेन षोळशिना राध्नोति य एवं वेद ॥

तृतीयः खण्डः

तत्र,

॥ [§]महानाम्नीनामुपसर्गानुपसृजति ॥

[‖] 'अतिच्छन्दा वै सर्वाणि छन्दांसि' इति तै० सं० (६. १. ९) 'जगत्याः पराण्यतिच्छन्दांसि' इति च भट्टभास्करः ।
[‡] आ० श्रौ० सू० ६. २. ६.
[§] ऐतरेयारण्यकस्य चतुर्थारण्यके प्रोक्ता 'विदा मघवन्' इत्याद्या नव ऋचो महानाम्न्यः ।

उपसर्गा अंशाः । कर्मणि घञ् । उपसृजति निदध्यात् ।

त्रिकद्रुकप्रोषुतृचौ विहरेत् खल्वनुष्टुभा[1] ।
महानाम्नीभ्य उद्धृत्य सूत्रे या संभृता तया[§] ।
प्रचेतन प्रचेतयेति तत्राद्याष्टिः त्रिकद्रुविति ।
चतुष्षष्ट्यक्षरत्वेन स्वत एव ह्यनुष्टुभौ ।
अ(स?थ)द्वे अतिशक्वर्यौ षष्ट्यक्षरसमन्विते ।
[‡]अधस्त्विषित्रिपाद्यन्त उपदध्यात् प्रचेतन ।
अथ साकं त्रिपाद्यन्त उपदध्यात् प्रचेतय ।
चतुष्षष्ट्यक्षरत्वेन ते चाभूतामनुष्टुभौ ।
षट्पञ्चाशदक्षरके तृचे वै प्रोषुशाक्वरे ।
[¶]आयाहि क्रतुसुम्नेति पादान् षष्ठांस्तु निक्षिपेत् ।
चतुष्षष्ट्यक्षरत्वेन तास्तिस्रः षडनुष्टुभः ।
[‖]'अनुष्टुभमतिच्छन्दःस्वि'त्यादि खलु सूत्र्यते ।

यथा[2] — त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत्

---

[1] 'भौ' क.ख. पाठः । [2] 'यथा — त्रिकद्रुके यथा वशोम् । स ईं ममाद सत्य इन्दोम् । अधस्त्विषीमान् प्रवावृधोम् । अधत्तान्यं जठरे प्रेम रिच्यत प्रचेतन सैनम् साकं जातः विचर्षणोम् । दाता राधः काम्यं वसु प्रचेतय सैनम् प्रोष्वसै समत्सु वृत्रहोम् । अस्माकं बोधि चोदितायाहि पिव मत्स्व नभन्ता अधिधन्वसोम् । त्वं सिन्धून् पुष्यसि वार्योम् । तं त्वा परिष्वजामहे क्रतुच्छन्द ऋतं बृहन्नभन्तामधिधन्वसोम् । विषु विश्वा जिग्रांसतोम् । या ते रातिर्ददिर्वसु सुम्न आधेहि नो वसो नभन्तां धन्वसोम्' घ. ङ. पाठः ।

[§] तथाच आ० श्रौ० सू० 'प्रचेतन प्रचेतयायाहि पिब मत्स्व क्रतुच्छन्द ऋतं बृहत् सुम्न आधेहि नो वसवित्यनुष्टुप् । प्र प्रवस्त्रिष्टुभमिषमर्चतं प्रार्चत यो व्यतीँरफाणयदिति तृचा आनुष्टुभाः' इति ६. २. ९. 'अनुष्टुभमतिच्छन्दःस्ववदध्यात्' इति च ६. ३. ११. ‡ 'द्वितीयतृतीययोस्तृतीययोः पादयोरवसानत उपदध्यात् प्रचेतनेति पूर्वस्यां प्रचेतयेत्युत्तरस्याम्' इति आ० श्रौ० सू० ६. ३. १२. ¶ 'उत्तरास्वितरान् पादान् षष्ठान् कृत्वानुष्टुप्कारं शंसेत्' इति आ० श्रौ० सू० ६. ३. १३. ‖ आ० श्रौ० सू० ६. ३. ११.

सोममपिबद् विष्णुना सुतं यथा वशोम् । स ईं ममाद महि कर्म कर्तवे महामुरुं सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दोम् । [*]अध त्विषीमाँ अभ्योजसा क्रिविं युधा भवदा रोदसी अपृणदस्य मज्मना प्रवावृधोम् । अधत्तान्यं जठरे प्रेम रिच्यत प्रचेतन सैनं (सश्चद्देवो देवं सत्यमिन्द्रं सत्य) इन्दोम् । [‡]साकं जातः क्रतुना साकमोजसा ववक्षिथ साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणोम् । दाता राधः स्तुवते काम्यं वसु प्रचेतय सैनं (सश्चद्देवो देवं सत्यमिन्द्रं सत्य) इन्दोम् । [¶]प्रोष्वस्मै पुरोरथमिन्द्राय शूषमर्चत अभीके चिदु लोककृत् सङ्गे समत्सु वृत्रहोम् । अस्माकं बोधि चोदिता आयाहि पिब मत्स्व नभन्तामन्यकेषां ज्याका अधिधन्वसोम् । [§]त्वं सिन्धूंरवासृजोऽधराचो अहन्नहिमशत्रुरिन्द्र जज्ञिषे विश्वं पुष्यसि वार्योम् । तं त्वा परिष्वजामहे क्रतुच्छन्द ऋतं बृहत् नभन्ता(मन्यकेषां ज्याका अधिधन्व)सोम् । [+]विषु विश्वा अरातयोऽर्यो नशंत नो धियोऽस्तासि शत्रवे वधं यो न इन्द्र जिघांसतोम् । यत्ते रातिर्ददिर्वसु सुम्न आधेहि नो वसो नभन्ता(मन्यकेषां ज्याका अधि)धन्वसोम् ॥

अथ प्रोषुतृचे षष्ठांस्तौत्यष्टाक्षरपादकान् —

॥ अयं वै लोकः प्रथमा महानाम्नी ॥

अंशे वृत्तोंऽशिशब्दोऽत्र महानाम्नीति पादके ।
आदि(त्यीत्व)साम्यादायाहिपादो भूलोक ईरितः ॥

॥ अन्तरिक्षलोको द्वितीया ॥

महानाम्नीत्येव ।

मध्यत्वसाम्यात् क्रत्वादिपादः खत्वेन संस्तुतः ॥

---

[*] ऋक्सं० २. ६. २८. २. [‡] ऋक्सं० २. ६. २८. ३. [¶] ऋक्सं० ८. ७. २१. १.
[§] ऋक्सं० ८. ७. २१. २. [+] ऋक्सं० ८. ७. २१. ३.

॥ असौ लोकस्तृतीया ॥

तृतीयत्वेन तुल्यत्वात् सुम्नादेः स्वर्गसंस्तवः ॥

॥ सर्वेभ्यो वा एष लोकेभ्यः संनिर्मितो यत् षोळशी ॥

यद् यः ।
छन्दोलोकादुद्धृतोऽयं सम्पदा षोळशी खलु ॥

॥ तद्यन्महानाम्नीनामुपसर्गानुपसृजाति सर्वेभ्य एवैनं तल्लोकेभ्यः संनिर्मिमीते । सर्वेभ्यो लोकेभ्यः संनिर्मितेन षोळशिना राध्नोति य एवं वेद ॥

सः ॥

॥ [*]प्रप्रवस्त्रिष्टुभमिष[†]मर्चत प्रार्चत [‡]यो व्यतीँरफाणयदिति प्रज्ञाता अनुष्टुभः शंसति ॥

तृचास्त्रय [§]'स्तृचा आनुष्टुभा' इति हि सूत्र्यते ।
नन्वत्र नदमि(त्युक्ता[1]ष्णिक्) चतुस्सप्तकयोगतः ॥
'चतुस्सप्तकोष्णिगि'ति [$]सर्वानुक्रमणी खलु ।
द्वितीयैषा प्रप्रतृचे सानुष्टुप् कथमुच्यते ॥
चतुष्पात्त्वादनुष्टुप्त्वमस्या आरण्यके श्रुतम् ।
[¶]'नदं व ओदतीनामित्युष्णिगक्षरैर्भवत्यनुष्टुप् पादैः' इति ॥
आत्वावहादिप्रोष्वन्ताः सम्पदानुष्टुभः कृताः ।
प्रज्ञाताः प्रथिताः प्राद्याः स्वत एव ह्यनुष्टुभः ॥

---

[1] 'क्ताच' ख. ग, 'क्तश्च' घ, 'क्तं च' ङ. पाठः.

---

[*] ऋक्सं० ६. ५. ५. १. [†] ऋक्सं० ६. ५. ६. २. [‡] ऋक्सं० ६. ५. १०. ३.
[§] आ० श्रौ० सू० ६. २. ९. [$] परि ५. ८. [¶] ऐ० आ० १. ३. ८.

स्तौति —

॥ तद्यथेह चेह चापथेन चरित्वा पन्थानं पर्यवेयात्तादृक् तद्यत्
प्रज्ञाता अनुष्टुभः शंसति ॥

तत्त्राकार[*]'ऋक्पूरे'त्यपथं तु नपुंसकम् ।
इह चेह चेति चित्तव्याकुलत्वं प्रकाश्यते ॥
पर्यवेयात् कथञ्चित्तु प्राप्नुयान्मार्गमध्वगः ।
यच्चैताः शंसति तत् तादृक् तादृशमेव हि ॥

अथाविहृताधिकारिणमाह —

॥ स यो व्याप्तो गतश्रीरिव मन्येताविहृतं षोळशिनं शंसये[1]न्नेच्छन्दसां कृच्छ्रादवपद्या इति ॥

शंसेर्णिचो लिङ् । इव एव ।
यो गतश्रीस्तु मन्येत पुत्रपश्वादिभिर्वृतः ।
छन्दसां गहनात् कृच्छ्रादनुष्टुप्त्वोपपादनात् ॥
[†]नावपद्यै न हिंस्येय पदो लोटि यकीट एत् ।
गतश्रीशब्द[‡]उक्तार्थ'स्त्रयो वा' इति हि श्रुतेः ॥
संशंसयेत् षोळशिनं निर्विहार'मसाविसो'[§] ।

अथ विहृताधिकारिणमाह —

॥ अथ यः पाप्मानमपजिघांसुः स्याद्विहृतं षोळशिनं शंसयेत्[2] ॥

---

[1] 'शंसेत्' मूलमातृकापाठः. 'शंसेद् यत् नें' व्याख्यामातृकापाठः. [2] 'शंसेद्' इत्येव सर्वास्वपि मातृकासु पाठः.

---

[*] पा० सू० ५. ४. ७४. [†] 'अवपद्यै अवपत्तिमापदं प्राप्नुयाम् । तन्माभूत्' इति सायणः । [‡] Vol. I. Pages 628 & 629. 'गतश्रीरिव प्राप्तश्रीवत् समृद्धधन एव' इति सायणः । [§] ऋक्सं० १. ६. ५. १.

सः ।

$ सन्य'भ्यासाच्चे'ति कुत्वं दीर्घो'ऽज्झनगमां सनि'¶ ।
पापनाशाय विहृतेन्द्रजुषस्वादि शंसयेत् ॥

॥ व्यतिषक्त इव वै पुरुषः पाप्मना ॥

इव एव । * व्यतिषङ्गोऽभिभवः ।

॥ व्यतिषक्तमेवास्मै तत् पाप्मानं शमलमपहन्ति ॥

अस्मै अस्य । पाप्मानमिति व्याचष्टे— शमलमिति । अपहन्ति बाधते । तच्चेन विहृतेन,

॥ अप पाप्मानं हते य एवं वेद ॥

सः । अपहते अपहन्ति ॥

॥ ℂ उद्यद्ब्रध्नस्य विष्टपमित्युत्तमया परिदधाति ॥

स्तौति—

॥ स्वर्गो वै लोको ब्रध्नस्य विष्टपम् ॥

‡ ब्रध्न आदित्यः । विष्टपं स्थानम् ।

॥ स्वर्गमेव तल्लोकं यजमानं गमयति ॥

तत्तया । परिदधद्धोता ॥

$ पा० सू० ७. ३. ५५. ¶ पा० सू० ६. ४. १६. * 'व्यतिषक्त इव वै मिश्रित एव' सायणः. ℂ ऋक्सं० ६.५. ६. १. 'उद्यद्ब्रध्नस्य विष्टपमिति परिधानीया' इति आ० श्रौ० सू० ६. २. १२. ‡ तथाच तै० ब्रा०— 'असौ वा आदित्यो ब्रध्नः' इति ३. ९. ४. १.

शस्त्रयाज्यामाह—

॥ [§] अपाः पूर्वेषां हरिवः सुतानामिति यजति ॥

यजेत् । अर्थस्तु— अपाः '[*] गातिस्थे'ति सिचो लुक्, पीतवानसि । पूर्वेषां सुतानां, शसोरामौ, [‡] प्रातस्सवनगतान् सोमान्[1] । हे हरिवः हरिवन् । अथो अपिच । इदं सवनं माध्यान्दिनम् । केवलमसाधारणम् । ते तव । ममाद्धि, श्यनः श्लुः, माद्य हृष्टो भव । हे इन्द्र, [¶] सत्रा सम्यक् । वृषन् भक्तेभ्योऽभिमतस्य वर्षितः । जठरे सोमं मधुमन्तमावृषस्व । आभिमुख्येन स्थापयित्वा दर्पमनुभवेति ॥

॥ सर्वेभ्यो वा एष सवनेभ्यः संनिर्मितो यत् षोळशी तद्यदपाः पूर्वेषां हरिवः सुतानामिति यजति ॥

यद्व् यः । यजति यत् निर्मितं तत् (?) ।

कथम्,

॥ पीतवद्वै प्रातःसवनं प्रातस्सवनादेवैनं तत् संनिर्मिमीते ॥

तत्तत्र ।

॥ अथो इदं सवनं केवलं त इति माध्यंदिनं वै सवनं केवलं

---

[1] 'सोमान् हरिवन् हरिमन् अथो' घ. ङ. पाठः ।

[§] ऋक्सं० ८. ५. ७. ३. अपाः पूर्वेषां हरिवः सुतानामिति यजति' आ० श्रौ० सू० ६. २. १२. [*] पा० सू० २. ४. ७७. [‡] 'पूर्वेषां सुतानां सोमानां रसमिति शेषः' इति ऐतरेयब्राह्मणे; 'सुतानां अभिषुतानां प्रातःसवने संपादितानां कर्मणि षष्ठ्यावेते अभिषुतान् प्रातःसवनिकान् सोमानित्यर्थः' इति ऋग्भाष्ये; [¶] 'सत्रा सोमयागरूपे सत्रे' इति ऐतरेयब्राह्मणे; सत्राशब्दो भूयिष्ठवचनः हे भूयिष्ठं वर्षितरिन्द्र जठरे आवृषस्व आसिञ्चस्व' इति ऋग्भाष्ये च सायणः ।

माध्यंदिनादेवैनं तत् सवनात् संनिर्मिमीते ॥ ॥ ममद्धि सोमं मधुमन्तमिन्द्रेति मद्वद्वै तृतीयसवनं तृतीयसवनादेवैनं तत् संनिर्मिमीते । सत्रा वृषञ्जठर आ वृषस्वेति वृषण्वद्वै षोळशिनो रूपम् ॥

वृषशब्दवत् । रूपं योग्यम् ।

॥ सर्वेभ्यो वा एष सवनेभ्यः संनिर्मितो यत् षोळशी तद्यदपाः पूर्वेषां हरिवः सुतानामिति यजति ॥

यद्यस्मात् । तत्तत्र ।

॥ सर्वेभ्य एवैनं तत् सवनेभ्यः संनिर्मिमीते ॥

एनं षोळशिनम् । तत्तत्र ।

॥ सर्वेभ्यः सवनेभ्यः संनिर्मितेन षोळशिना राध्नोति य एवं वेद ॥

सः ॥

॥ महानाम्नीनां पञ्चाक्षरानुपसर्गानुपसृजत्येकादशाक्षरेषु पादेषु ॥

अपाःपूर्वादिका याज्या चतुरेकादशाक्षरा ।
अस्याः पादेषूपसृजेच्चतुःपञ्चाक्षरं जपम् ।
एवाहीतिमहानाम्नीपुरीषपदसंज्ञकम् ।
‡ ‘याज्यां जपेनोपसृजेदि’ति खल्वत्र सूत्र्यते ।

एवाह्येवापाः पूर्वेषां हरिवः सुतानाम्, एवांहीन्द्रम् अथो इदं सवनं केवलं ते, एवा हि शक्रो ममद्धि सोमं मधुमन्तमिन्द्र, वशीहि शक्रः सत्रा वृषञ्जठर आ वृषस्वेति ।

---

‡ आ० श्रौ० सू० ६. ३. १६.

एवं ह्यनुष्टुप्करणं याज्यायामपि सिध्यति ।
पञ्चाक्षरत्वं व्यूहेन भवेदप्यादितो द्वयोः ॥

॥ सर्वेभ्यो वा एष छन्दोभ्यः संनिर्मितो यत् षोळशी ॥

यद् यः ॥

॥ तद्यन्महानाम्नीनां पञ्चाक्षरानुपसर्गानुपसृजत्येकादशाक्षरेषु पादेषु सर्वेभ्य एवैनं तच्छन्दोभ्यः संनिर्मिमीते ॥

तत् तत्र ॥

॥ सर्वेभ्यः[1] छन्दोभ्यः संनिर्मितेन षोळशिना राध्नोति य एवं वेद ॥

सः ।
इति षोळशिशस्त्रं तु विहितं सम्प्रवर्णितम् ॥

चतुर्थः खण्डः

अथातिरात्रसंस्थां तु वक्तुं प्राह कथामिह—

॥ अहर्वै देवा अश्रयन्त ॥

वै पुरा ।

॥ रात्रीमसुराः ॥

---

[1] 'सर्वेभ्य एवैनं तच्छन्दोभ्यः' घ पाठः.

अश्रयन्तेत्यत्र । † 'रात्रेश्चाजसावि'ति ङीष् ।

॥ ते समावद्वीर्या एवासन्न व्यावर्तन्त ॥

एवं स्थिते,

सोऽब्रवीदिन्द्रः कश्चाहं चेमानितोऽसुरान् रात्रीमन्ववेष्याव इति ॥

अपनुद्येति शेषः ।

कश्चाहं चासुरान् रात्रेरितः समपनुद्य वै ।
रात्रीं शीघ्रं प्रवेक्ष्यावः ‡ पररूपमवे(ण?न) हि ॥

॥ स देवेषु न प्रत्यविन्दत् ॥

सहायमिति शेषः ।

कुतः,

॥ अबिभयू रात्रेस्तमसो मृत्योः ॥

इवेति शेषः ।

भीता आसन् मृत्युतुल्याद्रात्रिजात्तमसः सुराः ।

॥ तस्माद्धाप्येतर्हि नक्तं यावन्मात्रमिवैवापक्रम्य बिभेति ॥

तस्मात् तथाहि । नक्तं रात्रौ । यावन्मात्रं यत्किञ्चित् गृहादिकं प्राप्य ततोऽपक्रम्य सर्वो जनः । इवं इ[1]वेति शङ्कान्वित इत्यर्थः । एत ऐ[2] छान्दसः ।

स्पष्टयति —

---

[1] 'ए' ख. ग. घ. ङ. पाठः. [2] 'ए' क. ख. पाठः.

---

† पा० सू० ४. १. ३१. ‡ 'रात्रीमनुगतानितो रात्र्या अवेष्यावः अपसारयिष्यावः' इति सायणः ।

॥ तम इव हि रात्रिर्मृत्युरिव ॥

रा(त्रे?त्रि)स्तमः । इव एव । मृत्युरिव भयङ्करं[१] हि ।

॥ तं वै छन्दांस्येवान्ववायन् ॥

तमलब्धसहायकम् । छन्दांसि गायत्र्यादीन्येवान्वगच्छन् ।

॥ तं यच्छन्दांस्येवान्ववायंस्तस्मादिन्द्रश्चैव छन्दांसि च रात्रीं वहन्ति ॥

उपपादयति —

॥ न निविच्छस्यते न पुरोरुङ् न धाय्या नान्या देवतेन्द्रश्च ह्येव छन्दांसि च रात्रीं वहन्ति ॥

रात्रौ न सन्त्यन्यदेवनिविद्धाय्यापुरोरुचः ।
इन्द्र एव निर्वहति रात्रिं छन्दस्समन्वितः ॥

अथ,

॥ तान् वै पर्यायै रेव पर्यायमनुदन्त ॥

तानसुरान् । इन्द्रश्छन्दांसि च । अनुदन्त अद्रावयन् ।

पर्यायाख्यैः स्तोत्रशस्त्रैः प्रथमोत्तममध्यमैः ।

पर्यायं परीत्य । ल्यबर्थे णमुल् ।

॥ यत् पर्यायैः पर्यायमनुदन्त तत् पर्यायाणां पर्यायत्वम् ॥

---

[१] 'रात्रिर्मृत्युरिव । भयङ्करं' घ. ङ. पाठः.

परेरिणस्तु करणे घञि पर्यायनिर्वचः ॥

तत्र च,

॥ तान् वै प्रथमेनैव पर्यायेण पूर्वरात्रादनुदन्त ॥

चतुःस्तोत्रशस्त्रेण ।

॥ मध्यमेन मध्यरात्रात् ॥

पर्यायेणानुदन्तेत्येव ।

॥ उत्तमेनापररात्रात् ॥

पूर्ववत् । *‘अहःसर्वैकदेश—’ इत्यच् ।

॥ अपि शर्वर्या अनुस्मसीत्यब्रुवन् ॥

स्मसि स्मः । †‘इदन्तो मसिः’ ।
क(श्चि ? च्चि)दस्यास्तु शर्वर्याः पश्चादपि भवेम वै ।
इति दुष्करकारित्वादि(न्द्रश्छ ? न्द्रं छ)न्दांसि होचिरे ।
ततश्च,

॥ अपि शर्वराणि खलु वा एतानि छन्दांसीति ह स्माह ॥

कश्चिद् ब्रह्मवादी ‡ । अपि स्यामेत्युक्तेश्छन्दांस्यपिशर्वराणीत्युक्तवान् ।
अन्यथा निर्वक्तुमाह —

॥ एतानि हीन्द्रं रात्रेस्तमसो मृत्योर्बिभ्यतमत्यपारयन् ॥

---

* पा० सू० ५. ४. ८७. † पा० सू० ७. १. ४६. ‡ ‘ऐतरेयः’ इति सायणः.

रात्रीगान्मृत्युसदृशाद् ध्वान्ताद् भीतं शतक्रतुम् ।
दुःखं व्यतीत्य त्वनयन् पारं छन्दांसि........॥

॥ तदपिशर्वराणामपिशर्वरत्वम् ॥

अपिशर्वरशब्दोऽयमेवं चात्र निरुच्यताम्[1] ॥

पञ्चमः खण्डः

चतुःशस्त्रास्तु पर्यायास्त्रयो, होतुरिहादिमम्* ।
होत्रकाणामथो त्रीणीत्येवं द्वादशशस्त्रता ॥
तत्र प्रथमपर्याये होतुः शस्त्रं ब्रवीत्यथ—

॥ †पान्त मा वो अन्धस इत्यन्धस्वत्यानुष्टुभा रात्रीं प्रतिपद्यते ॥

रात्रीं रात्रिसम्बद्धाद्यपर्यायाद्यशस्त्रं पान्तमित्यनुष्टुभारभते होता । युक्तं चैतत् ।

॥ आनुष्टुभी वै रात्रिः ॥

अनुष्टुबिति वाङ्नाम रात्रिर्वाग्योगिनी खलु ।
निर्यतं श्रूयते शब्दो रात्रौ रूपं तु यत्ततः ॥

॥ एतद्रात्रिरूपम् ॥

---

[1] 'निरूप्यताम्' घ. पाठः.

---

* 'चतुःशस्त्राः पर्यायाः, होतुराद्यम्' आ० श्रौ० सू० ६. ४. ७, ८. † ऋक्सं० ६. ६. १५. १.

‡ अनुष्टुप्त्वं रात्रियोग्यमन्धस्वत्यं च किञ्च हि ।
अन्धोऽन्नं रात्रिभुक्तं तत् सुखपोषाय कल्पते ॥

॥ अन्धस्वत्यः पीतवत्यो मद्वत्यस्त्रिष्टुभो याज्या भवन्त्यभिरूपाः ॥

शस्त्रयाज्या द्वादशात्र प्रायेणैवंविधा यथा —
* 'अध्वर्यवो भरतेन्द्राय सोममामत्रेभिः सिञ्चतामध्यमन्धः ।
कामी हि वीरः सदमस्य पीतिम्'
इत्याद्या । त्रिष्टुप् च वीर्यम् ।

अन्नवीर्यपानमदयुक्ता प्रायेण वै निशा ।

॥ यद्यज्ञेऽभिरूपं तत्समृद्धम् ॥

तत्र,

॥ प्रथमेन पर्यायेण स्तुवते । प्रथमान्येव पदानि पुनराददते ॥

पुनराददते । पदं पादः । आदानमुक्तिः ।

॥ यदेवैषामश्वा गाव आसंस्तदेवैषां तेनाददते ॥

यद् ये । तत् तान् । तेन आद्यपदाभ्यासेन । एषामसुराणाम् । आदानं सङ्गः ।

॥ मध्यमेन पर्यायेण स्तुवते मध्यमान्येव पदानि पुनराददते ।
यदेवैषामनो रथा आसंस्तदेवैषां तेनाददते ॥

---

‡ गायत्र्यादीनां त्रयाणां सवनत्रयगतानामहनि प्रयुक्तत्वादनुष्टुभः प्रयोगाय रात्रिरेव कालः परिशिष्यते । तस्माद्रात्रेरनुष्टुप्सम्बद्धत्वादियमनुष्टुप् रात्रेः स्वरूपं' सायणः ॥

* ऋक्सं० २. ६. १३. १.

तेन मध्यमपदाभ्यासेन । अनः शकटम् ।

॥ उत्तमेन पर्यायेण स्तुवत उत्तमान्येव पदानि पुनराददते। यदेवैषां वासो हिरण्यं मणिरध्यात्ममासीत्तदेवैषां तेनाददते ॥

मणिः माणिक्यादि । अध्यात्मं भूषणतया शरीरगतं कटकादि । तेन तृतीयपदाभ्यासेन ।

॥ आ द्विषतो वसु दत्ते[1] ॥

य एवं वेदेत्यपकर्षः । शत्रुतो धनमादत्ते सः ।

॥ निरेनमेभ्यः सर्वेभ्यो लोकेभ्यो नुदते य एवं वेद ॥

सः । निः सम्यक् ।

अत्र स्तो(तृ ? त्र)गताभ्यासे[2] शस्त्रास्तु प्रोक्त इत्यतः ।
स्तोत्रियांश्चानुरूपांश्च कुर्वीरन् .शस्त्रिणस्तथा (?) ॥

आद्यन्तमध्यपादानामभ्यासं द्वादशस्वपि ।
गायत्रीणामनुष्टुप्त्वसिद्ध्यै होतादितस्त्विह ॥

अनुष्टुप्त्वात् पान्तमावोवर्जमभ्यस्यते यथा ।
¶ 'पुरुहूतं पुरुष्टुतं' पुरुहूतं पुरुष्टुतम् ॥

इत्यादि ।

अच्छावाको द्वादशेऽन्त्यमभ्यस्येच्चतुरक्षरम् * ।
उष्णिक्त्वेन तद्यथाहि महान् हि षो महान् हि षोम् ।

सूत्र्यते हि— † 'होतुराद्यां वर्जयित्वा प्रत्यृचमि'त्यादि ।

अत्र[3] चोदयन्तीत्याह—

---

[1] 'वसु दत्ते निरेनमेभ्यः' ख. ग. पाठः. [2] 'स' ख. ग.घ पाठः. [3] 'तत्र' घ. पाठः.

---

* 'चतुरक्षराणि त्वच्छावाकः' इति आ० श्रौ० सू० ६. ४. ६. † आ० श्रौ० सू० ६. ४. २. ¶ ऋक्सं० ६. ६. १५. १.

॥ पवमानवदहरित्याहुर्न रात्रिः पवमानवती कथमुभे पवमानवती भवतः । केन ते समावद्भाजौ भवत इति ॥

वहिर्मध्यमार्भवाख्याः पवमानास्त्रयोऽहनि ।
सन्ति, रात्रौ न ते सन्ति, पवमानसमन्वयात् ॥
कथं तुल्यत्वमनयोरुभे दिननिशे इति ।
पवमानवतीत्यादावु(दि?गि)तो ङीप्[*] मतोश्च वः ॥

औङः पूर्वसवर्णः ।

परिहरति —

॥ [‡]यदेवेन्द्राय मद्वने सुत[§]मिदं वसो सुतमन्ध[$]इदं ह्यन्वोजसा सुतमिति स्तुवन्ति च शंसन्ति च तेन रात्रिः पवमानवती तेनोभे पवमानवती भवतस्तेन ते समावद्भाजौ भवतः ॥

सुतशब्दो ह्यभिषुतः सोमवाची ततः खलु ।
सुतशब्दैस्त्रिभी रात्रेः पवमानत्रयान्वयः ॥

किञ्च,

॥ पञ्चदशस्तोत्रमहरित्याहुर्न रात्रिः पञ्चदशस्तोत्रा कथमुभे पञ्चदशस्तोत्रे भवतः केन ते समावद्भाजौ भवत इति ॥

अग्निष्टोमोक्थ्यपर्यन्तमह्न्येव क्रियते खलु ।
[¶]अर्धास्तमयकालस्थः षोळशी नैकतस्त्वभूत् ।
इति पञ्चदशस्तोत्रमहः स्यान्निशि तत् कथम् ॥

परिहरति —

---

[*] पा० सू० ४. १. ६.
[‡] ऋक्सं० ६. ६. १८. ४.
[§] ऋक्सं० ५. ७. १७. १.
[$] ऋक्सं० ३. ३. १६. ५.
[¶] 'समयाविषिते सूर्ये षोडशिनः स्तोत्रमुपाकरोति' इति तै० सं० ६. ६. ११. समयाविषिते=अर्धास्तमिते इत्यर्थः.

॥ द्वादशस्तोत्राण्यपिशर्वराणि तिसृभिर्देवताभिः संधिना राथंतरेण स्तुवते तेन रात्रिः पञ्चदशस्तोत्रा तेनोभे पञ्चदशस्तोत्रे भवत-स्तेन ते समावद्भाजौ भवतः ॥

छन्दोऽपिशर्वरं प्रोक्तं तद्योगात् स्तोत्रनाम तत् ।
अग्न्युषोदस्रदेवत्यं सन्धिषामेति वै विदुः ।
एतदाश्विनशस्त्रार्थं स्तूयते सन्धिषाम वै ।
रात्रेः पञ्चदशस्तोमसम्बन्धस्त्वेवमागतः ॥

किञ्च,

॥ परिमितं स्तुवन्त्यपरिमितमनुशंसति ॥

निःसङ्ख्यं प्रायशः शस्त्रं स्तोत्रं सङ्ख्यान्वितं सदा ।
आधिक्यं स्तोत्रसङ्ख्याया यच्छस्त्रेषु हि विद्यते ॥
तत् स्तोतुकामोऽन्यमर्थं प्रसङ्गात् प्रब्रवीति ह—

॥ परिमितं वै भूतमपरिमितं भव्यम् ॥

भूतं वस्तु परिच्छेत्तुं शक्यमागामि वस्तु न[1]।
आह स्मार्यभटाचार्यो ज्योतिःशास्त्राब्धिपारगः ।

*"काहो मनवो ढ मनुयुगश्ख गतास्ते च मनुयुगछ्ना च ।
कल्पादेर्युगपादा ग च गुरुदिवसाच्च भारतात् पूर्वम्" ॥

इति । अर्थस्तु—

कस्य ब्रह्मणः अहः दिनं काहः । मनवः ढ चतुर्दश ।
‡'कात् ङ्मौ य' इति सूत्रेण कादिसङ्ख्येह गृह्यते ॥
ब्रह्मणो दिवसो ज्ञें(या?यो)मनवस्तु चतुर्दश ।

---

[1] 'नः' ख. ग. घ. पाठः

---

* गीतिकापादे श्लो ३.　　‡ गीतिकापादे परिभाष

मनुयुगश्ख कात् ङ्मौ यो दशाधिकान्युत्तरोत्तरमिति शः सप्ततिः । ख द्वे । युगमिति कृतत्रेताद्वापरकलियुगाख्यचतुर्युगाख्या । द्वासप्ततिश्चतुर्युगाण्येको मनुरित्यर्थः । गतास्ते मनवः च षट् । कल्पादेरारभ्य षण्मनवोऽतीताः । सप्तमेऽपि मनौ मनुयुगछना च । मनौ युगानां छना च सप्तविंशतिश्चतुर्युगाण्यतीतानि । चोऽनर्थकः । अष्टाविंशतितमस्य चतुर्युगस्य युगपादा ग च गता इत्येव । ग त्रयः । चेति गतानुकर्षणार्थः । कृतत्रेताद्वापराख्यास्त्रयो युगपादा गताः । एतच्च गुरुदिवसाद् बृहस्पतिवारोपलक्षिताद् भारताद् भारतैः पाण्डवैः सम्ब(न्धा?द्धा)त् । ल्यब्लोपे पञ्चमी । गुरुदिवसमभिव्याप्य । इतः शुक्रवारात् पूर्वम्[1] ।

शुक्रवारदिनादीह जातं कलियुगं त्विदम्* ।
चतुर्युगाणां सहस्रं साष्टकं ब्रह्मणो दिनम् ॥

इति ज्योतिश्शास्त्र[2] सिद्धान्त इति । अतोऽत्र,

॥ अपरिमितस्यावरुध्या इत्यतिशंसति स्तोत्रम् ॥

अपरिच्छिन्नलाभाय स्तोत्रमत्रातिशस्यते ।

॥ अति वै प्रजात्मानम् ॥

इष्यत† इति शेषः ।

अतिक्रम्यैकमात्मानं प्रजा बह्वीः सदेष्यते ।
$'दशास्यां पुत्रानाधेहि पति'मित्यभ्यगीष्महि ॥

॥ अति पशवः ॥

---

[1] 'पूर्वमिति क. ख. ग. पाठः. [2] शाखे ख. पाठः.

---

* 'राज्यं चरतां युधिष्ठिरादीनामन्त्यो गुरुदिवसो द्वापरावसानगत इत्यर्थः । तस्मिन् दिने युधिष्ठिरादयो राज्यमुत्सृज्य महाप्रस्थानं गता इति प्रसिद्धिः' इत्यार्यभटीयव्याख्या पारमेश्वरी. † 'लोके ह्यात्मानमतिलङ्घ्य प्रजानां चावस्थितत्वात्' इति सायणः. $ ऋक्सं० ८. ३. २७. ५.

गोगजाश्वाश्च महिषा एकेनेष्यन्त एव हि ॥

आत्मानमित्येव । इष्यन्त इति शेषः ।

॥ तद्यत् स्तोत्रमतिशंसति यदेवास्यात्यात्मानं तदेवास्यै तेनावरुन्धेऽवरुन्धे ॥

तत् तत्र । यदेकमात्मानमतिक्रम्य बहुपुत्रपौत्रन(प्त्रा?प्तृ)दौ (मि?हि) ऋादि लब्धुमिष्यते तत् सर्वं तेन स्तोत्रसङ्ख्याधिकशस्त्रसङ्ख्यान्वयेन[1] अवरुन्धे प्राप्नोति । *द्विरुक्तिरुक्तार्था ॥

षष्ठः खण्डः ।

इति[2] षड्गुरुशिष्यविरचितायां महिदासैतरेयब्राह्मणवृत्तौ
सुखप्रदायां षोडशोऽध्यायः ॥

* * *

अथ सप्तदशोऽध्यायः ।

विधायैवं तु पर्यायान् द्वादशैवातिरात्रके ।
विधातुमाश्विनं शस्त्रमितिहासं ब्रवीति ह[3] —

॥ प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत् सूर्यां सावित्रीम् ॥

---

[1] ‘स्तोत्रसंख्यान्वयेन’ घ. पाठः. [2] ‘इति ब्राह्मणवृत्तौ सुख’ क. ख. ग. घ. पाठः. [3] ‘ब्रवीत्यथ’ ग. घ. पाठः.

* Vol. I Page 44.

वै पुरा। सावित्रीम् । सवितुर्दुहितरं सूर्यां नाम ।

नक्षत्रौषधिराजाय चन्द्रायामृतरूपिणे ।
अन्तर्णीतण्यर्थको दाण् यच्छादेशः शपीह लङ् ॥

आदिकर्मणि प्र ।

दानारम्भं कारितवान् विवाहे तत् प्रजापतिः ।
कारयत्येष कार्याणि सूर्यादीनां सदा यतः ॥

अत्रान्तरे,

॥ तस्यै सर्वे देवा वरा आगच्छन् ॥

तस्यै तां लब्धुम्[1]। सर्वे अग्न्याद्या वराः कृतविवाहवेषाः । प्रजापतिश्च तदा,

॥ तस्या एतत् सहस्रं वहतुमन्वाकरोत् ॥

*कन्या(या) (दे?दि)त्सितो द्रव्यराशिस्तु (वहतुः) स्मृतः ।

किं तत्,

॥ यदेतदाश्विनमित्याचक्षते ॥

ब्रह्मवादिनः।

सहस्रसङ्ख्याश्विने हीत्येतत् सम्यग् ब्रवीत्यथ—

॥ अनाश्विनं हैव तद् यदर्वाक् सहस्रम् ॥

---

[1] 'लब्धुम् अग्न्याद्याः' घ. पाठः.

---

* 'वहनस्य विवाहस्यालङ्कारार्थं माङ्गल्यार्थं च वरस्य पुरतो वहनीयो हरिद्रागुडादिमङ्गलद्रव्यसङ्घो वहतुः' इति सायणः.

अर्वाक् ऊनम् । यद् यदि ।

सहस्रत्वं यदि न्यूनं नैतत् खल्वाश्विनं भवेत् ॥

॥ तस्माच्चत् सहस्रं वैव शंसेद् भूयो वा ॥

भूयो बहुतरम् । तच्च,

॥ प्राश्य घृतं शंसेत् ॥

[¶] 'अग्निरज्वी'तिषड्ढोमपरिशिष्टं तु यद् घृतम् ।
[*] पीत्वानाचम्य तच्छंसेच्छस्त्रमाश्विनमञ्जसा ।
[†] 'संस्थितेष्वाश्विने'त्यादि सूत्रस्यार्थोऽत्र गृह्यताम् ॥

स्तौति—

॥ यथा ह वा इदमनो वा रथो वाक्तो वर्तेते एवं हैवाक्तो वर्तते ॥

[‡] इदं ङ्यर्थे सु, अस्मिन् लोके । अनः शकटम् । अक्ताक्षो रथो वा ।
आज्यसंरक्तकण्ठ(त्वाच्छं?स्तु शं)सन् वर्तेत (ये?यत्) सुखम् ।

किञ्च,

॥ शकुनिरिवोत्पतिष्यन्नाह्वयीत ॥

शोंसावोमित्युक्तिकाले पतिष्यन् खगवद् भवेत् ।
आह्वयेदिति तु प्राप्ते छन्दस्त्वादाह्वयीत वै ।
[§] 'सूत्रे समस्तजङ्घे'ति त्वस्य लक्षणमिष्यताम् ॥

[¶] आ० श्रौ० सू० ६. ५. २. [*] 'प्राश्याज्यशेषमप उपस्पृशेन्नाचामेत्' आ० श्रौ० सू० ६. ५. ३. [†] आ० श्रौ० सू० ६. ५. १. [‡] 'यथा लोके किञ्चिदिदं निदर्शनं बहुध' इति सायणः । [§] आ०श्रौ० सू० ६. ४. ४.

॥ तस्मिन् देवा न समजानत ॥

तस्मिन्नृचां सहस्रे तु वहतुत्वेन रूपिते ॥

संज्ञानं संप्रतिपत्तिः ।

वैघट्यमाह—

॥ ममेदस्तु ममेदमस्त्विति ॥

अथ,

॥ ते संजानाना अब्रुवन् ॥

सम्प्रतिपत्तिं कुर्वन्तः[१] । कथम् ,

॥ आजिमस्यायाम है स यो न उज्जेष्यति तस्येदं भविष्यतीति[२] ॥

अस्य आश्विनस्य (घृ?कृ)ते । आजिं लक्षभुवम्$ । *आयाम लोट्, आगच्छाम ।

है इत्येष निपातः स्यादन्योन्याह्वानसूचकः ।

नः अस्माकं मध्ये य उज्जेष्यति । उज्जयः पूर्वगमनम् । तस्येदमाश्विनं भविष्यति ।

सोमाय दीयतां सूर्या मा वान्यस्मै सुराय वा ।
अस्माकं वहतौ श्रद्धा सहस्रे तस्य चोज्जयः ॥
उपायभूतस्तं कृत्वा वयं लप्स्यामहे खलु ।
इति ते समयं कृत्वोज्जयरूपं प्रचक्रिरे ॥

---

[१] ‘न्तः। आजि’ घ. पाठः. [२] ति। अथ अस्य’ ख. पाठः.

$ समयबन्धपुरस्सरा धावनरूपा गतिराजिः इति सायणः । * ‘आयामहै प्राप्नवाम’ इति समस्तं पदमाह सायणः ।

इत्याह—

॥ तेऽग्नेरेवाधि गृहपतेरादित्यं काष्ठामकुर्वत ॥

अधि आरभ्य । काष्ठाम् अन्तभुवम् ।
अग्निमादौ गृहपतिं स्पृष्ट्वा सूर्यं तथा ततः ।
स्पृशतस्तूज्जयो हि स्यादिति ते समयं विदुः ॥
यत् स्थानं गार्हपत्याख्यं तत् स्पृष्ट्वा खे स्पृशन् रविम् ।
मध्ये शीघ्रगतिः पूर्वं यस्तस्येदं भवेदिति ॥

॥ तस्मादाग्नेयी प्रातिपद् भवत्याश्विनस्य ॥

प्रतिपत् प्रथमा [*]सम्पदादित्वात् करणे क्विपि ।
सा च,

॥ [†]अग्निर्होता गृहपतिः स राजेति ॥

पच्छ एषा शंसनीया प्रथमात्वात् त्रिरेव च ।
'प्रतिपदेकपातिनी पच्छ' इत्यत्र सूत्र्यते[‡] ॥

मतान्तरमाह—

॥ तद्धैक आहुरग्निं[§] मन्ये पितरमग्निमापिमित्येतया प्रतिपद्येत । दिवि शुक्रं यजतं सूर्यस्येति प्रथमयैव ऋचा काष्ठामाप्नोतीति ॥

तत्तत्र । एकेऽन्ये । 'मुख्यान्यकेवलेष्वेकः' इति [$] निघण्टुः । अयमर्थलाभः दिवि शुक्रं यजतं सूर्यस्येति श्रुतेः आदित्यप्राप्तिरत्रेति हेतुं वदन्तः ।

॥ तत्तन्नादृत्यम् ॥

---

[*] पा० वा० ३. ३. १४. [†] ऋक्सं० ४. ५. १९. ३. [‡] शा० श्रौ० सू० ६. ५. ६. [§] ऋक्सं० ७. ६. २. ६. [$] वैजयन्त्यां द्व्यक्षरकाण्डे अर्थवद्धिकाध्याये श्लो० ६.

कुतः,

॥ य एनं तत्र ब्रूयादग्निमग्निमिति वै प्रत्यपाद्यग्निमापत्स्यतीति शश्वत् तथा स्यात् ॥

*‘चिण् ते पदः’ । तस्य लुक् ।

इदंवदन्तं होतारं यदि कश्चिद्वदेदिदम्—
अत्राग्निशब्दाश्चत्वारस्त्रिरुक्तौ द्वादशैव हि ॥
अतो द्वादशमा(स्वाऽस्य)ग्नौ प्रवेशं प्राप्स्यति ह्ययम् ।
इति यद्वैमनस्योक्तं तत् खल्वस्य भवेदपि ॥

॥ तस्मादग्निर्होता गृहपतिः स राजेत्येतयैव प्रतिपद्येत ॥

अयं दोषोऽस्यां सत्यप्यग्निशब्दे नास्तीत्याह[1]—

॥ गृहपतिवती प्रजातिमती शान्ता सर्वायुः ॥

जनिमेति जन्मार्थत्वात् प्रजातिमती । स राजेत्युक्तः शान्ता सर्वदुःखशमनी ।

॥ सर्वायुत्वाय सर्वमायुरेति य एवं वेद ॥

सः ।

प्रथमः खण्डः ।

---

[1] ‘नास्तीत्यत आह’ ख. पाठः.

* पा० सू० ३.१.६०.

अथाजिगमने देवा यच्चक्रुस्तद् ब्रवीति[1] ह—

॥ तासां वै देवतानामाजिं धावन्तीनामभिसृष्टानामग्निर्मुखं प्रथमः प्रत्यपद्यत ॥

आजिम्[2] अभि लक्षभुवं प्रति। धावन्तीनां शीघ्रं गच्छन्तीनाम्[3] । सृष्टानां सन्नद्धानाम्* । सर्ग उत्साहः । प्रथमः प्रधानभूतः । मुखं पूर्वम् ।

॥ तमश्विनावन्वागच्छताम् ॥

तमग्निमनु पश्चात् । अश्विनावगच्छताम् ।

॥ तमब्रूताम् ॥

कथम् ,

॥ अपोदिह्यावां वा इदं जेष्याव इति ॥

उत् शीघ्रम् । अप इहि अपगच्छ । आवां हीदं जेष्यावः ।

॥ स तथेत्यब्रवीत् । तस्य वै ममेहाप्यस्त्विति ॥

इह शस्त्रे अपि किञ्चित् । एवं चेत् ,

॥ तथेत्यब्रवीत् । तथेति तस्मा अप्यत्राकुरुताम् ॥

समवदताम् ।

॥ तस्मादाग्नेयमाश्विने शस्यते ॥

सप्तच्छन्दोयुक्तं प्रातरनुवाकवत् । सूत्र्यते हि‡ 'प्रातरनुवाकन्यायेन'

---

[1] 'ब्रवीमि' घ. पाठः. [2] 'आजिं युद्धमभि' [3] 'गच्छन्तीनां सन्नद्धानां' घ. पाठः.

---

* 'अभिसृष्टा अभितः प्रवृत्ता' सायणः । ‡ आ० श्रौ० सू० ६. ५. ८.

इत्यादि ।

॥ ता उषसमन्वागच्छतां तामब्रूतामपोदिह्यावां वा इदं जेष्याव इति सा तथेत्यब्रवीत् तस्यै वै ममेहाप्यस्त्विति तथेति तस्या अप्यत्राकुरुतां तस्मादुषस्यमाश्विने शस्यते ॥

॥ ताविन्द्रमन्वागच्छताम् । तमब्रूतामावां वा इदं मघवन् जेष्याव इति ॥

किन्तु,

॥ न ह तं दधृषतुरपोदिहीति वक्तुम् ॥

[*]‘शकधृष—’इति तुमुन् ।

अपोदिहीति वचने धृष्टौ ना(म?)भवतां तु तौ ।

॥ स तथेत्यब्रवीत् । तस्य वै ममेहाप्यस्त्विति तथेति तस्मा अप्यत्राकुरुताम् । तस्मादैन्द्रमाश्विने शस्यते ॥

[§]‘इन्द्रक्रतुं न आभर’ [¶]‘अभित्वा शूरे’त्यादि ।

॥ तदश्विना उदजयताम् ॥

[$]तत् तेन प्रकारेण ।

॥ अश्विनावश्नुवाताम् ॥

अन्वभवताम् ।

---

[*]. पा० सू० ३. ४. ६४. [§] ऋक्सं० ५. ३. २१. ६. [¶] ऋकसं० ५. ३. २१. २.

[$] ‘तत् तस्यामाजौ’ इति सायणः ।

॥ यदश्विना उदजयतामश्विनावाश्नुवातां तस्मादेतदाश्विनमित्याचक्षते ॥

एतत् शस्त्रम् ।

॥ अश्नुते यद्यत् कामयते य एवं वेद ॥

स वेदिता यथादिष्टं तत्तदाप्नोत्यसं(गत्र ? शय)म् ॥

॥ तदाहुः ॥

चोद्यस्वरूपमाह—

॥ यच्छस्यत आग्नेयं शस्यत उषस्यं शस्यत ऐन्द्रमथ कस्मादेतदाश्विनमित्याचक्षत इति ॥

यद् यदि । अथ तथासति ॥

परिहरति—

॥ अश्विनौ हि तदुदजयतामाश्विनावाश्नुवाताम् । यदश्विना उदजयतामश्विनावाश्नुवातां तस्मादेतदाश्विनमित्याचक्षते । अश्नुते यद्यत् कामयते य एवं वेद ॥

सः ।

अश्विभ्यां विजितत्वेन शस्त्रं सर्वमिहाश्विनम् ॥

द्वितीयः खण्डः ।

अथाजिगमने वह्नेरुषसश्च शतक्रतोः ।
अश्विनोश्च वाहनानि सम्यगेव ब्रवीति ह—

॥ अश्वतरीरथेनाग्निराजिमधावत् ॥

अश्वायां गर्दभाज्जाता *ष्टरजश्वात् †षितश्च[1] ङीष् ।
तद्युक्तस्यन्दनेनाग्निरगच्छल्लक्षभूमिकाम् ॥

॥ तासां प्राजमानो योनिमकूलयत् ॥

‡अजमानः अजन् गच्छन् ।
(कृकुश्च ? कूल) दाहे चुरादेर्लङ् तासां योनिं स दग्धवान् ।

॥ तस्मात्ता न विजायन्ते ॥

तस्मात् प्रदग्धयोनित्वाद् गर्भं गृह्णन्ति ता न तु ॥

॥ गोभिररुणैरुषा आजिमधावत् ॥

युक्तेन रथेनेति शेषः ।
रक्तवर्णैर्बलीवर्दैः संयुक्तेन[2] रथेन वै ।
उषास्तु देवी सन्नद्धान्वगच्छल्लक्षभूमिकाम् ॥

॥ तस्मादुषस्यागतायामरुणमिवैव प्रभाति ॥

---

[1] 'षितस्तु ङीष्' क. ख. ग. पाठः. [2] 'सुयुक्तेन' क. घ. पाठः.

---

* पा० सू० ५. ३. ९१. † पा० सू० ४. १. ४१. ‡ 'प्राजमानः प्रकर्षेणाश्वतरीः प्रेरयन्. अज पशुप्रेरणे इति धातुजन्योऽयं शब्दः' इति सायणः. गतिक्षेपणयोरित्येवार्थनिर्देशो दृश्यते मुद्रितकौमुद्यादिषु.

आगतिरुदयः । इवैव । एवं हीत्यर्थः ।
प्रातः प्रा(च्यो॑च्यां) रक्तवर्णमाकाशं हि प्रकाशते ।

॥ उषसो रूपम् ॥

॥ अश्वरथेनेन्द्र आजिमधावत् तस्मात् स उच्चैर्घोष उपब्दिमान्
क्षत्रस्य रूपमैन्द्रो हि सः ॥

[*] स शब्दो हीन्द्रसम्बन्धी [‡] शाब्दिको हि शतक्रतुः ।
'तामिन्द्रो मध्यतोऽवे'ति [§] यजुर्वेदे ह्यधीयते ।
इन्द्रस्य राज्ञो योग्यो वा यो ह्यश्वरथजो ध्वनिः ।

॥ गर्दभरथेनाश्विना उदजयताम् ॥

गर्दभस्यन्दनेनाजिमश्विनौ समगच्छताम् ।

॥ अश्विनावाश्नुवातां यदश्विना उदजयतामश्विनावाश्नुवातां तस्मात् स सृतजवो दुग्धदोहः सर्वेषामेतर्हि वाहनानामनाशिष्ठः ॥

स गर्दभः । सृतजवः गतवेगः । दुग्धदोहः गतसारः । एतर्हि अस्मिन्नपि काले । वाहनानां गजादीनां मध्ये । अनाशिष्ठः अतिशयेनाल्पभक्षी [¶] ।

---

[*] 'लोकेऽप्यश्वयुक्तो रथ उच्चैर्घोषो बहुलध्वनिर्दृश्यते । तथा क्षत्रस्य रूपमुपब्दिमान् शब्दोपेतं दृश्यते। यदा क्षत्रियो निर्गच्छति तदीया याष्टिका अन्ये सेवका अश्वपुरतः शब्दं कुर्वन्त एव गच्छन्ति। स शब्द ऐन्द्रो हि असुरयुद्धेषु तद्भीत्यर्थमिन्द्रेण कृतत्वादैन्द्रत्वम्' इति सायणः । [‡] तथाच महाभाष्यम्– 'एवं हि श्रूयते– बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच' इति १. १. १. [§] तै० सं० ६. ४. ७. ३. [¶] 'अनाशिष्ठः अत्यन्तवेगरहितः' सायणः ।

अ(श्वोऽश्वा)तेरिष्ठनि तृचो लोप आङ् नु(वऽड)चीति च ।
(स) शीघ्रगन्ताशिष्ठश्चेदशीघ्रो[1] मन्दगाम्यसौ ॥

॥ रेतसस्त्वस्य वीर्यं नाहरताम् ॥

न त्वनाशयतां वीर्यं गर्दभस्यास्य रेतसः ।

॥ तस्मात् स द्विरेता वाजी ॥

स द्विरेताय रेतो...¶

तदाहुः सप्त सौर्याणि छन्दांसि शंसेद्यथैवाग्नेयं यथोषस्यं यथाश्विनं सप्त वै देवलोकाः सर्वेषु देवलोकेषु राध्नोतीति । तत्तन्नादृत्यं, त्रीण्येव शंसेत् त्रयो वा इमे त्रिवृतो लोका एषामेव लोकानामभिजित्यै ।

तदाहुरुदु त्यं‖ जातवेदसमिति सौर्याणि प्रतिपद्येतेति । तत्तन्नादृत्यं, यथैवं गत्वा काष्ठामपराध्नुयात् तादृक्तत् ।

†सूर्यो नो दिवस्पात्वित्येतेनैव प्रतिपद्येत यथैव गत्वा काष्ठामभिपद्येत तादृक्तत् ।

---

[1]: 'शुष्टंश्चेदशीघ्रो' ख. ग. पाठः.

¶ इत उत्तरं 'एतेन वै संवत्सरम्' (अ० १७. ख० ६) इत्येतावत्पर्यन्तस्य भागस्य व्याख्या मातृकासु न दृश्यते । ‖ ऋक्सं० १. ४. ७. १. † ऋक्सं० ८. ८. १६. १.

उदुत्यं जातवेदसमिति द्वितीयं शंसति ।

[§]चित्रं देवानामुदगादनीकमिति त्रैष्टुभमसौ वाव चित्रं देवानामुदेति तस्मादेतच्छंसति ।

[*]नमो मित्रस्य वरुणस्य चक्षस इति जागतं तद्वाशीःपदमाशिषमेवैतेनाशास्त आत्मने च यजमानाय च ॥

तृतीयः खण्डः

तदाहुः सूर्यो नातिशस्यो बृहती नातिशस्या यत्सूर्यमतिशंसेद् ब्रह्मवर्चसमतिपद्येत यद् बृहतीमातिशंसेत् प्राणानतिपद्येतेति ।

[¶]इन्द्र क्रतुं न आभरेत्यैन्द्रं प्रगाथं शंसति । शिक्षा णो अस्मिन् पुरुहूत यामनि जीवा ज्योतिरशीमहीति । असौ वा ज्योतिस्तेन सूर्यं नातिशंसति । यदु बार्हतः प्रगाथस्तेन बृहतीं नातिशंसति ।

[‡]अभि त्वा शूर नोनुम इति राथन्तरीं योनिं शंसति । राथंतरेण वै सन्धिनाश्विनाय स्तुवते तद्यद्राथंतरीं योनिं शंसति रथंतरस्यैव सयोनित्वाय । ईशानमस्य जगतः स्वर्दृशमि-

---

[§] ऋक्सं० १. ८. ७. १. [*] ऋक्सं० ७. ८. १२. १. [¶] ऋक्सं० ५. ३. २१. ६. [‡] ऋक्सं० ५. ३. २१. २.

त्यसौ वाव स्वर्दृक्तेन सूर्यं नातिशंसति । यदु बार्हतः प्रगाथस्तेन बृहतीं नातिशंसति ।

*बहवः सूरचक्षस इति मैत्रावरुणं प्रगाथं शंसति । अहर्वै मित्रो रात्रिर्वरुण उभे वा एषोऽहोरात्रे आरभते योऽतिरात्रमुपैति । तद्यन्मैत्रावरुणं प्रगाथं शंसत्यहोरात्रयोरेवैनं तत् प्रतिष्ठापयति । सूरचक्षस इति तेन सूर्यं नातिशंसति । यदु बार्हतः प्रगाथस्तेन बृहतीं नातिशंसति ।

‡मही द्यौः पृथिवी च नस्ते¶ हि द्यावापृथिवी विश्वशंभुवेति द्यावापृथिवीये शंसति । द्यावापृथिवी वै प्रतिष्ठे इयमेवेह प्रतिष्ठासावमुत्र तद्यद् द्यावापृथिवीये शंसति प्रतिष्ठयोरेवैनं तत् प्रतिष्ठापयति । देवो देवी धर्मणा सूर्यः शुचिरिति तेन सूर्यं नातिशंसति । यदु गायत्री च जगती च ते द्वे बृहत्यौ तेन बृहतीं नातिशंसति ॥

§विश्वस्य देवी मृचयस्य जन्मनो न या रोषाति न ग्रभदिति द्विपदां शंसति ॥

चितैधमुक्थमिति ह स्म वा एतदाचक्षते यदेतदाश्विनं निर्ऋतिर्ह स्म पाशिन्युपास्ते यदैव होता परिधास्यत्यथ पाशान्

---

* ऋक्सं० ५. ५. ९. १. ‡ ऋक्सं० १. २. ६. ३. ¶ ऋक्सं० २. ३. ३. १. § आ० श्रौ० सू० ६. ५. १८.

प्रतिमोक्ष्यामीति ततो वा एतां बृहस्पतिर्द्विपदामपश्यन्न या रोषाति न ग्रभदिति तया निर्ऋत्याः पाशिन्या अधराचः पाशानपास्यत् ।

तद्यदेतां द्विपदां होता शंसति निर्ऋत्या एव तत्पाशिन्या अधराचः पाशानपास्यति स्वस्त्येव होतोन्मुच्यते सर्वायुः सर्वायुत्वाय सर्वमायुरेति य एवं वेद ।

मृचयस्य जन्मन इत्यसौ वाव मर्चयतीव तेन सूर्यं नातिशंसति ।

यदु द्विपदा पुरुषच्छन्दसं सा सर्वाणि छन्दांस्यभ्याप्ता तेन बृहतीं नातिशंसति ॥

चतुर्थः खण्डः

ब्राह्मणस्पत्यया परिदधाति ब्रह्म वै बृहस्पतिर्ब्रह्मण्येवैनं तदन्ततः प्रतिष्ठापयति ॥

*एवा पित्रे विश्वदेवाय वृष्ण इत्येतया परिदध्यात् प्रजाकामः पशुकामः । बृहस्पते सुप्रजा वीरवन्त इति प्रजया वै सुप्रजा वीरवान् । वयं स्याम पतयो रयीणामिति । प्रजावान् पशुमान् रयिमान् वीरवान् भवति यत्रैवं विद्वानेतया परिदधाति ॥

---

* ऋक्सं० ३. ७. २७ १.

[*]बृहस्पते अति यदर्यो अर्हादित्येतया परिदध्यात्तेजस्कामो ब्रह्मवर्चसकामोऽतीव वान्यान् ब्रह्मवर्चसमर्हति ।

द्युमदिति द्युमदिव वै ब्रह्मवर्चसं विभातीति वीव वै ब्रह्मवर्चसं भाति । यद्दीदयच्छवस ऋतप्रजातेति दीदायेव वै ब्रह्मवर्चसम् । तदस्मासु द्रविणं धेहि चित्रमिति चित्रमिव वै ब्रह्मवर्चसम् । ब्रह्मवर्चसी ब्रह्मयशसी भवति यत्रैवं विद्वानेतया परिदधाति । तस्मादेवं विद्वानेतया परिदध्यात् ।

ब्राह्मणस्पत्या तेन सूर्यं नातिशंसति ।

यदु त्रिष्टुभं त्रिः शंसति सा सर्वाणि च्छन्दांस्यभ्याप्ता तेन बृहतीं नातिशंसति ।

गायत्र्या च त्रिष्टुभा च वषट्कुर्यात् ।

ब्रह्म वै गायत्री वीर्यं त्रिष्टुब्ब्रह्मणैव तद्वीर्यं संदधाति ।

ब्रह्मवर्चसी ब्रह्मयशसी वीर्यवान् भवति यत्रैवं विद्वान् गायत्र्या च त्रिष्टुभा च वषट्करोति ।

[†]अश्विना वायुना युवं सुदक्षोभा[‡] पिबतमश्विनेति ।

गायत्र्या च विराजा च वषट्कुर्यात् ब्रह्म वै गायत्र्यन्नं

---

[*] ऋक्सं० २. ६. ३१. ५. [†] ऋक्सं० ३. ४. ४. २. [‡] ऋक्सं० १. ३. ३५. ५.

विराड् ब्रह्मणैव तदन्नाद्यं संदधाति ।

ब्रह्मवर्चसी ब्रह्मयशसी भवति ब्रह्माद्यमन्नमत्ति यत्रैवं विद्वान् गायत्र्या च विराजा च वषट्करोति ।

तस्मादेवं विद्वान् गायत्र्या चैव विराजा च वषट्कुर्यात् [*]प्र वामन्धांसि मद्यान्यस्थु[$]रुभा पिबतमश्विनेत्येताभ्याम् ॥

पञ्चमः खण्डः ।

॥ चतुर्विंशमेतदहरुपयन्त्यारम्भणीयम् ॥

आरम्भणीयत्वं निराह —

॥ एतेन वै संवत्सरमारभन्ते ॥

संवत्सरेत्यब्दसाध्यं गवामयनमुच्यते ।

॥ एतेन स्तोमांश्च छन्दांसि च ॥

आरभन्त इत्येव ।

॥ एतेन सर्वा देवताः ॥

---

[*] ऋक्सं० ५. ५. १४. २. [$] ऋक्सं० १. ३. ३५. ५.

पूर्ववत् ॥

स्तौति —

॥ अनारब्धं वै तच्छन्दोऽनारब्धा सा देवता यदेतस्मिन्नहनि नारभन्ते तदारम्भणीयस्यारम्भणीयत्वम् ॥

यच्छन्दोदैवताद्यत्र दिने तद्ध्येव वै कृतम् ।
आरम्भणीयशब्दस्य प्रवृत्तेर्हेतुरेव हि ॥

चतुर्विंशतिनामाथ निर्ब्रुवन् प्रब्रवीति ह—

॥ चतुर्विंशस्तोमो भवति ॥

अत्र स्तोमश्चतुर्विंशत्यावृत्तिसहितो भवेत्* ।

॥ तच्चतुर्विंशस्य चतुर्विंशत्वम् ॥

चतुर्विंशतेरावृत्तौ । डे ‡ 'ति विंशतेर्डिति' (इति तिलोपः) ।

॥ चतुर्विंशतिर्वा अर्धमासा अर्धमासश एव तत्संवत्सरमारभन्ते ॥

तत्तेषु सर्वस्तोमेषु चतुर्विंशतिकर्मणा ।
संवत्सरं चारभन्ते गवामयनसंज्ञकम् ॥

संस्थामाह —

॥ उक्थ्यो भवति पशवो वा उक्थानि ॥

---

* तत्प्रकारश्चेत्थं छन्दोगैराम्नातः— 'अष्टाभ्यो हिंकरोति—स तिसृभिः स चतसृभिः स एकया । अष्टाभ्यो हिंकरोति– स एकया स तिसृभिः स चतसृभिः । अष्टाभ्यो हिंकरोति– स चतसृभिः स एकया स तिसृभिः' ता० ब्रा० ३-८-१. इति । ‡ पा० सू० ६. ४. १४२.

‘पशुकाम उक्थ्यं गृह्णीयाद्’ (इति) श्रुतेः,

॥ पशूनामवरुद्ध्यै ॥

प्राप्तये (श ? स) स्यात् ॥

॥ तस्य पञ्चदश स्तोत्राणि भवन्ति ॥

तस्य उक्थसंज्ञस्य ॥

॥ पञ्चदश शस्त्राणि ॥

तस्येत्येव ॥

॥ स मासः ॥

स सङ्घातो मा(स)तुल्यस्त्रिंशत्सं(ख्यो ? ख्या)समन्वया(त्) । (स मास ?) ।

॥ मासश एव तत्संवत्सरमारभन्ते ॥

तत्ते सत्रिणः ॥

॥ तस्य षष्टिश्च त्रीणि च शतानि स्तोत्रियाः ॥

स्तोत्राच्छः ।

कथं सषष्टित्रिशतं स्तोत्रिया शेते तु (?) ।
चतुर्विंशत्यावृत्तियुक्तस्तोत्राणि दश पञ्च च ॥
दशभिः पञ्चदशकैः पञ्चाशत्सहितं शतम्
पुनश्चैवं, पञ्चदशचतुष्कैष्षष्टिरेव हि ॥

ततः किम् ।

॥ तावन्ति संवत्सरस्याहानि अहश्श एव तत् संवत्सरमारभन्ते ॥

अस्यै(व) संस्थान्तरमाह —

॥ अग्निष्टोम एतदहः स्यादित्याहुः ॥

केचिद् ब्रह्मवादिनः ॥

स्तौति —

॥ अग्निष्टोमो वै संवत्सरः ॥

अग्निष्टोमो(वे ? प)दिष्टाङ्गैः क्रियते सत्रमित्यतः ।

तदाह—

॥ न वा एतदन्योऽग्निष्टोमादहर्दाधार न विव्याचेति ॥

अतस्तच्चतुर्विंश* अग्निष्टोमाख्य(काः ? कात्) क्रतोरन्यो धारयितुं तथा ।

॥ स यद्यग्निष्टोमः स्यादष्टाचत्वारिंशास्त्रयः पवमानाः स्युश्चतुर्विंशानीतराणि स्तोत्राणि ॥

यदीत्यसंशये । (शक्रो यदि भक्तः प्रियः ? स यद्यग्निष्टोमो) भवेद् अष्टाचत्वारिंशास्त्रय(कः ?)स्तत्र पवमानाः स्युः ।

(अष्टाचत्वारिंश)सङ्ख्याः स्युस्त्रयः पवमानकाः ।
स्तोत्राणि तु नवान्यानि चतुर्विंशतिकानि वै ॥

---

* इह कियांश्चिदंशो लुप्त इव.

पुनः स्तौति—

॥ तदु षष्टिश्चैव त्रीणि च शतानि स्तोत्रियाः ॥

तत्त्र अपि पवमानके चतुश्चत्वारिंशतान्वयात् ।
नवेतरचतुर्विंशसषोडशशतद्वयात् ।
अग्निष्टोमे स्तोत्रियाः स्युः षष्टियुक्तं शतत्रयम् ॥

॥ तावन्ति संवत्सरस्याहानि अहश्श एव तत् संवत्सरमारभन्ते । उक्थ्य एव स्यात् ॥

एवे(ती?ति) वार्थः । सूत्र्यते हि* 'अहरुक्थ्यो वा' इति ॥

उक्थ्यान्तरा(न्) स्तौति—

॥ पशुसमृद्धो यज्ञः ॥

पशुभिर्घृतधुग्घर्म(सु?धु)गाद्यैः पूरितः क्रतुः ।

॥ पशुसमृद्धं सत्रम् ॥

इदमपि ।

॥ सर्वाणि चतुर्विंशानि स्तोत्राणि ॥

पञ्चदशापि ।

॥ प्रत्यक्षाद्ध्येतदहश्चतुर्विंशम् ॥

---

* आ० श्रौ० सू० ७. ४. १४, १५.

प्रत्यक्षेण ॥

॥ तस्मादुक्थ्य एव स्यात् ॥

ङेऽर्थे ङसि । चतुर्विंशतीनां प्रवृत्तिनिमित्तपौष्कल्यार्थम् ॥

षष्ठः खण्डः ।

अस्य च

॥ बृहद्रथन्तरे सामनी भवतः ॥

बृहद्रथन्तरे पृष्ठे स्याताम(त्रापि कल्पकः?त्र विकल्पिते) । स्मर्यते हि* 'बृहत् पृष्ठं रथन्तरं वा' इति ।

स्तौति—

॥ एते वै यज्ञस्य नावौ संपारिण्यौ यद् बृहद्रथन्तरे ॥

यद् ये । संपारिण्यौ गवामयना(ख्ये?ख्य)महार्णवस्य पारावारप्राप्तिहेतुभूते यथा समुद्रस्य नावौ । (वा?)

॥ ताभ्यामेव तत् संवत्सरं तरन्ति ॥

तत्तत्र । ताभ्यां बृहद्रथन्तराभ्यां विकल्पिताभ्याम् ॥

स्तौति—

आ० श्रौ० सू० ७. ३. ९, १०

॥ पादौ वै बृहद्रथन्तरे शिर एतदहः ॥

ततश्च,

॥ पादाभ्यामेव तच्छ्रियं शिरोऽभ्यायन्ति ॥

तत्तत्र ।' श्रयन्ते(ध्यि?ह्य)त्र च(क्ष?क्षु)रादयः इति (धिमश्री भवति-?) श्रिञोऽधिकरणेऽसुनि वर्णव्यत्ययः । अभि सम्य(व?)गायन्ति प्राप्नुवन्ति ॥

किञ्च,

॥ पक्षौ वै बृहद्रथंतरे शिर एतदहः पक्षाभ्यामेव तच्छ्रियं शिरोऽभ्यायुवते ॥

यौतिस्संश्लेषार्थः । यद्वस्यात् तु वद्र (?) ।

॥ ते उभे न समवसृज्ये ॥

सं सह । (तं?सं) सृजेः (सा?सहा)र्थाद्* §'ऋदुपधाच्च—' इति क्यप् ।
ते उभे सामनी नैव सह का(र्ये?र्ये) इतीर्यते ।
विकल्पेनैव कर्तव्ये सहत्वं निन्दति त्व(र्थः?थ)—

॥ य उभे समवसृजेयुर्यथैव छिन्ना नौर्बन्धनात्तीरं तीरमृच्छन्ती प्लवेत एवमेव ते सत्रिणस्तीरं तीरमृच्छन्तः प्लवेरन् य उभे समवसृजेयुः ॥

नौः काचिद् बन्ध(न)च्छिन्ना जलौघस्यानुसारतः ।

---

* परित्यागार्थमाह सायणः— 'न समवसृज्ये न परित्याज्ये एकस्याप्यननुष्ठानमुभयपरित्यागः' इति । § पा० सू० ३. १. ११०.

प्रतीर(मप्लुवतैव?माप्लुवेतैवं) प्लुवेरंस्ते च सत्रिणः ॥
य उभे सह कुर्युर्वै पुनरुक्तिरिहादरात् ।
द्वयोस्त्यक्तस्य पृष्ठस्य यो (न?नि)शंसनमुच्यते—

॥ तद्यदि रथंतरमवसृजेयुर्बृहतैवोभेऽनवसृष्टे ॥

केवलोक्तिरवसर्गः। बृहता योनिशंसनद्वारप्रविष्टेन अनवसृष्टे सहोक्ते ।

॥ अथ यदि बृहदवसृजेयू रथन्तरेणैवोभे अनवसृष्टे ॥

पूर्ववत् ।

अथ वैरूपवैराजशाक्वराणां तथैव च ।
रैवतस्य च योनीस्तु शंसेदिति विधीयते—

॥ यद्वै रथन्तरं तद्वैरूपं यद् बृहत्तद्वैराजं यद्रथन्तरं तच्छाक्वरं यद् बृहत्तद्रैवतम् एवमेते उभे अनवसृष्टे भवतः ॥

सूच्यते हि*— 'तयोर(श्वा?क्रि)यमाणस्य योनिं शंसेद् वैरूपवैराजशाक्वररैवतानां च' इति ।

स्तौति —

॥ ये वा एवं विद्वांस एतदहरुपयन्ति आप्त्वा वै ते अहश्शः संवत्सरमाप्त्वार्धमासश आप्त्वा मासश आप्त्वा स्तोमांश्च छन्दांसि चाप्त्वा सर्वा देवतास्तप एव तप्यमानाः सोमपीथं भक्षयन्तः संवत्सरमभिषुण्वन्त आसते ॥

---

* आ० श्रौ० सू० ७. ३. ११, १२

[*]'नियमेषु तपःशब्दः' । पीथं पिबतेः कर्मणि (क्षन्?थक्)[†], पेयम् अभिषु(णः ति?ण्वन्तः) अभिषवं कुर्वाणाः ।

गवामयनसत्रे तु पक्षसी द्वे तयोरिह ।
आद्ये पक्षस्यानुलोम्यं प्रातिलोम्यं त(थोच्यते?थे)तरे ॥

कर्तव्यं षडहादीनामित्यर्थं प्रब्रवीत्यथ —

॥ ये वा अत ऊर्ध्वं संवत्सरमुपयन्ति गुरुं वै ते भारमभिनिदधते
सं वै गुरुर्भारः शृणाति ॥

विषुवानत इत्युक्तः पक्षसोर्मध्यतः स्थितः ।
ऊर्ध्वमुत्तरषण्मासा ह्वार्थे वै तु पूर्वसः (?) ॥
शॄ हिंसायां घट थि नि (?)(अप्त्वान्दी?आप्त्वादी)नां ह्रस्व ए(व च) ।
ये पूर्वे पक्षसीवोर्ध्वमुत्तरे त्वानुलोम्यतः ॥
कर्माणि त्वनुतिष्ठन्ति ते महद् भारमात्मनि ।
स्थापयन्ति संभृ(णो?णा)ति गुरुर्भारो हिन(स्ती?स्ति) हि ॥

इत्यानुलोम्यं सन्निन्द्य प्रातिलोम्यं प्रशंसति—

॥ अथ य एनं परस्तात् कर्मभिराप्त्वावस्तादुपैति स वै
स्वस्ति संवत्सरस्य पारमश्नुते ॥

यस्सत्रिगणः एनं पूर्वं परस्तादानुलोम्येन आप्त्वा प्राप्य उत्तरपक्षं अवस्तात् प्रातिलोम्येन उपैति अनुतिष्ठति स गवामयनस्य पारं

---

[*] अनुवादोऽयम् आपस्तम्बधर्मसूत्रस्य (१.५.१)

[†] 'पातृतुदिवचिरिचिसिचिभ्यस्थक्' इति सूत्रेण (उ० २.७)

स्वस्ति अविनष्टं यथा तथाऽश्नुते प्राप्नोति ॥

सप्तमः खण्डः ।

चतुर्विंशं द्वितीयं तु गवामयनकं दिनम् ।
महाव्रतमुपा(मन्त्यं ? न्त्यं) च स्तौति ते अहनी अथ—

॥ यद्वै चतुर्विंशं तन्महाव्रतम् ॥

उपाद्योपान्त्यवर्तित्वात्ते उभे अहनी समे ।
'प्रायणीयचतुर्विंशे उपेते'त्यादि सूत्र्यते* ॥
'व्रतोदयनीयाभ्यां सप्तमः पूर्यत'† इति च ।
किञ्च,

॥ बृहद्दिवेनात्र होता रेतस्सिञ्चति ॥

अत्र चतुर्विंशे । त दिनानव चतुरहष्टत्वात् (?) बृहद्दिवः । तदिमवाथर्वणो बृहद्दिवः' इति हि सर्वानुक्रमणी‡ ।
निष्केवल्ये तद्धि शंसन् होता रेतस्तु सिञ्चति ।
सत्रिणां जन्मने सत्रिफलभागित्वसिद्धयः (?) ।

॥ तद्दो महाव्रतीयेनाह्ना प्रजनयति ॥

---

* आ० श्रौ० सू० ११. ७. २. † आ० श्रौ० सू० ११. ७. १२. ‡ म० १० सू० १२०.

स्वार्थे छः । ङ्यर्थे टाद्वयम्, मासात्रेतेऽ(नि) । प्रजा(पी?)तिः उदराग्निर्गमः । (यश्चैतत् ?) ।

॥ संवत्सरे संवत्सरे वै रेतस्सिक्तं जायते तस्मात् समानं बृहद्दिवो
निष्केवल्यं भवति ॥

तस्मात् तस्मै तदर्थम् ।

निष्केवल्यं द्वयोस्तुल्यं तद्दिवासन्नवर्चकम् ।
पूर्वे पक्षस्यानुलोम्यं प्रातिलोम्यं तथोत्तरे ॥

कार्यं यथोक्तं वृष्ट्यादेरनूचन्(?) प्रब्रवीत्यथ—

॥ एष हवा एनं परस्तात् कर्मभिराप्त्वावस्तादुपैति य एवं
विद्वानेतदहरुपैति ॥

एतच्चतुर्विंशमहः । यस्मात्रिगणः । एनं गवामयनम् ।
किञ्च,

॥ स्वस्ति संवत्सरस्य पारमश्नुते य एवं वेद ॥

अथ सत्रा(द्य)न्त्यादिने प्रायणीयोदयनाख्यके ।
अतिरात्रसंज्ञके च संस्तुवन् प्रब्रवीति ह—

॥ यो वै संवत्सस्यावारं च पारं च वेद स वै स्वस्ति संवत्सरस्य
पारमश्नुते ॥

अवारमवाक्तीरं स्याद् पारं च परतीरकम् ।
आद्यान्त्ये अहनी सत्रमहाब्धेस्तीरसन्निभे ॥

॥ अतिरात्रो वा अस्य प्रायणीयोऽवारम् ॥

अस्य सत्रस्य । 'अयमेवैकाहोऽतिरात्र आदौ प्रायणीयः । एषोऽन्त्य उदयनीयः' इति हि सूत्र्यते* ।

॥ उदयनीयः पारम् ॥

अतिरात्र इत्येव ।

॥ स्वस्ति संवत्सरस्य पारमश्नुते य एवं वेद ॥

सः ।

॥ यो वै संवत्सरस्यावरोधनं चोद्बोधनं च वेद स वै स्वस्ति संवत्सरस्य पारमश्नुते ॥

अंश[1] आद्योऽवरोधः स्यादुद्बोधोऽन्त्योंऽश इतीरितः ।
ल्युड् रुधेः करणे (कान्त्या)दिसूचका(उद्बु)दवौ मतौ ।

॥ अतिरात्रो वा अस्य प्रायणीयोऽवरोधनमुदयनीय उद्बोधनं स्वस्ति संवत्सरस्य पारमश्नुते य एवं वेद । यो वै संवत्सरस्य प्राणोदानौ वेद स वै स्वस्ति संवत्सरस्य पारमश्नुते ॥

॥ अतिरात्रो वा अस्य प्रायणीयः प्राण उदान उदयनीयः ॥

---

[1] 'आद्य अंशोऽव' घ. ङ. पाठः

* आ० श्रौ० सू० ११. १. २, ३.

प्रशब्दोच्छब्दवत्त्वेन प्राणोदानत्ववर्णनम् ।

॥ स्वस्ति संवत्सरस्य पारमश्नुते य एवं वेद य एवं वेद ॥

सः ।

आद्यान्त्ये अहनी त्रिवृत्थमतिरात्रान्तके स्तुते ।
द्विरुक्तिरुक्तार्था[*] ।

अष्टमः खण्डः ।

इति षड्गुरुशिष्यविरचितायां महिदासैतरेयब्राह्मणवृत्तौ
सुखप्रदायां सप्तदशोऽध्यायः

अथाष्टादशोऽध्यायः ।

गवामयनमारब्धं सत्रं संवत्सरात्मकम् ।
प्रायणीयचतुर्विंशे तत्र द्वे अहनी गते ॥
अथ मासान् पञ्च वक्तुमादौ चतुरभिप्लवान् ।
पृष्ठ्यान्तान् षळहं चाभिप्लाविकं सम्ब्रवीति ह—

॥ ज्योतिर्गौरायुरिति स्तोमेभिर्यन्ति[§] ॥

---

[*] Vol. I. Page 44.

[§] तथाच तै० सं०— 'ज्योतिष्टोमं प्रथममुपयन्त्यस्मिन्नेव तेन लोके प्रतितिष्ठन्ति गोष्टोमं द्वितीयमुपयन्त्यन्तरिक्ष एव तेन प्रतितिष्ठन्ति आयुष्टोमं तृतीयमुपयन्त्यमुष्मिन्नेव लोके प्रतितिष्ठन्ति' इति ७. ४. ११.

इतिराद्यर्थः । स्तोमेभिः स्तोमैः स्तोमशब्दान्तैः ।

ज्योतिष्टोमोऽथ गोष्टोम आयुष्टोमेति होचिरे ।
केचिदन्ये स्तुत्य इति स्तोमः कर्माणि मनू ष्टुभः ॥
अभिप्लवाद्य[१]त्र्यहोऽयं स्वरसामेति संज्ञितः ॥

सूत्र्यते हि†— 'अभिप्लवत्र्यहः पूर्वः स्वरसामानः' इति । यन्ति सत्रिणः ।

स्तौति—

॥ अयं वै लोको ज्योतिरन्तरिक्षं गौरसौ लोक आयुः ॥

त्रित्वात् क्रमवत्त्वाच्च । किञ्च,

॥ स एवैष उत्तरस्त्र्यहः ॥

एभिरेवारब्धत्वात् । कथम्,

॥ ज्योतिर्गौरायुरिति त्रीण्यहानि गौरायुर्ज्योतिरिति त्रीणि ॥

षळहोऽभिप्लवस्त्वेष व्यत्यस्तत्र्यहवान् क्रतुः ।
ज्योतिर्गौरायुरित्येवं गौरायुर्ज्योतिरेव च ॥

अत्र च,

॥ अयं वै लोको ज्योतिरसौ लोको ज्योतिः ॥

---

[१] 'स्त्र्य' घ. ङ. पाठः

† आ० श्रौ० सू० ८. ६. १०.

ज्योतिराद्यं ज्योतिरन्त्यमहः स्यात् षळहस्य वै ।
आदित्वसाम्याद् भूलोको द्यौरप्यन्त्यत्वसाम्यतः ॥

॥ ते एते ज्योतिषी उभयतः संलोकेते ॥

तस आताम् । सं सह । णिचो लुक् । लोकयतः । ते उभे अन्योन्यं वीक्षेते । एवं च

॥ तेनैतेनोभयतोज्योतिषा षळहेन यन्ति ॥

उभयत आदावन्ते च ज्योतिर्यस्य तेन ।

स्तौति—

॥ तद्यदेतेनोभयतोज्योतिषा षळहेन यन्त्यनयोरेव तल्लोकयोरुभयतः
प्रतितिष्ठन्तो यन्त्यस्मिंश्च लोकेऽमुष्मिंश्चोभयोः ॥

तत् तत्र । यन्ति कुर्वन्ति यत् प्रतितिष्ठन्तो यन्ति अनुभवन्ति तत् । उभयत इत्यस्य विवरणम्— अनयोः इति अस्मिंश्चेत्यादि ।

पुनः स्तौति—

॥ परियद्वा एतद् देवचक्रं यदभिप्लवः षळहः ॥

परि सर्वतः । यत् (पृच्छः ? गच्छत् ।) इणो यण् । शतृ । देवनिर्मितं चक्रम् । वै इव । यद् यः । आद्यन्ततुल्यत्वात् । कथम्,

॥ तस्य यावभितोऽग्निष्टोमौ तौ प्रधी ॥

तस्य[1] अभिप्लवषळहस्य प्रधी चक्रधारे ।

॥ ये चत्वारो मध्य उक्थ्यास्तन्नभ्यम् ॥

*उगवादियता नभ्यं तत्र †नाभि(र्नि पञ्च ? नभं च) हि ।
समर्पितं तु यन्नाभौ तन्नभ्यं स्यादरादिकम् ।
सूत्र्यते हि§ — 'तस्याग्निष्टोमावभित उक्थ्या मध्ये' इति ।

॥ गच्छति वै वर्तमानेन यत्र कामयते तत् स्वस्ति संवत्सरस्य पारमश्नुते य एवं वेद ॥

तत् तत्र ।
वेदिता वर्तमानेन चक्रेणैतेन गच्छति ।
यत्र कामयते गन्तुं तत्र चैवाश्नुते सुखम् ॥
मासानां षळहैः क्लृप्तिं पञ्चभिः प्रब्रवीत्यथ—

॥ यो वै तद्वेद यत्प्रथमः षळहः स वै स्वस्ति संवत्सरस्य पारमश्नुते ॥

यः । तत् तत्र ।
वेदिता षळहं ज्ञात्वा सत्रान्तं चाश्नुते सुखम् ।

॥ यस्तद् वेद यद् द्वितीयः ॥

स वै स्वस्ति संवत्सरस्य पारमश्नुत इत्येव । यत् यः द्वितीयः षळहः तद् तम् ।

---

१. 'तस्य प्रधी' घ. ङ. पाठः

---

* पा० सू० ५. १. २. † ग० स०. § आ० श्रौ० सू० ७. ७. १०.

॥ यस्तद्वेद यत्तृतीयः ॥

पूर्ववत् ।

॥ यस्तद्वेद यच्चतुर्थः ॥

पूर्ववत् ।

॥ यस्तद्वेद यत् पञ्चमः ॥

पूर्ववत् ॥

प्रथमः खण्डः ।

अथ पञ्चापि षळहांस्तौति मासस्य पूरकान्—

॥ प्रथमं षळहमुपयन्ति ॥

तत्र,

॥ षळहानि भवन्ति ॥

ततः किम्,

॥ षड् वा ऋतव ऋतुश एव तत् संवत्सरमाप्नुवन्ति ॥

तत् ते सत्रिणः । व्याचष्टे—

॥ ऋतुशः संवत्सरे प्रतितिष्ठन्तो यन्ति ॥

॥ द्वितीयं षळहमुपयन्ति द्वादशाहानि भवन्ति ॥

पूर्वेण षळहेन सह ।

॥ द्वादश वै मासा मासश एव तत् संवत्सरमाप्नुवन्ति मासशः संवत्सरे प्रतितिष्ठन्तो यन्ति ॥

॥ तृतीयं षळहमुपयन्त्यष्टादशाहानि भवन्ति ॥

पूर्वाभ्यां सह ।

॥ तानि द्वेधा ॥

पश्येद् इति शेषः । तत्र,

॥ नवान्यानि नवान्यानि ॥

नवकद्वयरूपा हि सङ्ख्या त्वष्टादशात्मिका ।
ततः किं,

॥ नव वै प्राणाः ॥

नाभेरूर्ध्वं नव प्राणा द्वौ स्तन्यौ सप्त मूर्धनि ।

॥ नव स्वर्गा लोकाः ॥

पृथिव्यां नववर्षायां भारतात् कर्मभूमितः ।
अन्येष्वष्टसु वर्षेषु स्वर्गत्वं फलभूत्वतः ॥
साक्षात्स्वर्गेण सह ते नवस्व(र्गा१र्गा) इति श्रुताः ॥

॥ प्राणांश्चैव तत्स्वर्गांश्च लोकानाप्नुवन्ति प्राणेषु चैव तत्स्वर्गेषु च लोकेषु प्रतितिष्ठन्तो यन्ति ॥

॥ चतुर्थं षळहमुपयन्ति ॥

तत्र,

॥ चतुर्विंशतिरहानि भवन्ति ॥

पूर्वैस्त्रिभिः सह ।

॥ चतुर्विंशतिर्वा अर्धमासा अर्धमासश एव तत्संवत्सरमाप्नुवन्ति अर्धमासशः संवत्सरे प्रतितिष्ठन्तो यन्ति ॥

॥ पञ्चमं षळहमुपयन्ति ॥

तत्र,

॥ त्रिंशदहानि भवन्ति ॥

पूर्वैश्चतुर्भिः सह ।

॥ त्रिंशदक्षरा वै विराट् ॥

'दशकास्त्रयो विराट्' इति हि सर्वानुक्रमणी* ।

॥ विराळन्नाद्यम् ॥

उक्तार्थम्‡ ।

---

* परि० ६. ७. ‡ Vol. I. Page 37

॥ विराजमेव तन्मासि मास्यभिसम्पादयन्तो यन्ति ॥

तत् तत्र । आर्जनमभिसम्पादनम् ।

॥ अन्नाद्यकामाः खलु वै सत्रमासत ॥

लटो लङ्, आसते । 'ऋद्धिकामाः सत्रमासीरन्' इति श्रुतेः ।

॥ तद्यद्विराजं मासि मास्यभिसम्पादयन्तो यन्त्यन्नाद्यमेव तन्मासि मास्यमवरुन्धाना यन्त्यस्मै च लोकायामुष्मै चोभाभ्याम् ॥

सप्तम्यर्थे चतुर्थ्यः । अवरुन्धानाः सम्यक् फलं लभमानाः । तत् तत्र । अस्मिन् लोके अमुष्मिन् इत्युभयोः ।

द्वितीयः खण्डः ।

॥ गवामयनेन यन्ति ॥

सत्रिणः ।

॥ गावो वा आदित्याः ॥

वै यथा । अपरे तु सत्रिणः,

॥ आदित्यानामेव तदयनेन यन्ति ॥

एव इव । तत् तेन गवामयनेन । गवाम[1]यनतुल्येन आदित्यानामयनेन केचिद्यन्ति इत्यर्थः । सूत्र्यते हि[*]— 'गवामयनेनादित्यानामयनं व्याख्यातम्' इति ।

अथ गवामयने[2] कथामाह—

॥ गावो वै सत्रमासत शफान् शृङ्गाणि सिषासन्त्यः ॥

लब्धुमिच्छन्त्यः ।

सनो 'जनसने'[†]त्यात्वं 'सनोतेरन'[‡] इत्यतः ।
षत्वे द्वित्वे ङीपि चेत्वे शतुर्जसि न नुं कृतः ।

॥ तासां दशमे मासि शफाः शृङ्गाण्यजायन्त ॥

शृङ्गाण्यासां शफाश्चैव दशमे मासि चोद्गताः ॥

॥ ता अब्रुवन् ॥

उद्भूतशफशृङ्गास्तु ता गाव इदमब्रुवन् ।

कथं,

॥ यस्मै कामायादीक्षामह्यापाम तमुत्तिष्ठामेति ॥

दीक्षरा(पे:) (स्थेरीस्थ)श्च लङ् लुङ् लोण्महिङ् च मसाट् सलु(क्) ।
लब्धशृङ्गशफास्तस्मादुत्थास्यामो द्रुतं त्विति ॥

---

[1] 'यनेन तु' घ. ङ. पाठः. [2] 'न' च. पाठः

---

[*] आ० श्रौ० सू० १२. १. १. [†] पा० सू० ६. ४. ४२. पा० सू० ८. ३. १०८.

॥ ता या उदतिष्ठंस्ता एताः शृङ्गिण्यः ॥

ताः,* आमो जस्, तासां मध्ये । याः शृङ्गवत्यः ता उदतिष्ठन् ।

॥ अथ याः समापयिष्यामः संवत्सरमित्यासत तासामश्रद्धया शृङ्गाणि प्रावर्तन्त ॥

†अश्रद्धया उपेक्षया । न्यर्थे प्रशब्दः न्यवर्तन्त ।

॥ ता एतास्तूपराः ॥

अद्यापि । भग्नशृङ्गस्तूपरः ।

॥ ऊर्जं त्वसुन्वन् ॥

कुर्वत्य इति शेषः । §ऊर्जं बलकरमन्नं कुर्वत्यः असुन्वन् अभिषवं कृतवत्यः ।

॥ तस्मादु ताः सर्वानृतून् प्राप्तोत्तर[1]मुत्तिष्ठन्ति ॥

तस्मात् किञ्च । उ खलु । ताः भग्नशृङ्गा गावः । प्राप्य उत्तरमिति प्राप्ते प्राप्तोत्तरमिति छान्दसम् । उत्तिष्ठन्ति । लङो लट् । उदतिष्ठन् ।

॥ ऊर्जं ह्यसुन्वन् ॥

भोक्तुमिति शेषः । हि खलु ।

---

[1] 'प्राप्त्वोत्तरम्' इति मुद्रितपाठः; मूलमातृकापाठश्च.

---

* 'ताः प्रसिद्धा गावः', † 'तासां गवां शृङ्गेष्वश्रद्धया शृङ्गाणि न प्रावर्तन्त नोत्पन्नानीत्यर्थः', § ऊर्जं बलाधिक्यमसुन्वन् सम्पादितवत्यः' इति सायणः.

अन्नं बलकरं भोक्तुमभ्यपुष्णंस्तदा खलु ।

॥ सर्वस्य वै गावः प्रेमाणम् ॥

गता इत्युत्कर्षः । प्रेमा स्नेहः तं गताः ।

प्रियस्येमनिचि प्रे तु प्रेमा पुंलिङ्ग एव च ।

किञ्च,

॥ सर्वस्य चारुतां गताः ॥

चारु शुभम् ।

॥ सर्वस्य प्रेमाणं सर्वस्य चारुतां गच्छति य एवं वेद ॥

सः ।

वेदिता शोभनो भूत्वा सर्वैः स्नेहेन सेव्यते ।
आदित्यानामङ्गिरसामयने द्वे ब्रवीत्यथ—

॥ आदित्याश्च ह वा अङ्गिरसश्च स्वर्गे लोकेऽस्पर्धन्त वयं पूर्वे एष्यामो वयमिति ते हादित्याः पूर्वे स्वर्गं लोकं जग्मुः ॥

अङ्गिरोभ्यः पूर्वम् ।

॥ पश्चेवाङ्गिरसः षष्ट्यां वा वर्षेषु ॥

पश्च पश्चात् । इव एव । वा पुनः । वर्षाणां षष्ट्यां गतायाम् इत्यर्थः ।

अथ आदित्यानामयनस्याहःक्लृप्तिमाह—

॥ यथा वा प्रायणीयोऽतिरात्रश्चतुर्विंश उक्थ्यः सर्वेऽभिप्लवाः षळहा आक्ष्यन्त्यन्यान्यहानि तदादित्यानामयनम् ॥

तत् तत्र । आदित्यानामयनमुच्यते । यथा वा तद्यथा इत्यर्थः । प्रायणीयोऽतिरात्रान्तश्चतुर्विंश उक्थ्यान्तः । षळहास्तु सर्वेऽभिप्लवाः । अन्यान्यहान्याक्ष्यत्संज्ञानि । *'अभिजिद्-विषुवद्-विश्वजिन्महाव्रतोदयनीयदशमान्याक्ष्यन्ति' इति बौधायनः । 'पृष्ठ्याभिप्लववर्जं सर्वमहराक्ष्यत्' इति शालीकिः । दशमपृष्ठ्याभिप्लवेभ्योऽन्यत् सर्वमाक्ष्यत्' इति औपमन्यवः ।

अथाङ्गिरसामयनमाह—

॥ प्रायणीयोऽतिरात्रश्चतुर्विंश उक्थ्यः सर्वे पृष्ठ्याः षळहा आक्ष्यन्त्यन्यान्यहानि तदङ्गिरसामयनम् ॥

पूर्ववत् । अत्र षळहाः सर्वे पृष्ठ्या इति विशेषः ।

पृष्ठ्याभिप्लवषळहौ स्तौति—

॥ सा यथा स्रुतिरञ्जसाय[1]न्येवमभिप्लवः षळहः स्वर्गस्य लोकस्य ॥

इणः करणे ल्युटो ङीप् । ‡स्रुतिः सङ्कुचितमार्गः । अञ्जसा झटिति ।

॥ अथ यथा महापथः परियाण[2] एवं पृष्ठ्यः षळहः स्वर्गस्य लोकस्य ॥

---

१. 'यि', २. पर्याण' ग. पाठः

---

* 'अभिजिद्विषुवान्विश्वजिद्दशममहर्महाव्रतमुदयनीयातिरात्र इत्येतान्याक्ष्यन्ति भवन्ति' इति सायणीयपाठः. ‡ 'स्रुती राजमार्गरूपा, अञ्जसा सम्यक्' इति सायणः.

महापथो राजमार्गः । परियांतेः करणे ल्युट् । सर्वतो गमनसाधनभूतः ।

॥ तद्यदुभाभ्यां यन्त्युभाभ्यां वै यन्न रिष्यत्युभयोः कामयोरुपाप्त्यै
यश्चाभिप्लवे षळहे यश्च पृष्ठ्ये ॥

षळहाभ्यामुभाभ्यां (यद्) यन्ति वै सत्रिणस्तु तत् ।
षळहद्वयकामाप्त्यै स्यात्कामोऽत्र हि वै फलम् ॥
गच्छन्त्युभाभ्यां यन्ति[1] न रिष्यते न हि हिंस्यते(?) ।
इति प्रसङ्गादत्रोक्ते(त्या ? ह्या)दित्याङ्गिरसायने ।

तृतीयः खण्डः ।

गवामयनमित्युक्तं पक्षाणां मासरूपकम्[2] ।
मध्येऽत्र पक्षसोः कार्यो विषुवानथ कथ्यते—

॥ एकविंशमेतदहरुपयन्ति विषुवन्तं मध्ये संवत्सरस्य ॥

आब्दिकस्य गवामयनस्य मध्ये पक्षसोरेकविंशत्यात्रिवितसर्वस्तोत्रं विषुवन्नामकं क्रतुं यन्ति कुर्युः सत्रिणः । सूत्र्यते हि*— 'अथ विषुवानेकविंशो न पूर्वस्य पक्षसो नोत्तरस्य' इति ।

---

[1] 'न्ति स्वरि' ग. च., 'न्ति सचरि' घ. ङ. पाठः. [2] 'रूपतः' ङ. पाठः.

* आ० श्रौ० सू० ११. ७. ७, ८.

पुंलिङ्गं कर्मणो नाम त्वहश्चापि नपुंसकम् ।

स्तौति—

॥ *एतेन वै देवा एकविंशेनादित्यं स्वर्गाय लोकायोदयच्छन् ॥

एतेन विषुवन्नाम्ना स्वर्गं द्योतयितुं सुराः ।
उपसान्तु, (१) कर्मबलात् सूर्यं खे समयोजयन् ॥

॥ स एष इत एकविंशः ॥

स विषुवान् इतः पृष्ठ्यात् षळहात् । तमारभ्यैकविंशः । एकविंशतेः पूरणः । कथम्,

॥ तस्य दशावस्तादहानि दिवाकीर्त्यस्य भवन्ति दश परस्तान्मध्य एष एकविंशः ॥

दिवैव कीर्तनीयस्य मन्त्रब्राह्मणसूत्रकस्य विषुवतः अवस्तादधः दशाहानि पृष्ठ्यः षळहोऽभिजित्स्वरसामानस्त्रय इति । तथा परस्तादूर्ध्वं दशाहानि स्वरसामानस्त्रयो विश्वजित् पृष्ठ्यः षळह इति । सूत्र्यते हि† — 'पृष्ठ्यमभिजितं स्वरसाम्न' इति 'स्वरसाम्नो विश्वजितं पृष्ठ्यम्' इति च ।

॥ उभयतो विराजि प्रतिष्ठितः ॥

'न्त्व' ग. पाठः.

---

* 'एकविंश एष भवति । एतेन वै देवा एकविंशेनादित्यमित उत्तमं स्वर्गं लोकमारोहयन्' इति तै० ब्रा० १. २. ४.

† आ० श्रौ० सू० ११. ७. ४, ११.

एष इत्येव ।

अन्ने विराजि दशके प्रागूर्ध्वं च स्थिते सति ।
मध्ये ह्येषोऽत्र विषुवानतः सूर्य इव स्वयम् ॥

इत्याह—

॥ उभयतो हि वा एष विराजि प्रतिष्ठितः ॥

त्रिंशत्सङ्ख्यान्वितो मासो विराट् तन्मध्यवर्त्यसौ ।
सर्वसङ्क्रान्तिकालेषु तन्मध्ये चैव वर्तते ॥

॥ तस्मादेषोऽन्तरेमान् लोकान् यन्न व्यथते ॥

तस्मात् तथाहि । इमान् अन्तरा एषां मध्ये यन् गच्छन् न व्यथते न चलति ।

अथ स्वरसामत्र्यहं स्तोतुमाह--

॥ तस्य वै देवा आदित्यस्य स्वर्गाल्लोकादवपातादबिभयुः ॥

अवपातोऽधःपतनम् । ततः,

॥ तं त्रिभिः स्वर्गैर्लोकैरवस्तात् प्रत्युत्तभ्नुवन् ॥

उत्तम्भनमुत्त(मष्ट ?)म्भः । लङ्यट् न । *'उदः स्थ' इति तकारः । तम् आदित्यम् । स्वर्गैः, लुप्तोपमं स्वर्गसमैः सुखदैः स्वरसामभिः । तदाह --

॥ स्तोमा वै त्रयः स्वर्गा लोकाः ॥

---

*पा० सू० ८. ४. ६१.

*स्तोमाः स्तोमान्ता ये ज्योतिष्टोमगोष्टोमायुष्टोमाः ते स्वर्गवत् सुखप्रदाः ।

किञ्च,

॥ तस्य पराचोऽतिपातादबिभयुः ॥

देवा इत्येव । इदं देशमतीत्य पराङ्मुखस्य पतनाच्च‡ भीता अभवन् ।

॥ तं त्रिभिः स्वर्गैर्लोकैः परस्तात्प्रत्यस्तभ्नुवन् ॥

प्रतिकूलमवष्टम्भं कृतवन्तः[1] । त्रिभिः स्वरसामभिः ।

॥ स्तोमा वै त्रयः स्वर्गा लोकाः ॥

पूर्ववत् ।

॥ त(त्) त्रयोऽवस्तात् सप्तदशा भवन्ति ॥

त(त्) त्रयोऽवस्तात् अथ त्रयः स्वरसामानः ते सप्तदशावृत्तिकस्तोमा भवन्ति । तथा

॥ त्रयः परस्तात् ॥

सप्तदशा भवन्तीत्येव ।

॥ मध्य एष एकविंश उभयतः स्वरसामभिर्धृतः ॥

---

[1] 'न्तः स्व' घ. ङ. पाठः.

---

* 'सप्तदशस्तोमयुक्ताः स्वरसामानोऽहर्विशेषाः स्तोमशब्देनात्र विवक्षिताः',
‡ अतिपातो दृष्टिगोचरं स्थानमुल्लङ्घ्य यत्र क्वापि दूरदेशगमनम्' इति सायणः.

स्थिरीकृतः ।

॥ उभयतो हि वा एष स्वरसामभिर्धृतः ॥

यजुषि हि मन्त्रो भवति। *'ऋग्भिः पूर्वाह्णे दिवि देव ईयते। यजुर्वेदे तिष्ठति मध्येऽह्नः। सामवेदेना[1]स्त[2]मये महीयते। वेदैरशून्यस्त्रिभिरेति सूर्यः' इति। अत्र वेदो मन्त्रः। 'ईङ् गतौ' दिवादिः। 'महीङ् वृद्धौ'† कण्ड्वादिः।

॥ तस्मादेषोऽन्तरेमान् लोकान् यन्न व्यथते ॥

उक्तार्थम् § ।

॥ तस्य वै देवा आदित्यस्य स्वर्गाल्लोकादवपातादबिभयुः। तं
परमैः स्वर्गैर्लोकैरवस्तात् प्रत्युत्तभ्नुवन् ॥

परमैः उत्कृष्टैः ।

॥ स्तोमा वै परमाः स्वर्गा लोकाः ॥

पूर्ववत् ।

॥ तस्य पराचोऽतिपातादबिभयुः। तं परमैः स्वर्गैर्लोकैः परस्तात् प्रत्यस्तभ्नुवन्। स्तोमा वै परमा स्वर्गा लोकाः। त(त्) त्रयोऽवस्तात् सप्तदशा भवन्ति ॥

---

[1] 'हा' ङ. पाठः. [2] 'स्तमिते म' ग. घ. ङ. पाठः.

---

*. तै० ब्रा० ३. १२. ९. † 'पूजायाम्' इत्यर्थनिर्देशः कौमुद्यादिषु. § Vol. II. Page 75.

पूर्ववत् ।

॥ त्रयः परस्तात् ॥

सप्तदशा भवन्तीत्येव ।

॥ ते द्वौ द्वौ सम्पद्य त्रयश्चतुस्त्रिंशा भवन्ति ॥

त्रयोऽधः स्वरसामान ऊर्ध्वं विषुवतश्च ये ।
ते षट् सप्तदश द्वौ द्वौ सम्भूयैव पुनस्त्रयः ।
चतुस्त्रिंशा भवन्तीह स्वरसामान उत्तमाः ॥

॥ चतुस्त्रिंशो वै स्तोमानामुत्तमः ॥

उत्कृष्टफलदायी सन्नेष उत्तम उच्यते ।

॥ तेषु वा एष एतदध्याहितस्तपति ॥

तेषु सामीपिकाधिकरणे सप्तमी, तत्समीपे । एष विषुवान् । एतद् एतर्हि । अधि सम्यक् आहितः स्थितः । तपति दीप्यते ।

॥ तेषु हि वा एष एतदध्याहितस्तपति ॥

तेषु प्रसिद्धस्वर्गादिषु । एष सूर्यः वैषुवतः[१] ।
सूर्यं स्तौति—

॥ स वा एष उत्तरस्माद् सर्वस्माद् भूताद् भविष्यतः ॥

भूताद्भविष्यतश्चापि जगतो वर्तमानकात् ।
उत्तरः सूर्य एवेह स्वामित्वेन प्रवर्तते ।

---

[१] 'तं' ग. च पाठः.

स्पष्टयति—

॥ सर्वमेवेदमतिरोचते यदिदं किञ्च ॥

एष हीदं जगत्सर्वमतीत्य खलु दीप्यते ।

किञ्च

॥ उत्तरो भवति ॥

*स्तुत्यर्थात्तिरतेऋदप् कर्मणि स्तुत्य एव च ।

॥ यस्मादुत्तरो बुभूषति तस्मादुत्तरो भवति य एवं वेद ॥

सः ।

भवितुं यमपे[1]क्षेच्चेद् वेदिता तत उत्तरः ।
सम्पद्यतेऽतः सूर्यस्य माहात्म्यं ज्ञायतां सदा ॥

चतुर्थः खण्डः

अथाभिजिद्विश्वजिद्भ्यान्नवरात्रत्वमाह ह—

॥ स्वरसाम्न उपयन्ति ॥

अभिप्लवत्र्यहं पूर्वं ज्योतिर्गौरायुरात्मकम् ।

---

१. 'वे' घ. पाठः.

* 'तॄ प्लवनतरणयोः' इति कौमुद्यादिषु ।

†स्वरसाम्नेति विख्यातं प्रकुर्वन्तीह सत्रिणः ।

॥ इमे वै लोकाः स्वरसामानः ॥

उक्तं हि प्राग्* 'अयं वै लोको ज्योतिरन्तरिक्षं गौरसौ लोक आयुः' इति ।

स्वरसामशब्दं निराह—

॥ इमान्वै लोकान् स्वरसामभिरस्पृण्वन् ॥

स्पृ प्रीतौ पालने वृद्धौ हुश्नुयण् लङ्§इयडेव च ।
अन्तर्णीतण्यर्थकश्च देवा लोकानपालयन् ।
अवर्धयन्वा यद्वैनानकुर्वन्........... ।

॥ तत्स्वरसाम्नां स्वरसामत्वम् ॥

स्पृणोतेरचि पेर्वत्वे करणे स्वरनिर्वचः ।
प्रीतिरक्षणवृद्धीनां हेतुत्वात् स्वरसाम(तः?ता) ॥

॥ तद्यत्स्वरसाम्न उपयन्त्येष्वेवैनं तल्लोकेष्वाभजन्ति ॥

आभजिः प्रतिष्ठापनार्थः । (तत्) तत्र । उपयन्ति यद् आभजन्ति तत् ।

अथाभिजिद्विश्वजितौ स्तौति—

॥ तेषां वै देवाः सप्तदशानां प्रप्ल¹याद् अबिभयुः ॥

---

१. 'ल्ल' मुद्रितपाठः.

† 'अभिप्लवव्यहः पूर्वः स्वरसामानः' इति आ० श्रौ० सू० ८. ६. १०. * Vol. II, Page 62. § पा० सू० ६. ४. ८७.

*प्ली शैथिल्यार्थः । तुदादिः । सप्तदशावृत्तस्तोमकस्य स्वरसाम्नस्त्र्यहस्य पूर्वे पक्षस्युत्तरे च स्थितस्य शैथिल्याद् देवा भीता अभवन् । भयरूपमाह—

॥ समा इव वै स्तोमा अविगूह्ळा इवेमे ह न प्र [1]प्लियेरन्निति ॥

कथम् इति शेषः । इवशब्दावेवार्थौ । वै खलु । हेति खेदे । अविगूह्ळाः अविगूढाः अन्योन्य[2]संवरणासमर्थाः सप्तदशतया तुल्यत्वात् । इमे स्तोमाः कथं न प्रप्लियेरन् न शिथिला भवेयुः । अथ,

॥ तान् सर्वैः स्तोमैरवस्तात् पर्यार्षन् ॥

शुक्रेनाभिजितेति शेषः । सर्वस्तोमो ह्यभिजित् । तान् अधः स्थितान् स्वरसाम्नः । सर्वैः त्रिवृदादिभिः । दृढीकरणार्थं ऋषिः¶ ।

'पर्यृषन्त्यप्रकम्पी'ति चतुर्थारण्यके§ यथा ।

स्थूणादीन् पांसुभिरिव त्वकुर्वन् $सुदृढानिमान् ॥

तथा—

॥ सर्वैः पृष्ठैः परस्तात् ॥

---

[1] 'व्लि' सायणपाठः. [2] 'संरक्षणा' च. पाठः.

---

* 'प्लीं गतौ' इति कौमुद्यादिषु, 'श्लेषणे' इति धातुप्रदीपे च अर्थौ निर्दिश्यते, पाठश्च क्र्यादिषु न तुदादिषु । सायणश्च 'प्रव्लयाद् इति पठित्वा 'व्ली विशरणे इति धातोरिदं रूपमित्याह । ¶ ऋषी गतौ इत्येव धातुवृत्त्यादिषु । § ऐ० आ० ४. १. ३. मुद्रितपुस्तकरीत्या पञ्चमारण्यकस्थमिदम् । $ 'परितो वेष्टनं कृतवन्तः' इति सायणः ।

युक्तेन विश्वजितेति शेषः । सर्वपृष्ठो हि विश्वजित् । तान् पर्यार्षन्नित्येव । पृष्ठै रथन्तरादिभिः ।

॥ तद्यदभिजित्सर्वस्तोमोऽवस्ताद् भवति विश्वजित्सर्वपृष्ठः परस्तात्
तत्सप्तदशानुभयतः पर्यृषान्ति धृत्या अप्रप्ल[1]याय ॥

तत् तत्र । तत् तेन । प्रप्लयः शैथिल्यम् ।
अभिजित्स्वरसामानो विषुवान् पुनरेव तु ।
स्वरसामानो विश्वजिन्नवरात्र इतीरितः ॥
अथ क्रतौ विषुवति[2] पृष्ठसाम ब्रवीति ह—

॥ तस्य वै देवा आदित्यस्य स्वर्गाल्लोकादवपातादबिभयुः ॥

उक्तार्थम्* ।

॥ तं पञ्चभी रश्मिभिरुदवयन् ॥

वयिर्ग्रहणार्थः ।
'अजिघृक्षत् तदावयद्' इति ह्यारण्यके† यथा ।
पञ्चभिः सामभिः ।
साम्नां दिवैव कीर्त्यत्वाद्रश्मित्वमिह कथ्यते ।
इत्याह—

॥ रश्मयो वै दिवाकीर्त्यानि ॥

वै इव ।

---

[1] 'व्ल' सायणपाठः. [2] 'विश्वजिति' च. पाठः.

* Vol. II. Page. 75 † ऐ० आ० २. ४. ३.

दिवाकीर्त्यानि सामानि सूर्यरश्मिसमानि हि ।

तत्र,

॥ महादिवाकीर्त्यं पृष्ठं भवति[*] ॥

[$]'विभ्राड्बृहत्'तृचोत्पन्नं निष्केवल्यस्य साम वै ।

॥ विकर्णं ब्रह्मसाम ॥

भवतीत्येव ।

[¶]'पृक्षस्य वृष्ण' उत्पन्नं विकर्णं साम तद्भवेत् ।
ब्राह्मणाच्छंसिनः पृष्ठस्तोत्रं ब्रह्मेति कीर्त्यते ॥

किञ्च,

॥ भासमग्निष्टोमसाम ॥

भासं साम भवेद्यज्ञायज्ञियस्थान एव च ।

तथा,

॥ उभे बृहद्रथन्तरे पवमानयोर्भवतः ॥

माध्यन्दिनार्भवयोः ।

॥ तदादित्यं पञ्चभी रश्मिभिरुद्धयन्ति धृत्या अनवपाताय ॥

उद्धयन्ति सम्यग्गृह्णन्ति । पञ्चभिर्महादिवाकीर्त्यविकर्णभासरथन्तरबृहद्भिः । अवपातोऽधःपतनम् । तत् तत्र ॥

अथ प्रयोगमाह--

---

[*] 'महादिवाकीर्त्यं पृष्ठम्' इति आ० श्रौ० सू० ८. ६. ७. [$] ऋक्सं० ८. ८, २८, १. [¶] ऋक्सं० ४. ५. १०, १.

॥ उदित आदित्ये प्रातरनुवाकमनुब्रूयात्[*] ॥

कस्मादेवम् ।

॥ सर्वं ह्येवैतदहर्दिवाकीर्त्यं भवति ॥

अह्नोऽस्य हि दिवाध्येयं मन्त्रब्राह्मणसूत्रकम् ।

॥ सौर्यं पशुमन्यङ्गश्वेतं सवनीयस्योपालम्भ्यमालभेरन्[¶] ॥

'न्यङ्गश्चिह्नमन्यवर्णः श्वेतो यस्य न विद्यते ।
तं सर्वश्वेतमित्यर्थं [§]'आ(दो यनि चनो ? ङो यी'ति च नुं) लभेः ॥

कुतः ।

॥ सूर्यदेवत्यं ह्येतदहः ॥

एषोऽश्वः श्वेत इत्युक्तः सवनीठादिनो इह(?) ।

इति भावः ।

किञ्च,

॥ एकविंशतिं सामिधेनीरनुब्रूयात् ॥

प्रकृत्यां पञ्चदश याः 'प्र वो वाजे'ति सूत्रिताः[‡] ।
पृथुपाजेति धाय्याः षडुपान्त्यायाः पुरो वपेत्[‖] ॥

कुतः,

---

[*] 'उदिते प्रातरनुवाकः' आ० श्रौ० सू० ८. ६. २.

[¶] सौर्यः सवनीयस्योपालम्भ्यः' आ० श्रौ० सू० ८. ६. ४.

[§] पा० सू० ७. १. ६५.

[‡] आ० श्रौ० सू० ८. ६. ३.

[‖] 'पृथुपाजा अमर्त्य इति षड् धाय्याः सामिधेनीनाम्' आ० श्रौ० सू० १. २. ७.

॥ प्रत्यक्षाद्व्येतदहरेकविंशम् ॥

विषुवदाख्यं प्रत्यक्षेण ।

अथ निष्केवल्ये—

॥ एकपञ्चाशतं द्विपञ्चाशतं वा शस्त्वा मध्ये निविदं दधाति तावतीरुत्तराः शंसति* ॥

कथं सङ्ख्यैवमिति चेच्छ्लोकानेतान् शृणु (ष्वतम्? स्वयम्) ।
स्तो पञ्चानु तृचोऽथैका योनी द्वे द्वे द्विसाम च ॥
नृ त्र्येकादश यस्तिग्माभित्यस्मै दश पञ्च च ।
इन्द्रस्य पञ्चदशके नव शस्त्वाष्ट वा निवित् ।
इति श्रुत्यन्तरप्रोक्तमङ्गीकृत्यात्र कथ्यते ।
दिवोऽष्टौ दशके द्वे हि सुत इत्थं वृषामदः ॥
षळेष षट् प्रमंहिष्ठा त्यमूषुत्यन्तपञ्चकम् ।
उत्तरास्तु द्विपञ्चाशन्नव शस्त्वा निविन्निधौ ॥
नवशस्त्वानिवित्पक्षे त्वभ्यासा[1]गणने सति ।
पूर्वा स्यादेकपञ्चाशद् [गणने सति तद् भवेत् (?)] ॥
एकपञ्चाशतं शस्त्वा तावतीरिति चोक्तितः ।
गणनागणने स्यातामिति सङ्ख्या समीरिता ॥

इति । अर्थस्तु— स्तो इत्यादि । (स्तोत्रियादीनामेव?) । स्तो पञ्च स्तोत्रिय[2]तृचस्याद्या त्रिः इति । अनु अनुरूपस्तृचः । अथैका धाय्या । बृहद्रथन्तरयोर्योनी द्वे द्वे इति । द्विसाम च सामप्रगाथो द्वृचः ।

---

[1] 'स' घ. पाठः. [2] 'यस्य तृ' ग. च. पाठः.

---

* 'नृणामु त्वा नृतमं गीर्भिरुक्थैरिति तिस्रो यस्तिग्मशृङ्गोऽभि त्यं मेषमिन्द्रस्य नु वीर्याणीति । एतस्मिन्नैन्द्रीं निविदं शस्त्वा शंसेदेवोत्तराणि षड् दिवश्चिदस्य सुत इत्थमेष प्रपूर्वीर्वृषामदः प्रमंहिष्ठाय त्यमूष्विति' आ० श्रौ० सू० ८. ६. १२, १३.

नृ त्रि, नृणामुत्वा तिस्रः । एकादश यस्तिग्म, यस्तिग्मशृङ्ग एकादश । अभित्यं मेषं पञ्चदश । इन्द्रस्य नु पञ्चदशर्चे अष्टौ शस्त्वा नव वा निविदं दध्यात् । 'एकभूयसीर्द्विभूयसीर्वा शस्त्वा निविदं दध्याद्विषुवति' इती[1]ह श्रुत्यन्तरम् इति । 'दिवश्चि'दष्टौ, 'सुत इत्त्वं' 'वृषामद' इति द्वे सूक्ते दशर्चे । 'एष प्रपूर्वीः' 'प्रसंहिष्ठाय' इति द्वे षळृचे । त्यमूषुतृचेऽन्त्या त्रिः इति पञ्च । उत्तरा इत्यादि सुगमम् ।

स्तौति—

॥ शतायुर्वै पुरुषश्शतवीर्यः शतेन्द्रिय आयुष्येवैनं तद्वीर्य इन्द्रिये दधाति ॥

पञ्चमः खण्डः ।

॥ दूरोहणं रोहति ॥

शंसनार्थौ रुहिर्लट् च लिङर्थे ल्युट् च कर्मणि ।
त्यमूषुतृचमाद्यां तु शस्त्वा + प्रयतो वदेद् ।
ऋचं हंसश्शुचीत्येतां समशंसनयोगिनीम् ।

सूत्र्यते हि*— 'त्यमूष्विति । इह तार्क्ष्यमन्ततः । तस्यैकां शस्त्वाहूय दूरोहणं रोहेद्' इति, 'हंसश्शुचिषदिति पच्छोऽर्धर्चशः त्रिपद्या चतुर्थमनवानमुक्त्वा प्रणुत्यावस्येत् । पुनस्त्रिपद्यार्धर्चशः पच्छ एव

---

[1] 'तिह' ग. च. पाठः.

---

* आ० श्रौ० सू० ८. ६. १२ — १५; ८. २. १४, १५.

सप्तमम् । एतद् दूरोहणम्' इति च ।

स्तौति—

॥ स्वर्गो वै लोको दूरोहणम् ॥

दूरोहणस्वर्गयोर्हि तुल्या दुःखोपपाद्यता ।

॥ स्वर्गमेव तं लोकं रोहति य एवं वेद ॥

सः ।

॥ यदेव दूरोहणा३म् ॥

दूरोहणं सप्तरूपं यत्तत्पूज्यमिति प्लुतः[*] ।

॥ असौ वै दूरोहो योऽसौ तपति ॥

योऽसौ तपति सूर्यः स दूरोहो दुष्प्रवेशतः ।
रुहेः खल्[1] ।

कथम्,

॥ कश्चिद्वा अत्र गच्छति ॥

अत्र सूर्ये कश्चिदेव सम्यग्दर्शीह गच्छति ।
यस्यैष सुप्रसन्नः स्यात् श्रुतिस्मृत्युक्तकारिणः ।
[‡]'तद्यमेवैष वृणुते तेन लभ्य' इति श्रुतेः ।
[¶]'यं कामये तं तमुग्रं कृणोमीति' च मन्त्रतः ।

---

[1] 'खल् कश्चित्' घ. पाठः.

---

[*] 'दूरोहणमिति यदुक्तं तत् किमिति शेषः । प्रश्नार्थो प्लुतिः' इति सायणः.
[‡] ऋक्सं० ८. ७. ११. ५. [¶] कठ० १. २. २३.

॥ स यद् दूरोहणं रोहत्येतमेव तद्रोहति ॥

स होता। तत् तेन। एतं सूर्यम्। रुहिः शंसनार्थः प्राप्त्यर्थश्च।

॥ हंसवत्या रोहति ॥

सां चेयमिति दर्शयन् व्याचष्टे—

॥ हंसश्शुचिषद् इति । एष वै हंसः शुचिषत् ॥

एषः सूर्यः । दासो हंसो हम् इति व्यवध्ये (?) हंसस्त्वंहो हिनस्ति वा* ।

हंसः सूर्यः †शुचौ चित्ते सीदन् शुचिषदुच्यते ।

॥ वसुरन्तरिक्षसादिति । एष वै वसुरन्तारिक्षसत् ॥

‡वसुः प्रशस्यः । अन्तरिक्षे सीदति वर्तते ।

॥ होता वेदिषदिति । एष वै होता वेदिषत् ॥

§होता दाता सर्वस्य वृष्ट्यादेः । वेद्यां हविर्भोक्तृत्वेन सीदति ।

॥ अतिथिर्दुरोणसद् इति । एष वा अतिथिर्दुरोणसत् ॥

अतिथि(स्थिति ? स्तिथि)हीनत्वाद् दुरोणं ‖ यज्ञियं गृहम् ।

॥ नृषदिति । एष वै नृषत् ॥

नृष्वनुष्ठानशीलेषु सुप्रियत्वेन[1] सीदति¶ ।

---

[1] ‘सुप्रयतेन’ च. पाठः.

---

* ‘हन्ति सर्वदा गच्छतीति हंसः’ † ‘शुचौ शुद्धे द्युलोके सीदतीति शुचिषत्’, ‡ ‘वसति सर्वदेति वसुर्वायुः । नहि वायोरहनि रात्रौ वा कदाचिदस्तमयोऽस्ति’, § ‘होता होमस्य कर्ता,’ ‖ ‘दुरोणेषु तत्तद्गृहेषु’, ¶ ‘नृषु मनुष्येषु घृष्टिरूपेण सीदति’ इति सायणः ।

॥ वरसदिति । एष वै वरसत् ॥

कथम् ।

॥ वरं वा एतत् सद्मनां यस्मिन्नेष आसन्नस्तपति ॥

गृहाणां श्रेष्ठमेतद्धि यत्रासौ दीप्यते प्रभुः ।

॥ ऋतसदिति । एष वै सत्यसत् ॥

ऋतं सत्यम् ।

॥ व्योमसदिति । एष वै व्योमसत् ॥

[*]विशिष्टमोम स्थानं हि [‡]'ज्वरे'त्यूठवतेर्मनिन् ।
गुणेनोत्वं विशिष्टे तु स्थाने ह्येष निषीदति ॥

व्याचष्टे—

॥ व्योम वा एतत् सद्मनां यस्मिन्नेष आसन्नस्तपति ॥

॥ अब्जा इति । एष वा अब्जाः ॥

[§]'जनसन—' इति (विटि) [¶]'विड्वनोः—' इत्यात् । कथम् ।

॥ अब्भ्यो वा एष प्रातरुदेत्यपस्सायं प्रविशति ॥

उदेति ह्येष पूर्वाब्धेः पराब्धावस्तमेति च ।

---

[*] ओमशब्दस्य स्थानार्थकत्वे कोशो मृग्यः. 'व्योम्नि आकाशमार्गे' इति सायणः.
[‡] पा० सू० ६. ४. २०.　[§] पा० सू० ३. २. ६७.　[†] पा० सू० ६. ४. ४१.

॥ गोजा इति । एष वै गोजाः ॥

§ गोभिः सहस्रसङ्ख्यैस्तु रश्मिभिः सह जायते ।

॥ ऋतजा इति । एष वै सत्यजाः ॥

*ऋतं सत्यं सत्सु साधुः सतां ह्येषोऽभिरक्षकः ।

॥ अद्रिजा इति । एष वा अद्रिजाः ॥

उदयाख्यान्महाद्रेस्तु प्रातरेष विजायते ।

॥ ऋतमिति । एष वै सत्यम् ॥

यद्वस्तु परमार्थाख्यं तद्धि ब्रह्म रविस्त्वसौ† ।

किं बहुना ।

॥ एष एतानि सर्वाणि ॥

¶ सर्वाणि पदजातानि वाच्यजातानि यानि च ।
तद्ध्येष एव भगवान् सहस्रकिरणो रविः ।
$ 'सूर्य आत्मा जगतस्तस्थुषश्चे'ति मन्त्रतः ।

किन्तु,

॥ एषा ह वा अस्य छन्दस्सु प्रत्यक्षतमादिव रूपम् ॥

---

§ 'गोभ्यो जायते जीवादिः स गोजाः अस्य तद्रूपत्वं पूर्ववत्', * 'ऋ सत्यं वैदिकमन्त्रजातम् । तस्माज्जायत इति ऋतजाः वैदिकानुष्ठानेन हि दे लोकादौ जायत इति प्रसिद्धम् । आदित्यस्य तद्रूपत्वं पूर्ववत्' इति सायणः

† तथाच तै० आ०— 'असावादित्यो ब्रह्मेति' (२. २.) ¶ शुचिषदित्यादिशब्दैर्या रूपाण्यभिहितानि तानि सर्वाण्येत्र एव' इति सायणः $ ऋक्सं० १. ८. ७.

एषा हंसवती । अस्य सूर्यस्य । छन्दस्सु सर्वेषु वेदेषु । प्रत्यक्षतमात् । स्वर्थे[1] ङसिः$ । प्रत्यक्षतमम् । इव एव । वै खलु । हेति विस्मये । रूपं वपुः ।

स्तौति—

॥ तस्माद् यत्र क्व च दूरोहणं रोहेद्धंसवत्यैव रोहेत् ॥

अन्यत्रापि *‘वरौ रोहेद्’ इत्यादौ । अत्र तु,

॥ तार्क्ष्यं स्वर्गकामस्य रोहेत् ॥

स्वर्गकामे सत्रिगणे रोहेत्तार्क्ष्यतृचे सुखम् ।
(तर्क्ष्य[2]।तृक्ष)पुत्रारिष्टनेमिदृष्टे वै तार्क्ष्यदेवते ।

कुतः ।

॥ तार्क्ष्यो ह वा एतं पूर्वोऽध्वानमैत् ॥

तार्क्ष्यः खल्वेतमध्वानं गतवानमृताप्तये ।

कस्मिन् काले,

॥ यत्रादो गायत्री सुपर्णो भूत्वा सोममाहरत् ॥

अदोऽर्थरूपं यत्राभूत् तत्र काले जगाम सः ।

॥ तद्यथा क्षेत्रज्ञमध्वनः पुर एतारं कुर्वीत तादृक् तद् यदेव तार्क्ष्यं ॥

---

[1] ‘स्वार्थे’, [2] ‘तार्क्ष्य’ ग. च. पाठः.

$ ‘प्रत्यक्षतमादिव अतिशयेन प्रत्यक्षं विस्पष्टं यथा भवति तथा’ इति सायणः.
* ऐ० ब्रा० २९. ९.

तत् तत्र। दूरोहणं रोहतीति शेषः।

यथा हि लोके क्षेत्रज्ञं पुरः कुर्वन्ति मार्गगाः।
तादृशं तार्क्ष्यसूक्ते तु स्याद् दूरोहणशंसनम्।
‡'अक्षेत्रवित् क्षेत्रविदं ह्यप्राडि'त्यध्यगोऽभहि।

॥ अयं वै तार्क्ष्यो योऽयं पवते॥

वै इव। पवते चलति। वायुरयम्।

वायुवच्छीघ्रगमनः सुपर्ण इति गृह्यताम्।

पुनः स्तौति—

॥ एष स्वर्गस्य लोकस्याभिवोह्ळा॥

*अभिवहेरभिभवार्थात्तृचि †'सहिवहोरोदवर्णस्य'।
पुराभिभूय वै स्वर्गममृतं हृतवानयम्।
अथ तार्क्ष्यर्चं सर्वं व्याचक्षाणः पठत्ययम्॥

॥ ¶त्यमूषु वाजिनं देवजूतमिति। एष वै वाजी देवजूतः॥

वाजोऽन्नं बलं वेगो वा। देवैर्जूतः सेवितः।

॥ सहावानं तरुतारं रथानामिति। एष वै सहावान्॥

§सहो बलं सहस्वान्। सस्य[1] आत्।

---

[1] 'सहस्य' घ. पाठः.

---

‡ ऋक्सं० ७. ७. ३०. ३. * 'अभिवोह्ळा नेता' सायणः। † पा० सू० ६. ३. ११२. ¶ ऋक्सं० ८. ८. ३६. १. § सहावानं सहाः सहनं सर्पादीनामभिभवः, तद्वन्तम्। रथानां तरुतारमुल्लङ्घयितारम्।' इति सायणः।

॥ तरुता ॥

एष वा इत्येव । कथम्,

॥ एष हीमान् लोकान् सद्यस्तरति ॥

तॄ प्लवे तृच उद्गन्ता तरिता तरुता मतः ।
वशीकरोति त्रीन् लोकान् बलेन सहसैष तु ।

॥ अरिष्टनेमिं पृतनाजमाशुमिति । एष वा अरिष्टनेमिः पृतनाजिदाशुः ॥

[*]अरिष्टनेमिः अहिंसिता नेभिरायुधजातिर्यस्य सः । पृतनायाः सेनायाः अजिता क्षेप्ता । आशुः शीघ्रकारी ।

॥ स्वस्तय इति स्वस्तितामाशास्ते ॥

अविनाशं प्रार्थयते ।

॥ तार्क्ष्यमिहाहुवेमेति ह्वयत्येवैनमेतत् ॥

एनं तार्क्ष्यम् । एतद् एतेन । आहुवेमेति पदेन ।

॥ [†]इन्द्रस्येव रातिमाजोहुवानाः स्वस्तय इति स्वस्तितामेवाशास्ते ॥

एव पुनः । रातिः समृद्धिः ।

---

[*] 'अरिष्टनेमिं रिष्टं हिंसा, तद्राहित्यमरिष्टम् । तस्य च नेमिस्थानीयम् । यथा रथचक्रस्य नेमिः परितो रक्षिता भवति तादृशम् । पृतना परकीयसेना तां जयतीति पृतनाजम्' इति सायणः ।

[†] ऋक्सं० ८. ८.. ३१. २.

॥ नावमिवारुहेमेति समेवैनमेतदधिरोहति ॥

एनं तार्क्ष्यम् । एतद् एतेन प्रकारेण । एव पुनः । समधिरोहति । किमर्थम् ।*

स्वर्गस्य लोकस्य समष्ट्यै सम्पत्यै सङ्गत्यै ।

उर्वी न पृथ्वी बहुले गभीरे मा वामेतौ मा परेतौ रिषामेतीमे एवैतदनुमन्त्रयत आ च परा च मेष्यन् ।

†सद्याश्चिद्यः शवसा पञ्च कृष्टीः सूर्य इव ज्योतिषापस्ततानेति प्रत्यक्षं सूर्यमभिवदति ।

सहस्रसाः शतसा अस्य रंहिर्न स्मा वरन्ते युवतिं न शर्यामित्याशिषमेवैतेनाशास्त आत्मने च यजमानेभ्यश्च ॥

षष्ठः खण्डः ।

आहूय दूरोहणं रोहति स्वर्गो वै लोको दूरोहणं वागाहावो ब्रह्म वै वाक्स यदाह्वयते तद् ब्रह्मणाहावेन स्वर्गं लोकं रोहति ॥

स पच्छः प्रथमं रोहतीमं तं लोकमाप्नोत्यथार्धर्चशोऽन्त-

---

* इत उत्तरं २० अध्यायावधि व्याख्या लुप्ता ।

† ऋक्सं० ८. ८. ३६. ३.

रिक्षं तदाप्नोत्यथ त्रिपद्यामुं तं लोकमाप्नोत्यथ केवल्या तदेतस्मिन् प्रतितिष्ठति य एष तपति ।

त्रिपद्या प्रत्यवरोहति यथा शाखां धारयमाणस्तदमुष्मिँल्लोके प्रतितिष्ठत्यर्धर्चशोऽन्तरिक्षे पच्छोऽस्मिँल्लोक आप्त्वैव तत्स्वर्गं लोकं यजमाना अस्मिँल्लोके प्रतितिष्ठन्ति ।

अथ य एककामाः स्युः स्वर्गकामाः पराञ्चमेव तेषां रोहेत्ते जयेयुर्हैव स्वर्गं लोकम् । नेत्त्वेवास्मिँल्लोके ज्योगिव वसेयुः ।

मिथुनानि सूक्तानि शस्यन्ते त्रैष्टुभानि च जागतानि च मिथुनं वै पशवः पशवश्छन्दांसि पशूनामवरुद्ध्यै ॥

सप्तमः खण्डः ।

यथा वै पुरुष एवं विषुवांस्तस्य यथा दक्षिणोऽर्ध एवं पूर्वोऽर्धो विषुवतो यथोत्तरोऽर्ध एवमुत्तरोऽर्धो विषुवतस्तस्मादुत्तर इत्याचक्षते प्रबाहुक्सतः शिर एव विषुवान् बिदलसंहित इव वै पुरुषस्तद्धापि स्यूमेव मध्ये शीर्ष्णो विज्ञायते ।

तदाहुर्विषुवत्येवैतदहः शंसेद्विषुवान् वा एतदुक्थानामुक्थं विषुवान् विषुवानिति ह विषुवन्तो भवन्ति श्रेष्ठतामश्नुवत इति

तत्तन्नादृत्यं संवत्सर एव शंसेद्रेतो वा एतत्संवत्सरं दधतो यन्ति ।

यानि वै पुरा संवत्सराद्रेतांसि जायन्ते यानि पञ्चमास्यानि यानि षण्मास्यानि स्रीव्यन्ति वै तानि न वै तैर्भुञ्जते ।

अथ यान्येव दशमास्यानि जायन्ते यानि सांवत्सरिकाणि तैर्भुञ्जते तस्मात्संवत्सर एवैतदहः शंसेत् ।

संवत्सरो ह्येतदहराप्नोति संवत्सरं ह्येतदहराप्नुवन्त्येष ह वै संवत्सरेण पाप्मानमपहत एष विषुवताङ्गेभ्यो हैव मासैः पाप्मानमपहते शीर्ष्णो विषुवता । अप संवत्सरेण पाप्मानं हतेऽप विषुवता य एवं वेद ।

वैश्वकर्मणमृषभं सवनीयस्योपालम्भ्यमालभेरन् द्विरूपमुभयत एतं महाव्रतीयेऽहनि ।

इन्द्रो वै वृत्रं हत्वा विश्वकर्माभवत् प्रजापतिः प्रजाः सृष्ट्वा विश्वकर्माभवत् संवत्सरो विश्वकर्मैन्द्रमेव तदात्मानं प्रजापतिं संवत्सरं विश्वकर्माणमाप्नुवन्तीन्द्र एव तदात्मनि प्रजापतौ संवत्सरे विश्वकर्मण्यन्ततः प्रतितिष्ठन्ति प्रतितिष्ठति य एवं वेद य एवं वेद ॥

अष्टमः खण्डः ।

इति षड्गुरुशिष्यविरचितायां महिदासैतरेयब्राह्मणवृत्तौ
सुखप्रदायां अष्टादशोऽध्यायः ॥

अथैकोनविंशोऽध्यायः

प्रजापतिरकामयत प्रजायेय भूयान् स्यामिति। स तपोऽतप्यत। स तपस्तप्त्वेमं द्वादशाहमपश्यदात्मन एवाङ्गेषु च प्राणेषु च। तमात्मन एवाङ्गेभ्यश्च प्राणेभ्यश्च द्वादशधा निरमिमीत। तमाहरत्तेनायजत ततो वै सोऽभवदात्मना प्र प्रजया पशुभिरजायत।

भवत्यात्मना प्र प्रजया पशुभिर्जायते य एवं वेद।

सोऽकामयत कथं नु गायत्र्या सर्वतो द्वादशाहं परिभूय सर्वामृद्धिमृध्नुयामिति। तं वै तेजसैव पुरस्तात् पर्यभवच्छन्दोभिर्मध्यतोऽक्षरैरुपरिष्टाद्। गायत्र्या सर्वतो द्वादशाहं परिभूय सर्वामृद्धिमार्ध्नोत्।

सर्वामृद्धिमृध्नोति य एवं वेद।

यो वै गायत्रीं पक्षिणीं चक्षुष्मतीं ज्योतिष्मतीं भास्वतीं वेद गायत्र्या पक्षिण्या चक्षुष्मत्या ज्योतिष्मत्या भास्वत्या स्वर्गं लोकमेति। एषा वै गायत्री पक्षिणी चक्षुष्मती ज्योतिष्मती भास्वती यद् द्वादशाहः। तस्य यावभितोऽतिरात्रौ तौ पक्षौ। यावन्तराग्निष्टोमौ ते चक्षुषी। येऽष्टौ मध्य उक्थ्याः स आत्मा।

गायत्र्या पाक्षिण्या चक्षुष्मत्या ज्योतिष्मत्या भास्वत्या स्वर्गं लोकमेति य एवं वेद ॥

प्रथमः खण्डः ।

त्रयश्च वा एते त्र्यहा आदशसमहरा द्वावतिरात्रौ यद् द्वादशाहः ।

द्वादशाहानि दीक्षितो भवति यज्ञिय एव तैर्भवति। द्वादश रात्रीरुपसद उपैति शरीरमेव ताभिर्धूनुते। द्वादशाहं प्रसुतो भूत्वा शरीरं धूत्वा शुद्धः पूतो देवता अप्येति य एवं वेद ।

षट्त्रिंशदहो वा एष यद् द्वादशाहः। षट्त्रिंशदक्षरा वै बृहती। बृहत्या वा एतदयनं यद् द्वादशाहः। बृहत्या वै देवा इमाँल्लोकानाश्नुवत। ते वै दशभिरेवाक्षरैरिमं लोकमाश्नुवत दशभिरन्तरिक्षं दशभिर्दिवं चतुर्भिश्चतस्रो दिशो द्वाभ्यामेवास्मिँल्लोके प्रत्यतिष्ठन्। प्रतितिष्ठति य एवं वेद ।

तदाहुर्यदन्यानि छन्दांसि वर्षीयांसि भूयोक्षरतराण्यथ कस्मादेतां बृहतीत्याचक्षत इति ।

एतया हि देवा इमाँल्लोकानाश्नुवत। ते वै दशभिरेवाक्षरैरिमं

लोकमाश्नुवत दशभिरन्तरिक्षं दशभिर्दिवं चतुर्भिश्चतस्रो दिशो द्वाभ्यामेवास्मिँल्लोके प्रत्यतिष्ठंस्तस्मादेतां बृहतीत्याचक्षते ।

अश्नुते यद्यत्कामयते य एवं वेद ॥

द्वितीयः खण्डः ।

प्रजापतियज्ञो वा एष यद् द्वादशाहः । प्रजापतिर्वा एतेनाग्रेऽयजत द्वादशाहेन । सोऽब्रवीदृतूंश्च मासांश्च याजयत मा द्वादशाहेनेति । तं दीक्षयित्वानपक्रमं गमयित्वाब्रुवन् देहि नु नोऽथ त्वा याजयिष्याम इति । तेभ्य इषमूर्जं प्रायच्छत् । सैषोर्गृतुषु च मासेषु च निहिता । ददतं वै ते तमयाजयंस्तस्माद्ददद् याज्यः । प्रतिगृह्णन्तो वै ते तमयाजयंस्तस्मात् प्रतिगृह्णता याज्यम् ।

उभये राध्नुवन्ति य एवं विद्वांसो यजन्ते च याजयन्ति च ।

ते वा इम ऋतवश्च मासाश्च गुरव इवामन्यन्त द्वादशाहे प्रतिगृह्य । तेऽब्रुवन् प्रजापतिं याजय नो द्वादशाहेनेति । स तथेत्यब्रवीत् ते वै दीक्षध्वमिति । ते पूर्वपक्षाः पूर्वेऽदीक्षन्त ते पाप्मानमपाहत । तस्मात्ते दिवेव दिवेव ह्यपहतपाप्मानः । अपरपक्षा अपरेऽदीक्षन्त ते नतरां पाप्मानमपाहत । तस्मात्ते तम इव तम इव ह्यनपहतपाप्मानः । तस्मादेवं विद्वान् दीक्षमाणेषु

पूर्वः पूर्व एव दिदीक्षिषेत ।

अप पाप्मानं हते य एवं वेद ।

स वा अयं प्रजापतिः संवत्सर ऋतुषु च मासेषु च प्रत्यतिष्ठत् । ते वा इम ऋतवश्च मासाश्च प्रजापतावेव संवत्सरे प्रत्यतिष्ठन् । त एतेऽन्योन्यस्मिन् प्रतिष्ठिताः । एवं ह वाव स ऋत्विजि प्रतितिष्ठति यो द्वादशाहेन यजते । तस्मादाहुर्न पापः पुरुषो याज्यो द्वादशाहेन नेदयं मयि प्रतितिष्ठादिति ।

ज्येष्ठयज्ञो वा एष यद् द्वादशाहः । स वै देवानां ज्येष्ठो य एतेनाग्रेऽयजत । श्रेष्ठयज्ञो वा एष यद् द्वादशाहः स वै देवानां श्रेष्ठो य एतेनाग्रेऽयजत ।

ज्येष्ठः श्रेष्ठो यजेत कल्याणीह समा भवति । न पापः पुरुषो याज्यो द्वादशाहेन नेदयं मयि प्रतितिष्ठादिति ।

इन्द्राय वै देवा ज्यैष्ठ्याय श्रैष्ठ्याय नातिष्ठन्त । सोऽब्रवीद् बृहस्पतिं याजय मा द्वादशाहेनेति । तमयाजयत् ततो वै तस्मै देवा ज्यैष्ठ्याय श्रैष्ठ्यायातिष्ठन्त ।

तिष्ठन्तेऽस्मै स्वा ज्यैष्ठ्याय श्रैष्ठ्याय समास्मिन् स्वाः श्रेष्ठतायां जानते य एवं वेद ।

ऊर्ध्वो वै प्रथमस्त्र्यहस्तिर्यङ् मध्यमोऽर्वाङुत्तमः । स यदूर्ध्वः

प्रथमस्त्र्यहस्तस्मादयमग्निरूर्ध्व उद्दीप्यते। ऊर्ध्वा ह्येतस्य दिक्। यत् तिर्यङ् मध्यमस्तस्मादयं वायुस्तिर्यङ् पवते तिरश्चीरापो वहन्ति। तिरश्ची ह्येतस्य दिक्। यदर्वाङुत्तमस्तस्मादसावर्वाङ् तपत्यर्वाङ् वर्षत्यर्वाञ्चि नक्षत्राणि। अर्वाची ह्येतस्य दिक्। सम्यञ्चो वा इमे लोकाः सम्यञ्च एते त्र्यहाः।

सम्यञ्चोऽस्मा इमे लोकाः श्रियै दीघति य एवं वेद।

तृतीयः खण्डः।

दीक्षा वै देवेभ्योऽपाक्रामत्। तां वासन्तिकाभ्यां मासाभ्यामन्वयुञ्जत। तां वासन्तिकाभ्यां मासाभ्यां नोदाप्नुवन्। तां ग्रैष्माभ्यां तां वार्षिकाभ्यां तां शारदाभ्यां तां हैमन्तिकाभ्यां मासाभ्यामन्वयुञ्जत। तां हैमन्तिकाभ्यां मासाभ्यां नोदाप्नुवन्। तां शैशिराभ्यां मासाभ्यामन्वयुञ्जत। तां शैशिराभ्यां मासाभ्यामाप्नुवन्।

आप्नोति यमीप्सति नैनं द्विषन्नाप्नोति य एवं वेद।

तस्माद् यं सत्रिया दीक्षोपनमेदेतयोरे[illegible] शैशिरयोर्मासयोरागतयोर्दीक्षेत। साक्षादेव तद्दीक्षायामागतायां दीक्षते प्रत्यक्षाद्दीक्षां

परिगृह्णाति। तस्मादेतयोरेव शैशिरयोर्मासयोरागतयोर्ये चैव ग्राम्याः पशवो ये चारण्या अणिमानमेव तत् पराषिमाणं नियन्ति दीक्षारूपमेव तदुपनिप्लवन्ते।

स पुरस्ताद्दीक्षायाः प्राजापत्यं पशुमालभते । तस्य सप्तदश सामिधेनीरनुब्रूयात् । सप्तदशो वै प्रजापतिः प्रजापतेराप्त्यै ।

तस्याप्र्यो जामदग्न्यो भवन्ति ।

तदाहुर्यदन्येषु पशुषु यथ ऋष्याप्र्यो भवन्त्यथ कस्मादस्मिन् सर्वेषां जामदग्न्य एवेति ।

सर्वरूपा वै जामदग्न्यः सर्वसमृद्धाः। सर्वरूप एष पशुः सर्वसमृद्धः। तद्यज्जामदग्न्यो भवन्ति सर्वरूपतायै सर्वसमृद्ध्यै ।

तस्य वायव्यः पशुपुरोळाशो भवति ।

तदाहुर्यदन्यदेवत्य उत पशुर्भवत्यथ कस्माद् वायव्यः पशुपुरोळाशः क्रियत इति।

प्रजापतिर्वै यज्ञो यज्ञस्यायातयामतया इति ब्रूयाद् । यदु वायव्यस्तेन प्रजापतेर्नैति वायुर्ह्येव प्रजापतिः । तदुक्तमृषिणा पवमानः प्रजापतिरिति ।

सत्रमु चेत् संन्युप्याग्नीन् यजेरन् सर्वे दीक्षेरन् सर्वे सुनुयु-

र्वसन्तमभ्युदवस्यत्यूर्ग्वै वसन्त इषमेव तदूर्जमभ्युदवस्यति ॥

चतुर्थः खण्डः।

छन्दांसि वा अन्योन्यस्यायतनमभ्यध्यायन् गायत्री त्रिष्टुभश्च जगत्यै चायतनमभ्यध्यायत् त्रिष्टुब्गायत्र्यै च जगत्यै च जगती गायत्र्यै च त्रिष्टुभश्च। ततो वा एतं प्रजापतिर्व्यूह्ळच्छन्दसं द्वादशाहमपश्यत्तमाहरत्तेनायजत तेन स सर्वान् कामांश्छन्दांस्यगमयत्।

सर्वान् कामान् गच्छति य एवं वेद।

छन्दांसि व्यूहत्ययातयामतायै। छन्दांस्येव व्यूहति। तद्यथादोऽश्वैर्वानळुद्भिर्वान्यैरन्यैरश्रान्ततरैरश्रान्ततरैरुपविमोकं यान्त्येवमेवैतच्छन्दोभिरन्यैरन्यैरश्रान्ततरैरश्रान्ततरैरुपविमोकं स्वर्गं लोकं यन्ति यच्छन्दांसि व्यूहति।

इमौ वै लोकौ सहास्तां तौ व्यैतां नावर्षन्न समतपत्। ते पञ्चजना न समजानत। तौ देवाः समनयन्। तौ संयन्तावेतं देवविवाहं व्यवहेतां रथन्तरेणैवेयममूं जिन्वति बृहतासाविमाम्।

नौधसेनैवेयममूं जिन्वति श्यैतेनासाविमाम्। धूमेनैवेयममूं

जिन्वति वृष्ट्यासाविमाम्। देवयजनमेवेयममुष्यामदधात् पशूनसावस्याम्। एतद्वा इयममुष्यां देवयजनमदधाद्यदेतच्चन्द्रमसि कृष्णमिव। तस्मादापूर्यमाणपक्षेषु यजन्त एतदेवोपेप्सन्तः* ।

ऊषानसावस्याम्। तद्धापि तुरः कावषेय उवाचोषः पोषो जनमेजय केति। तस्माद्धाप्येतर्हि गव्यं मीमांसमानाः पृच्छन्ति सन्ति तत्रोषाः३ इति। ऊषो हि पोषः। असौ वै लोक इमं लोकमभिपर्यावर्तत। ततो वै द्यावापृथिवी अभवतां न द्यावान्तरिक्षान्नान्तरिक्षाद् भूमिः।

पञ्चमः खण्डः।

बृहच्च वा इदमग्रे रथन्तरं चास्तां वाक् च वै तन्मनश्चास्ताम्। वाग्वै रथन्तरं मनो बृहत्। तद् बृहत् पूर्वं ससृजानं रथन्तरमत्यमन्यत तद्रथन्तरं गर्भमधत्त तद्वैरूपमसृजत।

ते द्वे भूत्वा रथन्तरं च वैरूपं च बृहदत्यमन्येतां तद् बृहद् गर्भमधत्त तद्वैराजमसृजत।

ते द्वे भूत्वा बृहच्च वैराजं च रथन्तरं च वैरूपं

---

* ‘यजन्तः उपेप्सन्ते’ इति सायणाभिमतः पाठः। तथाच तद्व्याख्या— ‘यागं कुर्वन्तो यजमानाः उपाप्तुमिच्छन्ति’ इति। ‘यजन्ते उपेप्सन्तः’ इतिचैतदधिकरणसङ्गृहीतमूलमातृकासु पाठः.

चात्यमन्येतां तद्रथन्तरं गर्भमधत्त तच्छाक्वरमसृजत ।

तानि त्रीणि भूत्वा रथन्तरं च वैरूपं च शाक्वरं च बृहच्च वैराजं चात्यमन्यन्त तद् बृहद् गर्भमधत्त तद्रैवतमसृजत ।

तानि त्रीण्यन्यानि त्रीण्यन्यानि षट् पृष्ठान्यासन् ।

तानि ह तर्हि त्रीणि छन्दांसि षट् पृष्ठानि नोदाप्नुवन् सा गायत्री गर्भमधत्त सानुष्टुभमसृजत त्रिष्टुब् गर्भमधत्त सा पङ्क्तिमसृजत जगती गर्भमधत्त सातिच्छन्दसमसृजत तानि त्रीण्यन्यानि त्रीण्यन्यानि षट्च्छन्दांस्यासन् षट् पृष्ठानि तानि तथाकल्पन्त कल्पते यज्ञोऽपि ।

तस्यै जनतायै कल्पते यत्रैवमेतां छन्दसां च पृष्ठानां च क्लृप्तिं विद्वान् दीक्षते दीक्षते ॥

षष्ठः खण्डः ॥

इति षड्गुरुशिष्यविरचितायां महिदासैतरेयब्राह्मणवृत्तौ
सुखप्रदायामेकोनविंशोऽध्यायः ॥

अथ विंशोऽध्यायः ।

*अथात्र नवरात्रं वै वक्तुमेष विजृम्भते ।
द्वादशाहेऽहराद्यं यच्चतुर्थं दशमं च यत् ॥
एतत् त्रिकं वर्जयित्वा नवरात्रः प्रकीर्तितः
अहराद्यं चतुर्थं च सप्तमं चैकरूपकम् ॥
द्वितीयं पञ्चमं चाह्नरेकरूपं[1] तथाष्टमम् ।
तृतीयतुल्यरूपं च षष्ठं नवममेव च ॥
नवरात्रमपेक्ष्येह शब्दाश्च प्रथमादयः ।
आज्यप्रउगशस्त्रे द्वे प्रातस्सवनगोचरे ॥
शस्त्रं मरुत्वतीयं च निष्केवल्यं च मध्यतः ।
तृतीयसवनस्थे च वैश्वदेवाग्निमारुते ॥
इति होतुः शस्त्रषट्कमुच्यते प्रत्यहं त्विह ।
आद्यत्र्यहेऽनुसवनं गायत्री त्रिष्टुबेव च ॥
जगत्यथ चतुर्थ्यादौ जगती त्वादितस्ततः ।
गायत्री त्रिष्टुबथ तु सप्तमादौ त्र्यहे पुनः ॥
त्रिष्टुप् च जगती चैव गायत्री चेति वै क्रमात् ।
इति छन्दोव्यूहनेन व्यूढोऽयं[2] नवरात्रकः ॥
प्रगाथ इन्द्रनिहवो ब्राह्मणस्पत्य एव च ।
ऋचोः प्रग्रथनादेव तृचत्वं प्रकृतौ यथा ॥

---

[1] 'रूपमथाष्टमम्' घ. पाठः. [2] 'व्यूह्लोऽयं' क. ग. घ. पाठः.

---

* विनायकः शूलपाणिर्मुकुन्दः सूर्यो व्यासः शिवयोगीति ये षट् ।
तेभ्यो नमः सप्तविद्यामृतस्य प्रदातृभ्यः स्वाश्रितवत्सलेभ्यः ॥
अथा' क. पाठः.

स्तोत्रियश्चानुरूपश्चानुचरः प्रतिपत् तथा ।
तृचा एते प्रकृतिवत् प्रतीकाः[1] प्रउगे तृचाः$ ॥
*निष्केवल्यनिविद्धानसूक्तात् प्राक् तार्क्ष्यसूक्तकम् ।
प्राग् जातवेदसे जातवेदस्यादाग्निमारुते ॥
सप्तमादौ वैश्वदेवशस्त्रेष्वार्भवसूक्ततः ।
ऊर्ध्वं †मायाहीमा‖ बभ्रु‡सूक्तानि द्वैपदानि वै§ ॥
पार्ष्ठ्यस्त्र्यहः पूर्व एव छन्दोमाख्यस्त्र्यहो मतः¶ ।
त्रिवृत् पञ्चदशः सप्तदशश्चैवैकविंशकः ॥
तिणवश्च त्रयस्त्रिंश इति स्तोमास्तु पृष्ठ्यगाः ।
छान्दोमिके सप्तमे तु चतुर्विंशस्तथाष्टमे ।
चतुश्चत्वारिंशकश्च नवमे स्तोम एष तु ।
अष्टचत्वारिंशकोऽन्त्य इत्यत्राप्यवधार्यताम् ॥

॥ अग्निर्वै देवता प्रथममहर्वहति ॥

वै मङ्गलम् । वहति निर्वहति ।

॥ त्रिवृत् स्तोमः ॥

प्रथममहर्वहतीत्येव ।

॥ रथन्तरं साम ॥

---

[1] 'प्रतीताः' च. पाठः.

$ 'तृचाः प्रउगे' इति आ० श्रौ० सू० ७. १. ९. * 'त्यमूषु वाजिनं देवजूतमिति तार्क्ष्यमग्रे निष्केवल्यसूक्तानाम्'। 'जातवेदसे सुनवाम सोममित्याग्निमारुते जातवेदस्यानाम्' इति आ० श्रौ० सू० ७. १. १२, १३. † ऋक्सं० ८. ८. ३०. १. ‖ ऋक्सं० ६. २. ३६. १. ‡ ऋक्सं० ८. ८. १५. १. § 'आयाहि वनसेमा नु कं बभ्रुरेक इति द्विपदा सूक्तानि पुरस्ताद् वैश्वदेवसूक्तानाम्' आ० श्रौ० सू० १८. ७. २४. ¶ 'पृष्ठ्यः षळहः पूर्वस्त्र्यहश्छन्दोमाः' इति आ० श्रौ० सू० ८. ७. १८.

पूर्ववत्।

॥ गायत्री छन्दः ॥

तुङ् नात्र *वा पदान्तस्य वहतीत्येव वर्तते।

॥ यथादेवतमेनेन यथास्तोमं यथासाम यथाछन्दसं राघ्नोति य एवं वेद ॥

सः।

देवच्छन्दःस्तोमसामान्यनतिक्रम्य वेदिता।
‡एनेन प्रथमेनाह्ना राद्धिं सम्पदमश्नुते ॥

यथाछन्दसम्। §'अनसन्तेति' टच्। तुङ् न।

॥ यद्वा एति च प्रेति च तत् प्रथमस्याह्नो रूपम् ॥

आङ्प्रोपसर्गवद् योग्यं¶ प्रथमेऽह्नीति गृह्यताम्।
अनुरूपं रूपमर्हं योग्यं पर्यायवाचकाः।

किञ्च,

॥ यद्युक्तवद् यद्रथवद् यदाशुमद् यत् पिबवद् यत् प्रथमे पदे देवता निरुच्यते यदयं लोकोऽभ्युदितो यद् राथन्तरं यद् गायत्रं यत् करिष्यदेतानि वै प्रथमस्याह्नो रूपाणि ॥

वै चेत्य(र्थौर्थे)। युक्तवद् युजिर्योग इति धातुमत् रथशब्दाद्यु-

---

[*] पा० सू० ८.४.५९. [‡] 'अनेन वेदनेन' इति सायणः। [§] पा० सू० ५.४.१०३.

[¶] 'रूपं व्यावर्तकम् आकार इत्यनर्थान्तरम्। तच्च रूपं द्वेधा भवति शब्दरूपम् अर्थरूपं चेति। क्वचिच्छब्दरूपतया परिगृह्यते यथा– 'प्रेह वो मनसः' इत्यार्भवे सूक्ते 'प्रतिजातिर्वर्पस इत्यनेन प्रेतिरूपम्। क्वचिदर्थरूपतया यथा– करिष्यत् कुर्वत् कृतम् इति। एवं तत्र तत्राह्नो रूपमित्युक्ते द्रष्टव्यम्' इति गोविन्दस्वामी. 'रूपं लक्षणमित्यर्थः' इति सायणः।

शब्दपिबशब्दवन्ति च यानि, यद् यत्र प्रथमे आद्ये पदे पादे देवता निरुच्यते स्पष्टमभिधीयते, यद् यत्र चायं पृथिव्याख्यो लोकः अभि सम्यग् उदितः वदेर्थजादेः क्तः इद्, यच्च रथन्तरपृष्ठगायत्रीसम्ब(न्धीद्धं), यच्च *करिष्यत् कृञो भविष्यत्प्रत्ययान्तं पदं, तान्येतान्याद्यस्याह्नो योग्यानि । तत्र,

॥ ‡ उपप्रयन्तो अध्वरमिति प्रथमस्याह्न आज्यं भवति ॥

इदं नवर्चमस्मात् प्राक् तूष्णींशंसो निविन्तथा ।
उत्तरत्राप्येवमाज्ये §प्र वो देवेत्यपोद्यते ।
सर्वत्र वैकृतैरुक्तैः प्राक्(तेऽप्येतो ह्ये)व बाध्यते ।

॥ प्रेति प्रथमेऽहनि ॥

प्रथमेऽहनि योज्यं तु प्रशब्दवदितीरितम् ।
एतच्चैवंरूपयुक्तं सङ्गतं खल्वभूदिति ॥
उत्तरत्रापि सर्वत्र वाक्यशेषोऽयमिष्यताम् ॥

ततश्चेदं,

॥ प्रथमस्याह्नो रूपम् ॥

आज्यं शस्त्रमिति प्रोक्तं प्रउगं प्रब्रवीत्यथ—

॥ $वायवायाहि दर्शतेति प्रउगम् ॥

सूक्तद्वये तृचाः सप्त प्रागेभ्यः स्युः पुरोरुचः ।

---

* 'करिष्यद् इति भविष्यत्कालाभिधानं विवक्षितं न धात्वर्थः' इति गोविन्दस्वामी.
ऋक्सं० १. ५. २१. १. 'उप प्रयन्त इति तु प्रथमेऽहन्याज्यम्' इति आ० श्रौ० सू० ७. ११. ३. § ऋक्सं० ३. १. १३. १. $ ऋक्सं० १. १. ३. १.

॥ एति प्रथमेऽहनि ॥

आयाहीति ।

॥ प्रथमस्याह्नो रूपम् ॥

आज्यप्रउगशस्त्रे द्वे प्रातस्सवनगे[1] गते ।
मरुत्वतीयमाहाथ शस्त्रं माध्यन्दिने पुरः—

॥ [*]आत्वा रथं यथोतय [‡]इदं वसो सुतमन्ध इति मरुत्वतीयस्य प्रतिपदनुचरौ[§] ॥

तृचौ ।

॥ रथवच्च पिबवच्च प्रथमेऽहनि ॥

आत्वा रथम् अन्धः पिबेति ।

॥ प्रथमस्याह्नो रूपम् । [$]इन्द्र नेदीय एदिहीतीन्द्रनिहवः प्रगाथः[¶] ॥

[†]द्वृचतृचः खैलिकः[2] ।

॥ प्रथमे पदे देवता निरुच्यते प्रथमेऽहनि ॥

---

१. 'सवन ईरिते' क. ग. च. पाठः. २. 'खैलिको द्वृचतृचः' क. घ. पाठः.

---

[*] ऋक्सं० ६.५.१.१. [‡] ऋक्सं० ५.७.१७.१. [§] 'आत्वा रथं यथोतये इदं वसो सुतमन्ध इति मरुत्वतीयस्य प्रतिपदनुचरौ' आ० श्रौ० सू० ५.१४.४. [$] ऋक्सं० ६.४.२३.१. [¶] 'इन्द्र नेदीय एदिहीतीन्द्रनिहवः प्रगाथः' आ० श्रौ० सू० ५.१४.५.

[†] 'द्वृच' इत्येव मातृकासु दृश्यते । उपपत्तिश्चिन्त्या ।

इन्द्रेति ह्याद्यपादेऽस्ति सम्बुद्ध्यन्तं वचेस्त यक्।

॥ प्रथमस्याह्नो रूपम् ॥

॥ [‡]प्रैतु ब्रह्मणस्पतिरिति ब्राह्मणस्पत्यः ॥

प्रगाथ इत्येव द्वृचतृचः।

॥ प्रेति प्रथमेऽहनि प्रथमस्याह्नो रूपम् ॥

॥ [*]अग्निर्नेता [§]त्वं सोमक्रतुभिः [$]पिन्वन्त्यप इति धाय्याः[¶] ॥

तिस्रः।

॥ प्रथमेषु पदेषु देवता निरुच्यन्ते प्रथमेऽहनि ॥

आद्यपादेष्वग्निसोममरुतोऽत्र वचेर्ज्ञ यक्।

॥ प्रथमस्याह्नो रूपम् ॥

॥ [†]प्र व इन्द्राय बृहत इति मरुत्वतीयः प्रगाथः[‖] ॥

द्वृचः।

॥ प्रेति प्रथमेऽहनि ॥

प्र व इति।

॥ प्रथमस्याह्नो रूपम् ॥

[‡] ऋक्सं० १. ३: २०, ३. [*] ऋक्सं० ३. १. २०. ४. [§] ऋक्सं० १. ६. १९. २. [$] ऋक्सं० १. ५. ७. १. [¶] ‘अग्निर्नेता त्वं सोमक्रतुभिः पिन्वन्त्यप इति धाय्याः’ आ० श्रौ० सू० ५. १४. १७. [†] ऋक्सं० ६. ६. १२. ३. [‖] ‘प्र व इन्द्राय बृहत इति मरुत्वतीयः प्रगाथः आ० श्रौ० सू० ५. १४. १८.

॥ *आयात्विन्द्रो वस उप न इति सूक्तम् ॥

एकादशर्चं निविद्धानम् । अत्र षट् शस्त्वा निवित् । उक्तं हि—

प्रातस्सवन आज्ये तु सूक्तात् प्रागेव निविद्भवेत् ।
तृतीयसवने चापि प्रागन्त्याया भवेन्निवित् ॥
माध्यन्दिने युग्मसङ्ख्ये मध्ये त्वयुजि वै पुनः ।
एकाधिके[1](र्धा१ र्धे)तु गत आद्यायाः परतस्तृचः§ ॥

इति ।

॥ एति प्रथमेऽहनि प्रथमस्याह्नो रूपम्[2] ॥

मरुत्वतीयमित्युक्तं निष्केवल्यमथोच्यते—

॥ †अभि त्वा शूर नोनुमो ¶ऽभि त्वा पूर्वपीतय इति ॥

स्तोत्रियानुरूपौ द्व्यृचतृचौ । कुतः ।

॥ रथन्तरं पृष्ठं भवति‡ ॥

यस्मादत्रेति शेषः ।

॥ राथन्तरेऽहनि प्रथमेऽहनि ॥

पुनः किमर्थमहनीत्येवं (चोद्यं?) चेत् पृच्छ तां श्रुतिम् ।
प्रतिपद्यामहे ह्युक्तं पूर्वत्रात्र परत्र च ॥

---

[1] 'अर्धाधिके' [2] 'रूपम् अभित्वा' घ: पाठः

* ऋक्सं० ३. ६. ५. १. § तथाच आ० श्रौ० सू०— 'उत्तमेन पदेन प्रवो देवायेत्याज्यमुपसंतनुयात्' (५. ९. १५.) 'एकां शिष्ट्वा तृतीयसवने' ५. १४. २३. 'एकभूयसीः शस्त्वा मरुत्वतीयां निविदं दध्यात् सर्वत्र', 'एवमयुजासु माध्यन्दिने', 'एकां तृचे अर्धा युग्मासु'(५. १४, २०, २१, २२) इति । † ऋक्सं० ५. ३. २१. २. ¶ ऋक्सं० ५. ७. २६. २. ‡ 'अभित्वाशूरनोनुमोऽभित्वा पूर्वपीतय इति प्रगाथौ यदि रथन्तरं पृष्ठम्' इति आ० श्रौ० सू० ५. १५. १.

॥ प्रथमस्याह्नो रूपम् ॥

॥ *यद्वावान पुरुतमं पुराषाळिति धाय्या§ ॥

एका ।

॥ आ वृत्रहेन्द्रो नामान्यप्रा इति ॥

अस्ति ।

॥ एति प्रथमेऽहनि प्रथमस्याह्नो रूपम् ॥

॥ ‡पिबा सुतस्य रसिन इति सामप्रगाथः ॥

द्व्यृचः ।

॥ पिबवान् प्रथमेऽहनि प्रथमस्याह्नो रूपम् ॥

॥ †त्यमू षु वाजिनं देवजूतमिति तार्क्ष्यं पुरस्तात् सूक्तस्य शंसति ॥

निष्केवल्यनिविद्धानात् प्राक् तु शंसेत् त्यमूतृचम्¶ ।
स्तौति—

॥ स्वस्त्ययनं वै तार्क्ष्यः ॥

अविनष्टगतेर्हेतुरेष तार्क्ष्यः श्रुतः खलु

---

[*] ऋक्सं० ८. ३. ५. ६. § 'यद्वावानेति धाय्या पिबा सुतस्य रसिन इति सामप्रगाथः' आ० श्रौ० सू० ५. १५. २१. ‡ ऋक्सं० ५. ७. २५. १. † ऋक्सं० ८. ८. ३६. १. ¶ द्वितीयादिषु त्यमू षु वाजिनं देवजूतमिति तार्क्ष्यमग्रे निष्केवल्यसूक्तानाम्' इति आ० श्रौ० सू० ७. १. १३.

$ 'तद्यथा क्षेत्रज्ञ'मिति विष्णुरत्यद्भुतात्महि ॥

अत इदं,

॥ स्वस्तितायै ॥

स्यात् ।

॥ स्वस्त्ययनमेव तत् कुरुते स्वस्ति संवत्सरस्य पारमश्नुते य एवं
वेद ॥

उक्तार्थम्[1]* ॥

प्रथमः खण्डः ।

॥ †आ न इन्द्रो दूरादा न आसादिति सूक्तम्§ ॥

एकादशर्चं निविद्धानम् ।

॥ एति प्रथमेऽहनि ॥

आ न इति ।

---

[1] 'म् । सुः' । क. ग. पाठः.

$ ऐ० ब्रा० १८. ६. * Page 58. † ऋक्सं० ३. ६. ३ १.

§ तथा चाश्वलायनसूत्रमपि—. 'आ यात्विन्द्रोऽवस इति नस्तृतीयमा न इन्द्र इति निष्केवल्यं प्रथमस्याभिप्लविकस्य' इति ७. ५. १८.

॥ प्रथमस्याह्नो रूपम् ॥

अथार्के द्वे निविद्धाने सम्पातौ तौ प्रशंसयन्

॥ सम्पातौ भवतो निष्केवल्यमरुत्वतीययोर्निविद्धाने ॥

आयात्वा न इति द्वे ते सम्पातौ कथमुच्यते ।

॥ वामदेवो वा इमाँल्लोकानपश्यत् ॥

इमान् भूस्स्वर्गलोकांस्तपसा दृष्टवान् मुनिः ।
वामदेवो ब्रह्मभूतस्ततः किमत उच्यते –

॥ तान् सम्पातैः समपतत् ॥

प्राप्त्यर्थः सम्पातिर्लोकान् सम्प्रापत् ब्रह्मदर्शनात् ।
करणे घञ् पतेर्ऽन्यत्र वृद्धिरङ् तिङन्तश्च लङ् ।

॥ यत् सम्पातैः समपतत् तत् सम्पातानां सम्पातत्वम् । तद् यत् सम्पातौ प्रथमेऽहनि शंसति स्वर्गस्य लोकस्य समष्ट्यै सम्पत्त्यै सङ्गत्यै ॥

स्यात्

आर्जनप्राप्त्यनुभवा आप्तिसम्पत्तिसङ्गमाः ।
तृतीयसवने शस्त्रं वैश्वदेवं ब्रवीत्यथ[*] —

॥ [§]तत्सवितुर्वृणीमहे[$]ऽद्या नो देव सवितरिति वैश्वदेवस्य

---

[*] 'अथ द्वयोस्तृचयोः रथन्तरसम्बन्धरूपं लक्षणं दर्शयति' इति सायणीयावतारिका ।

[§] ऋक्सं० ४. ४. २५. १. [$] ऋक्सं० ४. ४. २५. ४.

प्रतिपदनुचरौ[1][*] ॥

तृचौ ।

॥ राथन्तरेऽहनि प्रथमेऽहनि प्रथमस्याह्नो रूपम् ॥

राथन्तरस्समनयोर्युक्तं श्रुत्यन्तरे श्रुतम् ।

॥ [†]युञ्जते मन उत युञ्जते धिय इति सावित्रम्[‡] ॥

पञ्चर्चं निविद्धानम् ।

॥ युक्तवत् प्रथमेऽहनि ॥

युञ्जत इति युजिधातुमत् ।

॥ प्रथमस्याह्नो रूपम् ॥

॥ [§]प्र द्यावा यज्ञैः पृथिवी ऋतावृधेति द्यावापृथिवीयम् ॥

पञ्चर्चं निविद्धानम् ।

॥ प्रेति प्रथमेऽहनि प्रथमस्याह्नो रूपम् ॥

॥ [¶]इहेह वो मनसा बन्धुता नर इत्यार्भवम् ॥

---

[1] 'रौ राथ' ब. पाठः ।

[*] 'तत्सवितुर्वृणीमहेऽद्या नो देव सवितरिति वैश्वदेवस्य प्रतिपदनुचरौ' आ० श्रौ० सू० ५. १८. ५. [†] ऋक्सं० ४. ४. २१. १. [‡] 'वैश्वदेवाग्निमारुतयोः सूक्तेषु सावित्रादिनिविदो दध्यात्' आ० श्रौ० सू० ५. १८. ६. [§] ऋक्सं० २. ३. २. १. [¶] ऋक्सं० ३. ४. ७. १.

निविद्धानं चतुर्ऋचम् । सूत्र्यते हि[*]— 'इहेह व इति चतस्रः' इति । इहेहशब्दः स्तौति—

॥ यद्वा एति च प्रेति च तत् प्रथमस्याह्नो रूपम् ॥

इत्यत्र चाप्रेति शेषस्ततः किमत उच्यते—

॥ तद् यत् प्रेति सर्वमभविष्यत् प्रैष्यन्नेवास्माल्लोकाद्यजमाना इति ॥

अथरूपं किल भवतीति शेषोऽत्र गृह्यताम् ।
इणः सुतश्च लृङि तिप्ति स्यादट् प्राङितश्च षः ॥
तत्तत्र यद्यदि प्रेति सर्वमेव प्रशब्दवत्
अभविष्यत् तदा भूरयः प्रैष्यन् प्रजाः स्युर्न हि[†] ।
इत्यापतेदर्थरूपमथ तत्र निरुच्यते—

॥ तद्यदिहेह वो मनसा बन्धुता नर इत्यार्भवं प्रथमेऽहनि शंसत्ययं वै लोक इहेहास्मिन्नेवैनाँस्तल्लोके रमयति ॥

तत् तत्र शंसतीहाह्नि यत् तेन रमयत्यमून् ।
लोकेऽस्मिन्नत्र लोकोऽयमिहेहेति खलूच्यते ॥

॥ [§] देवान् हुवे बृहच्छ्रवसः स्वस्तय इति वैश्वदेवम्[†] ॥

निविद्धानं पञ्चदशर्चम् ।

॥ प्रथमे पदे देवता निरुच्यन्ते प्रथमेऽहनि ॥

---

[*] आ० श्रौ० सू० ७. ५. २३. । 'तद् यत् प्रेतीति । तदिति वाक्यनिर्देशः । तद् यस्माल्लोकात् गच्छति तत् सर्वमभविष्यत्पुनर्न भविष्यतीत्यर्थः । ततः किम् । ततोऽयं दोषः प्रसज्यते — प्रैष्यन्नेवास्माल्लोकाद्यजमाना इति । इकारलोपश्छान्दसः' इति गोविन्दस्वामी ।

[§] ऋक्सं० ८. २. १२. १. [†] 'युञ्जते मन इहेहव इति चतस्रो देवान् हुव इति वैश्वदेवम्' आ० श्रौ० सू० ७. ५. २३.

देवानिति ह्याद्यपदे विद्यते ज्ञापकौ वचः ।

॥ प्रथमस्याह्नो रूपम् ॥

स्तौति

॥ महान्तं वा एतेऽध्वानमेष्यन्तो भवन्ति ये संवत्सरं वा द्वादशाहं वासते ॥

महामार्गं गमिष्यन्त एते सम्यग् भवन्ति हि ।
ये द्वादशाहं सत्रं वा कुर्वते वै सुदुष्करम् ॥

ततः किम् ।

॥ तद्यद् देवान् हुवे बृहच्छ्रवसः स्वस्तय इति वैश्वदेवं प्रथमेऽहनि शंसति स्वस्तितायै ॥

शंसतीति यद्भवेत् तदविनष्टत्वसिद्धये ।

॥ स्वस्त्ययनमेव तत् कुरुते स्वस्ति संवत्सरस्य पारमश्नुते य एवं वेद ॥

सः ।

॥ येषां चैवं विद्वानेतद्धोता देवान् हुवे बृहच्छ्रवसः स्वस्तय इति वैश्वदेवं प्रथमेऽहनि शंसति ॥

तेऽपि संवत्सरस्येह पारं गच्छन्ति सत्रिणः
शस्त्रमुक्तं वैश्वदेवमुच्यतेऽथाग्निमारुतम् —

॥ *वैश्वानराय पृथुपाजसे विप इत्याग्निमारुतस्य प्रतिपत् ॥

---

*ऋक्सं० २. ८. २०. १.

एकादशमं निविद्धानम् प्रतिपदमष्टाक्षरात् करणे [illegible] क्षिप् ।

॥ प्रथमे पदे देवता निरुच्यते प्रथमेऽहनि ॥

वैश्वानरेत्याद्यपादे विद्यते नयश्रौ वचैः ।

॥ प्रथमस्याह्नो रूपम् ॥

॥ [*]प्रत्वक्षसः प्रतवसो विरप्शिन इति मारुतम् ॥

षळृचं निविद्धानम्

॥ प्रेति प्रथमेऽहनि प्रथमस्याह्नो रूपम् ॥

॥ [1] जातवेदसे सुनवाम सोममिति जातवेदस्यां पुरस्तात् सूक्तस्य शंसति [ᕫ] ॥

जातवेदस्यसूक्तात् प्राग् भवेदृग् जातवेदसे ।

॥ स्वस्त्ययनं वै जातवेदस्या ॥

भवार्थे यज्जातवेदोदेवतायामियं ह्यभूत् ।

सा च,

॥ स्वस्तितायै ॥

स्यात् ।

॥ स्वस्त्ययनमेव तत् कुरुते स्वस्ति संवत्सरस्य पारमश्नुते य एवं

---

[*] ऋक्सं० १. ६. १२. १. [1] ऋक्सं० १. ७. ८. १. [ᕫ] 'जातवेदसे सुनवाम सोममित्याभिमाते जातवेदस्यानाम्' आ० श्रौ सू० ७. १. १२.

वेद ॥

सः

॥ *प्रतव्यसीं नव्यसीं धीतिमग्नय इति जातवेदस्यम् ॥

अष्टर्चं निविद्धानम् ।

॥ प्रेति प्रथमेऽहनि प्रथमस्याह्नो रूपम् ॥

धाय्यादि सर्वशस्त्रेषु[1] प्राकृतस्थितमिष्यताम् ।

॥ समानमाग्निमारुतं भवति यच्चाग्निष्टोमे ॥

उक्तं यदग्निष्टोमे तत्तुल्यमत्राग्निमारुतम् ।

स्तौति –

॥ यद् वै यज्ञे समानं क्रियते तत्प्रजा अनुसमनन्ति ॥

विकृतौ प्राकृतं यत् स्यात् तदाश्वासकरं भवेत् ।
समानं तुल्यमनितः करणे धाजि गृह्यताम्[2] ॥
पुनः स्तौति—

॥ तस्मात् समानमाग्निमारुतं भवति ॥

सद्भावे तस्य ते तस्मिन् किमत्त[3]श्चापि कर्तरि ।
तस्मात्स्यात्तो[4] भव[5]त्तस्मादुपक्षयविनाशकृत(?) ॥

---

१. 'सर्वं शस्त्रेषु', २. 'गृह्यताम् । समानमाग्निमारुतं भवति दुःखं' घ. पाठः. ३. 'न्त' च. पाठः । ४. 'त्ता' ५, 'वे' ग. पाठः ।

* ऋक्सं० २. २ १२. १.

दुःखं वैकृतजं हन्ति तुल्यमत्राग्निमारुतम् ।
वैयूह्ळे नवरात्रेऽहः प्रथमं त्वेवमीरितम् ॥

द्वितीयः खण्डः ।

अथ द्वितीयं वैयूह्ळे नवरात्रेऽहरुच्यते—

॥ इन्द्रो वै देवता द्वितीयमहर्वहति पञ्चदशस्तोमो बृहत्साम त्रिष्टुप् छन्दः ॥

त्रिष्वप्येतेषु वाक्येषु वहतीत्यनुवर्तते[1] ।

॥ यथादेवतमेनेन यथास्तोमं यथासाम यथाछन्दसं राध्नोति य एवं वेद ॥

सः ।

यथाछन्दसमित्यत्र तुङ् ना*नेत्यादि टज्भवेत् ।

॥ यद्वै नेति न प्रेति यत् स्थितं तद् द्वितीयस्याह्नो रूपम् ॥

यद्यत्राङ् नास्ति नापि प्र स्यात् स्थितं तिष्ठतेः पदम् ।
रूपं योग्यं द्वितीयस्य तदह्न इति गृह्यताम्[2] ॥

---

[1]. 'वर्तते । यद्वै नेति', [2]. 'ताम् । यद्' घ. पाठः ।

---

* पा० सू० ५. ४. १०३.

द्वितीयस्याह्नः कानि रूपाणीति चेदुच्यते,

॥ यदूर्ध्ववद् यत् प्रतिवद् यदन्तर्वद् यद् वृषण्वद् यद् वृधन्वद् यन्मध्यमे पदे देवता निरुच्यते यदन्तरिक्षमभ्युदितं यद् बार्हतं यत् त्रैष्टुभं यत् कुर्वदेतानि वै द्वितीयस्याह्नो रूपाणि ॥

ऊर्ध्वार्थप्रतिशब्दान्तःशब्दवद् वृधिधातुमत् ।
वृद्धिमद् यद् *'छन्दसीरः' इति वत्वं प्रतमतोः ॥
वृषिमद् वृद्धिमच्चेति प्राप्तेऽन्यच्छान्दसं मतम् ।
यद् यत्र वा पदं पादे मध्यमे देवतोच्यते ॥
यद् यत्रोक्तमन्तरिक्षं बृहत्त्रिष्टुब्युतं च यत् ।
यच्च कुर्वद्वर्तमानकालप्रत्ययधातुमत् ॥
एतानि चैव योग्यानि द्वितीयस्याह्न इष्यताम् ।

तत्र,

॥ §आग्निं दूतं वृणीमह इति द्वितीयस्याह्न आज्यं भवति कुर्वद् द्वितीयेऽहनि ॥

द्वादशर्चमतः प्राक् तु तूष्णींशंसो निवित् तथा ।
वृङ् सम्भक्तौ वर्तमाने हि लट् श्ने§'हल्यघो'र्महिङ् ।

॥ द्वितीयस्याह्नो रूपम् ॥

प्रातस्सवन इत्याज्यमुक्तं प्रउगमुच्यते —

॥ ¶वायो ये ते सहस्रिण इति प्रउगम् ॥

---

* पा० सू० ८. २, १५. § ऋक्सं० १. १. २२. २. 'अग्निं दूतमिति द्वितीये' आ० श्रौ० सू० ७. १०. ३. § पा० सू० ६. ४. ११३. ¶ ऋक्सं० २. ८. ७. १.

आद्यर्थ इतिशब्दोऽत्र विशेषः सूच्यते खलु—

*‘वायो ये ते सहस्रिण इति द्वे तीव्राः सोमास आगहीत्येकोभा देवा दिविस्पृशेति द्वे शुक्रस्याद्य गवाशिर इत्येकायं वां मित्रावरुणेति पञ्च तृचाः’[1], ‘गार्त्समदं प्रउगमित्येतदाचक्षते’ इति। अर्थस्तु—

वाय्विन्द्रवायुमित्रावरुणाश्वीन्द्राः सविश्वकाः।
सरस्वती सप्त तृचभाजः प्रउगदेवताः॥
एकत्रिंशत्यृचे गार्त्समदेऽन्त्यस्त्यज्यतां तृचः।
द्वितीयायाः परं चात्र तीव्राद्यास्तिस्र आवपेत्॥
काण्वमेधातिथेरेता भूम्ना गृत्समदार्षता।
कात्यायनप्रणीतेवं सर्वानुक्रमणी खलु—

‡‘वायो सैका गायत्र्युक्ता देवताः प्रउगेणाद्ये तु तृचेऽन्त्यैन्द्रवायवी द्यावापृथिव्योऽन्त्यस्तृचो हाविर्धानो वा तृतीयः पादो[2] वाग्नेयोऽम्बितमेऽनुष्टुभौ बृहती च’ इति। गृत्समदोऽधिकृतः। तथा— §‘तीव्राश्चतुर्विंशतिर्वायव्यैन्द्रवायव्यौ’ इति च। अत्र काण्वो मेधातिथिरधिकृत इति।

॥ सुतः सोम ऋतावृधेति ॥

अयं वां मित्रावरुणा सुतः सोम ऋतावृधेति ह्यस्ति।

॥ वृधन्वद् द्वितीयेऽहनि द्वितीयस्याह्नो रूपम् ॥

इति द्वितीयं शस्त्रं तु प्रउगं सम्यगीरितम्।
मरुत्वतीयमाहाथ शस्त्रं माध्यन्दिने पुरः[3]—

---

[1] ‘पञ्चर्चाः’ घ. पाठः। [2] ‘पाद आग्ने’ क. पाठः, [3] ‘नः’ च. पाठः।

---

* आ० श्रौ० सू० ७. ६. २, ३. ‡ मं० २. सू० ४१. § मं० १. सू० २३.

॥ *विश्वानरस्य वस्पति†मिन्द्र इत् सोमपा एक इति मरुत्वतीयस्य प्रतिपदनुचरौ‡ ॥

तृचौ ।

॥ वृधन्वच्चान्तर्वच्च द्वितीयेऽहनि ॥

'अभिष्टये सदावृधम्' इति वृधिमत् । 'अन्तर्देवान् मर्त्यांश्च' इत्यन्तःशब्दवत् ।

॥ द्वितीयस्याह्नो रूपम् ॥

॥ §इन्द्र नेदीय एदिहीत्यच्युतः प्रगाथः ॥

अच्युतः नित्यः । वक्ष्यति च--ʃ 'समान इन्द्रनिहवोऽविभक्तः सोऽह्नाम्' इति । सूत्र्यते च- @'ध्रुव इन्द्रनिहवः' इति ।

॥ ¶उत्तिष्ठ ब्रह्मणस्पत इति ब्राह्मणस्पत्यः‖ ॥

प्रगाथ इत्येव । द्वृचतृचः ।

॥ ऊर्ध्ववान् द्वितीयेऽहनि ॥

ऊर्ध्वार्थोच्छब्दवानेष प्रगाथः सङ्गतोऽत्र हि ।

॥ द्वितीयस्याह्नो रूपम् ॥

---

* ऋक्सं० ६. ५. १. ४. † ऋक्सं० ५. ७. १७. ४. ‡ 'विश्वानरस्य वस्पतिमिन्द्र इव सोमपा एक इवि मरुत्वतीयस्य प्रतिपदनुचरौ' इति च आ० श्रौ० सू० ७. ६. ४. § ऋक्सं० ६. ४. २३. १. ʃ ऐ० ब्रा० ३१. १. @आ० श्रौ० सू० ७. ३. ७. ¶ ऋक्सं० १. ३. २०. १. ‖ 'मरुत्वतीये तु प्रैतु ब्रह्मणस्पतिरुत्तिष्ठ ब्रह्मणस्पत इवि ब्राह्मणस्पत्यावावपते पूर्वौ नित्यात्' आ० श्रौ० सू० ७. ३. १.

॥ [*]अग्निर्नेता [†]त्वं सोम क्रतुभिः [‖]पिबन्त्यप इति धाय्या अच्युताः ॥

नित्याः । वक्ष्यति च [§]‘समान्यो धाय्या अविभक्तास्ता अह्नाम्’ इति । ‘धाय्याश्चैव’ सूत्र्यते[¶] च ध्रुवा इत्यनुवर्तते ।

॥ [¶¶]बृहदिन्द्राय गायतेति मरुत्वतीयः प्रगाथः[+] ॥

द्व्यृचः ।

॥ येन ज्योतिरजनयन्नृतावृध इति ॥

अत्रास्ति ।

॥ वृधन्वान्[1] द्वितीयेऽहनि ॥

प्रगाथत्वेनात्र पुंस्त्वं सूक्तादौ हि नपुंसकम् ।

॥ द्वितीयस्याह्नो रूपम् ॥

॥ [&]इन्द्र सोमं सोमपते पिबेममिति सूक्तम् ॥

सप्तदशर्चं निविद्धानम् ।

॥ सजोषा रुद्रैस्त्रिपदा वृषस्वेति ॥

---

[1] ‘वृधन्वद्’ घ. पाठः.

---

[*] ऋक्सं० ३. ४. १०. ४. [†] ऋक्सं० १. ६. १९. २. [‖] ऋक्सं० १. ५. ७. १. [§] ऐ० ब्रा० ३६. १. [¶] आ० श्रौ० सू० ७. ३. ८. [¶¶] ऋक्सं० ६. ६. १२. १. [+] बृहदिन्द्राय गायत न किः सुदासो रथमिति मरुत्वतीया ऊर्ध्वं नित्यात्’ आ० श्रौ० सू० ७. ३. २. [&] ऋक्सं० ३. २. ९. १.

अस्ति[1]।

॥ वृषण्वद् द्वितीयेऽहनि ॥

वृषस्वेति वृषिमत्।

॥ द्वितीयस्याह्नो रूपम् ॥

मरुत्वतीयमित्युक्तं निष्केवल्यमथोच्यते[2]–

॥ [*]त्वामिद्धि हवामहे [†]त्वं ह्येहि चेरव इति ॥

स्तोत्रियानुरूपौ द्वृचतृचौ[‡]। कुतः।

॥ बृहत्पृष्ठं भवति ॥

यस्मादत्रेति शेषः।

॥ बार्हतेऽहनि द्वितीयेऽहनि द्वितीयस्याह्नो रूपम् ॥

॥ [§]यद्वावानेति धाय्याच्युता[3] ॥

नित्या।

॥ [¶]उभयं शृणवच्च न इति सामप्रगाथः ॥

द्वृचः। उभयपदं व्याचष्टे—

---

[1] 'अत्रास्ति', [2] 'निष्केवल्यमिहोच्यते' घ. पाठः [3] 'च्युता उभयं' ग. घ. पाठः।

[*] ऋक्सं ४. ७. २७. १. २. [†] ऋक्सं० ६. ४. ३७. २. [‡] यद्यु वै बृहत् त्वामिद्धि हवामहे त्वं ह्येहि चेरव इति' आ० श्रौ सू० ५. १५. ३. [§] ऋक्सं० ८. ३. ५. ६. [¶] ऋक्सं० ६. ४. ३६. १.

॥ यच्चेदमद्य यदु च ह्य आसीदिति ॥

ह्योऽतीतेऽहनि यच्चासीद् यच्चाद्य तदिदं द्वयम् ।
शृणवच्छृणुयादिन्द्रः समृद्ध्या इति कथ्यते ॥

॥ बार्हतेऽहनि द्वितीयेऽहनि द्वितीयस्याह्नो रूपम् ॥

बृहत्पृष्ठे प्रगाथोऽयमुभयं शृणवच्छ्रुतः ।
श्रूयते हि* – 'उभयं शृणवच्च न इति बृहत' इति ।

॥ §त्यमू षु वाजिनं देवजूतमिति तार्क्ष्योऽच्युतः ॥

तृतीयः खण्डः ।

॥ ¶या त ऊतिरवमा या परमेति सूक्तम् ॥

नवर्चेऽत्र तु पञ्चम्या निर्वृष्ण्यं निधीयते ।

॥ जहि वृष्ण्यानि कृणुही पराच इति ॥

अस्ति ।

॥ वृषण्वद् द्वितीयेऽहनि द्वितीयस्याह्नो रूपम् ॥

निष्केवल्यमिति प्रोक्तं वैश्वदेवमथोच्यते—

---

* आ० श्रौ० सू० ७. ३. १८. § ऋक्सं० ८.८. ३६.१. ¶ ऋक्सं० ४. ६. १९. १.

॥ [*]विश्वो देवस्य नेतु[†]स्तत्सवितुर्वरेण्य[‡]मा विश्वदेवं सत्पतिमिति वैश्वदेवस्य प्रतिपदनुचरौ ॥

तृचावाद्योऽत्र सम्भाव्यस्तृच एवं हि[‖] सूत्र्यते—

‘विश्वो देवस्य नेतुरित्येका तत्सवितुर्वरेण्यमिति द्वे’ इति ।

॥ बार्हतेऽहनि द्वितीयेऽहनि द्वितीयस्याह्नो रूपम् ॥

अनयोर्बार्हतत्वं च युक्तं श्रुत्यन्तरे श्रुतम् ।

॥ [§]उदुष्य देवः सविता हिरण्ययेति सावित्रम् ॥

तृचं निविद्धानम् । सूत्र्यते हि[ʃ]— ‘उदुष्य देवः सविता हिरण्ययेति तिस्रः’ इति ।

॥ ऊर्ध्ववद्[1] द्वितीयेऽहनि ॥

उच्छब्दो ह्यूर्ध्वार्थः ।

॥ द्वितीयस्याह्नो रूपम् ॥

॥ [¶]ते हि द्यावापृथिवी विश्वशम्भुवेति द्यावापृथिवीयम् ॥

पञ्चर्चं निविद्धानम् ।

---

[1] ‘ऊर्ध्वं द्वितीये’ घ, ‘ऊर्ध्ववान् द्वितीये क, ग, च. पाठः.

---

[*] ऋक्सं० ४. ३. ४. १. [†] ऋक्सं० ३. ४. १०. ५. [‡] ऋक्सं० ४. ४. २६. २. [‖] आ० श्रौ० सू० ७. ६. ६. [§] ऋक्सं० ५. ४. ५. १. [ʃ] आ० श्रौ० सू० ७. ४. १२. [¶] ऋक्सं० २. ३. ३. १.

॥ सुजन्मनी धिषणे अन्तरीयत इति ॥

अस्ति ।

॥ अन्तर्वद् द्वितीये[1]ऽहनि द्वितीयस्याह्नो रूपम् ॥

॥ [*]तक्षन्रथं सुवृतं विद्मनापस इत्यार्भवम् ॥

पञ्चर्चं निविद्धानम् ।

॥ तक्षन् हरी इन्द्रवाहा वृषण्वसू इति ॥

अस्ति ।

॥ वृषण्वद् द्वितीयेऽहनि द्वितीयस्याह्नो रूपम् ॥

॥ [†]यज्ञस्य वो रथ्यं विश्पतिं विशामिति वैश्वदेवम्[§] ॥

पञ्चदशर्चं निविद्धानम् ।

॥ वृषाकेतुर्यजतो द्यामशायतेति ॥

अस्ति ।

॥ वृषण्वद् द्वितीयेऽहनि द्वितीयस्याह्नो रूपम् ॥

एतत् स्तौति—

---

[1] 'अन्तर्द्वितीये' घ. पाठः.

---

[*] ऋक्सं० १. ७. ३२. १. [†] ऋक्सं० ८. ४. २३. १. [§] 'ते हि द्यावापृथिवी यज्ञस्य वो रथ्यमिति वैश्वदेवम्'। आ० श्रौ सू० ७. ४. ११.

॥ तद्धु शार्यातम् ॥

उ खलु ।

सूक्तं यज्ञस्य वो रथ्यं शार्यातेन नृपर्षिणा ।
दृष्टमेतद् यः स्वकन्यां[1] च्यवनायर्षये ददौ ॥
जीर्णायाश्विप्रसादाप्तयुवत्वाय सुरूपिणीम्* ।
†'जुजुरुषो नासत्योत वव्रिमि'त्यध्यगीष्महि ।

अत्र[2] कथामाह—

॥ अङ्गिरसो वै स्वर्गाय लोकाय सत्रमासत ॥

वै पुरा । स्वर्गाय स्वर्गं प्राप्तुम् ।

॥ ते ह स्म द्वितीयं द्वितीयमेवाहरागत्य मुह्यन्ति ॥

ते अङ्गिरसः । मुह्यन्ति स्म । ‡वीप्सानेकप्रयोगसूचनार्था । आगत्य प्राप्य ।

॥ तान् वा एतच्छार्यातो मानवो द्वितीयेऽहनि सूक्तमशंसयत् ॥

अत्र प्रयोगमूढांस्ताण्णिचः शंसेर्लङ्द्रातिपः ।
मनोर'प्योर्गुणो' §ऽपत्ये वै त्वरायामशंसयत् ॥

॥ ततो वै ते प्र यज्ञमजानन्[3] ॥

प्राजानन् ।

---

[1] 'सुकन्यां' क. ग. पाठः । [2] 'तत्र', [3] 'जानन् । प्र स्वर्गं' घ पाठः ।

---

* कथा चेयं भारते वनपर्वणि १२४ तमे अध्याये द्रष्टव्या । † ऋक्सं० १. ८. ९. १.
‡ 'वीप्सावचनमनेकप्रयोगापेक्षम्' इति गोविन्दस्वामी । § पा० सू० ६. ४ १४६.

॥ प्र स्वर्गं लोकम् ॥

अजानन् इत्येव ।

सत्रलब्धं स्वकं स्वर्गं प्राजानन् मुनयस्ततः ।

॥ तद् यदेतत् सूक्तं द्वितीयेऽहनि शंसति यज्ञस्य प्रज्ञात्यै स्वर्गस्य लोकस्यानुख्यात्यै ॥

स्यात् ।

प्रज्ञातिः कर्मणो ज्ञानमनुख्यातिः प्रकाशनम् ।
इति प्रोक्तं वैश्वदेवमुच्यतेऽथाग्निमारुतम्—

॥ [*]पृक्षस्य वृष्णो अरुषस्य नू सह इत्याग्निमारुतस्य प्रतिपत् ॥

सप्तर्चं निविद्धानम् ।

॥ वृषण्वद् द्वितीयेऽहनि द्वितीयस्याह्नो रूपम् ॥

॥ [†]वृष्णे शर्धाय सुमखाय वेधस इति मारुतम् ॥

पञ्चदशर्चं निविद्धानम् ।

॥ वृषण्वद् द्वितीयेऽहनि द्वितीयस्याह्नो रूपम् ॥

॥ [‡]जातवेदसे सुनवाम सोममिति जातवेदस्याच्युता । [§]यज्ञेन वर्धत जातवेदसमिति जातवेदस्यम् ॥

त्रयोदशर्चं निविद्धानम् ।

---

[*] ऋक्सं० ४. ५. १०. १. 'पृक्षस्य वृष्णो वृष्णे शर्धाय यज्ञेन वर्धतेत्याग्निमारुतम्' इति च आ० श्रौ० सू० ७. ४. १३. [†] ऋक्सं० १. ५. ६. १. [‡] ऋक्सं० १. ७. ७. १.
[§] ऋक्सं० २. ५. २०. १.

॥ वृधन्वद् द्वितीयेऽहनि ॥

वर्धतेति वृधिमत् ।

॥ द्वितीयस्याह्नो रूपमह्नो रूपम् ॥

द्विरुक्तिरुक्तार्था * ।

चतुर्थः खण्डः ।

इति षड्गुरुशिष्यविरचितायां महिदासैतरेयब्राह्मणवृत्तौ [1]
सुखप्रदायां विंशोऽध्यायः ।

द्वितीये दशके खण्डा त्र्यशीतिरिह सङ्ख्यया ।
एकादश त्रयोदश चतुर्दश षळेव षट् ॥
षळष्टाष्ट [2] पुनः षट् च चत्वारोऽध्यायगास्तु ते ।
दशकद्वयगा खण्डास्त्रिपञ्चाशच्छतं गताः [3] ॥

---

[1] इति ब्राह्मणव्याख्यायां विंशोऽध्यायः ब. पाठः. [2] 'ष्ट षट् पुनश्च च' क. ग. घ. पाठः. [3] गताः ।

क्षेत्रपालं वीरभद्रं भद्रकालीं विनायकम् ।
दुर्गां च सर्वकार्येषु विघ्नशान्त्यै नमाम्यहम् ॥
सुवर्णभूषणार्थाढ्या शुभाङ्गस्वरलक्षणा ।
लसत्पदक्रमा श्रीमत्पृग्वधूः कामदास्तु वः ॥ ख. पाठः

---

* Vol. I. Page 44.

अथैकविंशोऽध्यायः ।

वर्ण्यते नवरात्रस्याथ तृतीयमहर्महत्—

॥ विश्वे वै देवा देवतास्तृतीयमहर्वहन्ति[*] । सप्तदशस्तोमो वैरूपं साम जगती छन्दः ॥

प्रकृतं तु वहन्तीति वहतीत्यनुवर्तते ।

॥ यथादेवतमेनेन यथास्तोमं यथासाम यथाच्छन्दसं राध्नोति य एवं वेद[†] ॥

॥ यद्वै समानोदर्कं तत् तृतीयस्याह्नो रूपम् ॥

---

[*] विश्वे वै देवा इत्यादि । ननु न केवलं वैरूपमेव साम तृतीयमहर्वहति । गायत्रादीन्यपि च वहन्त्येव । सत्यम्; असाधारणेन हि पृष्ठसाधनत्वेन व्यपदेशो भवति । साधारणानि च गायत्रादीनि तृतीयस्यान्यस्य च । किञ्च विरोधिव्यावर्तकतया विशेषणं भवति । एकार्थतया हि विरोधो भवति । स्तुत्यन्तरसाधनत्वाच्च गायत्रादीनामविरोधो वैरूपेण । अतो युक्तं वैरूपं साम तृतीयमहर्वहतीति । ननु पृष्ठस्तुत्यन्वयेनापि विरोधो न घटते, अस्याह्नो राथन्तरत्वात् । वक्ष्यति हि— 'राथन्तरं ह्येतदहरायतनेन' इति । न केवलं ब्राह्मणवाद एव । आह च 'तृतीयादिषु पृष्ठ्यस्यान्वहं द्वितीयानि वैरूपवैराजशाक्वररैवतानि' इति (आ० श्रौ० सू० ७.५.४.) । एतदुक्तं भवति । अयुग्मेष्वहस्सु रथन्तरं पृष्ठं भवति । युग्मेषु बृहत् । तृतीयादिष्वहस्सु वैरूपादीनि द्वितीयानि समुच्चयेरन् इति । तस्माद् वैरूपं वा साम वहेद्, राथन्तरं वाहः स्यादिति । अत्रोच्यते— पृष्ठ्यः षडहो बृहद्रथन्तरसाम इति वचनात् षण्णामह्नां साधारणे बृहद्रथन्तरे । वैरूपादीनि तु तृतीयादिषु प्रातिस्विकानि । अतो वैरूपादीनां वहनं युक्तम् । यद्वा पृष्ठ्यः षडहो बृहद्रथन्तरसामेति वचनाद् वैरूपादीनां योनिशंसनमात्रमेव स्यात् । आह च 'अक्रियायां योनिं शंसेत्' इति । एवं च सति राथन्तरं ह्येतदहरिति तत्र निर्देश उपपन्नो भवति । वैरूपादिवहनं च योनिद्वारेणेति युक्तम् । एवमन्यत्रापि द्रष्टव्यानि' इति गोविन्दस्वामी ।

[†] इतः परं पत्रमेकं लुप्तं ग. पाठे ।

तुल्यो भाग उदर्कः$ स्याद् वस्त्रोदर्कादि वै यथा ।
अभ्यासन समानत्वं यत्र तद्यो(गोग्य)मत्र वै ॥

किञ्च,

॥ यदश्ववद् यदन्तवद् यत् पुनरावृत्तं यत् पुनर्निनृत्तं यद्रतवद् यत् पर्यस्तवद् यत् त्रिवद् यदन्तरूपं यदुत्तमे पदे देवता निरुच्यते यदसौ लोकोऽभ्युदितो यद्वैरूपं यज्जागतं यत्कृतमेतानि वै तृतीयस्याह्नो रूपाणि ॥

अश्वान्तशब्दवद् यच्च पुनरावृत्तमेव यत् ।
वर्णावृत्तियुतं यच्च निनृत्तं[1] पुनरेव यत् ॥
पदावृत्त्या तु संहितं वर्णावृत्तियुतं तु वा ।
पादैकदेशविक्षेपो निनृत्तोक्तेर्हि कारणम् ॥
रमिधातुयुतं यच्च परिपूर्वोऽस्यतिः स्थितः[2] ।
यच्च त्रिशब्दवद् वत्वं *छन्दसीरो मतोस्त्रियः(?) ॥
अन्तरूपं समाप्त्यर्थवाचि यच्च पदं भवेत् ।
यद् यत्र वा पदे पादे तूत्तमे देवतोच्यते ॥
यद् यत्र वा द्युलोकोऽसावुदितो हि समीरितः ।
यंच्च वैरूपसम्बन्धि यज्जगत्या समन्वितम् ॥
यत् कृतं भूतकालोक्तप्रत्ययान्वित[3]धातुमत् ।
एतानि च तृतीयस्य योग्यान्यह्नोऽवधार्यताम् ॥

अत्र,

---

[1] 'निवृत्तं', [2] 'स्थितिः', । [3] प्रत्ययान्वयिधा' ख. पाठः ।

$ अयमर्थः कोशेषु न दृश्यते । 'उदर्कः समाप्तिः' इति सायणः, 'उदर्कोऽन्तः' इति गोविन्दस्वामी । * पा० सू० ८. २. १५.

॥ [*]युक्ष्वा हि देवहूतमाँ अश्वाँ अग्ने रथीरिवेति तृतीयस्याह्न आज्यं भवति[§] ॥

षोळशर्चम् ।

अत्र कथामाह---

॥ देवा वै तृतीयेनाह्ना स्वर्गं लोकमायन् ॥

वै पुरा ।

॥ तानसुरा रक्षांस्यन्ववारयन्त ॥

तान् देवान् दैत्या रक्षांसि चानुद्रुत्यारुधन् । अथ,

॥ ते विरूपा भवत विरूपा भवतेति भवन्त आयन् ॥

ते देवाः । 'क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः'[‖] । यथा (सिद्धं तु [†] विध्यनुप्रयोगः) । विरूपा भवतेति भवन्त इति अतोऽतिरिक्तं छान्दसम् [†] । इणभिमतार्थः [$] ।

रक्षोदैत्यैरभिभवाद् देहक्लेशान्विताः सुराः ।

॥ ते यद्विरूपा भवत विरूपा भवतेति भवन्त आयंस्तद्वैरूपं सामाभवत् ॥

[¶]यद् यदा तत् तदा ।

---

[*] ऋक्सं० ६. ५. २४. १. [§] 'तृतीये युक्ष्वाहीत्याज्यम्' इति आ० श्रौ० सू० ७. १०. ३. [‖] पा० सू० ३. ४. २. [$] 'विरूपा नानारूपा अशोभनरूपा भवत इत्येवं भवन्तो वदन्त आयन्' इति गोविन्दस्वामी। 'विरूपा विरुद्धरूपोपेता भवतेति शपित्वा भवन्तः स्वेनैव रूपेणाविर्भवन्तः आयन् स्वर्गं प्रत्यागच्छन्। विरूपा भवतेति वीप्सा सर्वदेवोक्तिद्योतनार्था-सुरशापेऽत्यन्तमादरार्था वा' इति सायणः। [¶] 'यद् यस्मात् तत् तस्माद्' इति सायणः ।

॥ तद्वैरूपस्य वैरूपत्वम्। विरूपः पाप्मना भूत्वा पाप्मानमपहते य एवं वेद ॥

सः।

पूर्वं पापाभिभूतस्तु वेदितः नाशयेदघम्।

॥ तान् ह स्मान्वेवागच्छन्ति समेव सृज्यन्ते ॥

तान् देवान्। एव पुनः। ह द्रुतम्। असुरा रक्षांसि चागच्छन्ति स्म। अनुद्रुत्य च संसृज्यन्ते; कर्तरि लङः कर्मणि लट्, समसृजन्। अभवन् (?)। ते देवाश्च।

॥ तानश्वा भूत्वा पद्भिरपाघ्नत ॥

तान् रक्षोदैत्यान्। पद्भिः पादैः। अपाघ्नन्।

॥ यदश्वा भूत्वा पद्भिरपाघ्नत तदश्वानामश्वत्वम् ॥

यद् यदा तत् तदादि*।

अश्वाः समर्था युधीति तदादि प्रथितं ह्यभूत्§।

॥ अश्नुते यद्यत् कामयते य एवं वेद ॥

सः।

---

* 'यस्मात् तस्मात् इति सायणः। § 'यस्मादेवमश्वा भूत्वा पद्भिर्हतवन्तस्तस्माल्लोकेऽपि पादताडनकुशलानां चतुष्पदामश्वनाम सम्पन्नम्' इति सायणः। 'यस्मादेवं तस्मादश्वशब्दनिर्वचनम्। अपाघ्नतेत्यस्मादश्व इति विप्रतिषिध्यति। तत्कथम्, 'अश्वः कस्मात् अश्नुतेऽध्वानं महाशनो भवती'ति यास्कस्मरणात्। सत्यं; यदि वयं हेन्तरश्वं च ब्रूमः, कुतस्तर्हि अश्नुतेरेवाश्वत्वं भवति' इति गोविन्दस्वामी।

[*]क्वन्यश्नोतेरश्व इति जानन् सम्पदमश्नुते।

॥ तस्मादश्वः पशूनां जविष्ठः ॥

तस्मात् किञ्च, पशूनां मध्ये जविष्ठः।

जविष्ठेति तृचो लोप इष्ठं 'तुश्छन्दसी'ति[†] बोः। शीघ्रं गन्तृतमः।

॥ तस्माद्वश्वः प्रत्यङ् पदा हिनस्ति ॥

तस्माद् अपि च। उ खलु[‡]। प्रत्यङ् पराङ्मुखः। पदा पादेन।

॥ अप पाप्मानं हते य एवं वेद ॥

सः। अपहन्ति।

॥ तस्मादेतदश्ववदाज्यं भवति तृतीयेऽहनि ॥

एतद् युक्ष्वीयम् अश्वाँ अग्न इत्यश्वशब्दवत्।

॥ तृतीयस्याह्नो रूपम् ॥

शस्त्रमाद्यमाज्यमुक्तमथ प्रउगमुच्यते—

॥ [£]वायवायाहि वीतये [¶]वायो याहि शिवा दिव [§]इन्द्रश्च वायवेषां

---

[*] 'अशूप्रुषि—' (१. १४९) इत्युणादिसूत्रेण। [†] पा० सू० ५. ३. ५९. [‡] 'उ इत्यनर्थकः' इति गोविन्दस्वामी। [£] ऋक्सं० ४. ३. ५. ५. [¶] ऋक्सं० ६. २. ३०. ३. [§] ऋक्सं० ४. ३. ६. १.

सुताना[*]मा मित्रे वरुणे वय[†]मश्विनावेह गच्छत[‡]मा याह्यद्रिभिः सुतं[‖]सजूर्विश्वेभिर्देवेभि[$]रुत नः प्रिया प्रियास्वित्यौष्णिहं प्रउगम् ॥

अत्र विशेषः सूत्र्यते[¶]—'वायवायाहि वीतय इत्येका वायो याहि शिवा दिव इति द्वे' इति वायव्यस्तृचः। 'इन्द्रश्च वायवेषां सुतानामिति द्वयोरन्यतरां द्विः'। सुतानामिति सोमानां मा भूत्। किन्तु पीतिमर्हथस्तां जुषेथामित्येव स्याद् इत्यैन्द्रवायवः। 'आ मित्रे वरुणे वयं' मैत्रावरुणः। 'अश्विनावेह गच्छतम्' आश्विनः। 'आ याह्यद्रिभिः सुतम्' ऐन्द्रः। 'सजूर्विश्वेभिर्देवेभिः' वैश्वदेवः। 'उत नः प्रिया प्रियासु' सारस्वतः इति।

नन्वौष्णिहास्तृचाः आदौ षड् वै गायत्र उत्तमः।
औष्णिहत्वमस्य कथमिति चोद्यं निराकरोत् ॥
[&]'उत्तमेऽन्वृचसंख्यासाश्चतु'रित्यादि सूत्रयन्।
गायत्र्योश्चतुराधिक्यादुष्णिहः समवीवदन् ॥

यथा—स्तोम्याभूत् स्तोम्याभौं, निदस्पातु निदस्पातौं, हव्याभूत् हव्याभौमिति।

[§]'न वा' पक्षे त्वौष्णिहत्वं भूयस्त्वेनेति मन्यते।

॥ समानोदर्के तृतीयेऽहनि ॥

निर्ह्रदिषि हंसाविव वृषन्निन्द्रेति च क्वचित्।
समानोदर्करूपेऽपि[1] भूम्ना सर्वं तथोच्यते।

---

[1] 'रूपमपि' ख. पाठः.

[*] ऋक्सं० ४. ४. १०. १. [†] ऋक्सं० ४. ४. १९. १. [‡] ऋक्सं० ४. २. ११. १. [‖] ऋक्सं० ४. ३. ६. ३. [$] ऋक्सं० ४. ८. ३१. ५. [¶] आ० श्रौ० सू० ७. १०. ५. [&] आ० श्रौ० सू० ७. १०. ६. [§] आ० श्रौ० सू० ७. १०. ६; ७.

॥ तृतीयस्याह्नो रूपम् ॥

मरुत्वतीयमाहाथ शस्त्रं माध्यन्दिने पुरः—

॥ [*]तं तमिद्राधसे महे [†]त्रय इन्द्रस्य सोमा इति मरुत्वतीयस्य प्रतिपदनुचरौ [‡] ॥

तृचौ ।

॥ निनृत्तवत् त्रिवत् तृतीयेऽहनि ॥

पुनर्निनृत्तशब्दस्य त्वेकदेशो निनृत्तगीः ।
भीमसेनो यथा भीमस्तमित्यावर्तते पदम् ॥
त्रिवच्च त्रय इत्युक्तेर्वाक्यापेक्षं नपुंसकम् ।

॥ तृतीयस्याह्नो रूपम् ॥

॥ [$]इन्द्र नेदीय एदिहीत्यच्युतः प्रगाथः । [§]प्र नूनं ब्रह्मणस्पतिरिति ब्राह्मणस्पत्यः [¶] ॥

प्रगाथ इत्येव । द्व्यृचतृचः ।

॥ निनृत्तवांस्तृतीयेऽहनि ॥

---

[*] ऋक्सं० ६. ५. २. २. [†] ऋक्सं० ५. ७. १८. २. [‡] तथाच आ० श्रौ० सू०— 'तं तमिद्राधसे महे त्रय इन्द्रस्य सोमा इति मरुत्वतीयस्य प्रतिपदनुचरौ' ७. १०. ८. [$] ऋक्सं० ६. ४, २३. १. [§] ऋक्सं० १. ३. २०. ५. [¶] 'इन्द्र नेदीय एदितीन्द्रनिहवः प्रगाथः । प्र नूनं ब्रह्मणस्पतिरिति ब्राह्मणस्पत्यः' आ० श्रौ० सू० ५. १८. ५, ६.

ओङ्कार इन्द्रो वरुणो मित्रो इति पुनः श्रुतः ।
वर्णावृत्त्या निनृत्तत्वं पुंस्त्वमत्र प्रगाथतः ॥

॥ तृतीयस्याह्नो रूपम् ॥

॥ *अग्निर्नेता §त्वं सोम क्रतुभिः †पिन्वन्त्यप इति धाय्या अच्युताः ¶ ॥

॥ ‡नकिस्सुदासो रथं पर्यास न रीरमदिति मरुत्वतीयः प्रगाथः ॥

तृचः ।

॥ पर्यस्तवाँस्तृतीयेऽहनि ॥

पर्यासेति परिपूर्वास्यतिधातुमान् ।

॥ तृतीयस्याह्नो रूपम् ॥

॥ ‖त्र्यर्यमा मनुषो देवतातेति सूक्तम् ॥

निविद्धानं पञ्चदशर्चम् ।

॥ त्रिवत्तृतीयेऽहनि ॥

त्रिरोचना त्र्यर्यमेति च ।

॥ तृतीयस्याह्नो रूपम् ॥

---

* ऋक्सं० ३. १. २०. ४. § ऋक्सं० १. ६. १९. २. † ऋक्सं० १. ५. ७. १. ¶ 'अग्निर्नेता त्वं सोम क्रतुभिः पिन्वन्त्यप इति धाय्याः' आ० श्रौ० सू० ५. १४. १७. ‡ ऋक्सं० ५. ३ १८. ५. ‖ ऋक्सं० ४. १. २३. १.

मरुत्वतीयमित्युक्तं निष्केवल्यमथोच्यते—

॥ [*] यद् द्याव इन्द्र ते शतं [¶] यदिन्द्र यावतस्त्वमिति ॥

अत्र प्रगाथौ स्तोत्रियानुरूपाविति शेषः[1] । सूत्र्यते हि[§]— "वैरूपं चेत् पृष्ठं यद्द्याव इन्द्रे'त्यादि

कुतः,

॥ वैरूपं पृष्ठं भवति ॥

यस्मादत्रेति शेषः ।

॥ राथन्तरेऽहनि तृतीयेऽहनि ॥

[‡] अवोचाम हि वैरूपं पृष्ठं जातं रथन्तरात् ।

॥ तृतीयस्याह्नो रूपम् ॥

॥ [+] यद्वावानेति धाय्याच्युता ॥

॥ [∫] अभि त्वा शूर नोनुम इति रथन्तरस्य योनिमनुनिवर्तयति ॥

शंसनार्थौ वृतिर्ण्यन्तः शंसेद्योनिवृचं त्विह ।

कुतः,

॥ राथन्तरं ह्येतदहरायतनेन ॥

---

[1] 'रूपाविति विशेषः' ख. पाठः.

---

[*] ऋक्सं० ६. ५. ८. ५. [¶] ऋक्सं० ५. ३. २०. ३. [§] आ० श्रौ० सू० ७. १०. ८. [‡] Page 104. [+] ऋक्सं० ८. ३. ५. ६. [∫] ऋक्सं० ५. ३. २१ २.

वैरूपस्थानत्वाद्राथन्तरत्वम् ।

'यत्र ह क्व च पुत्रस्य तत् पितुर्यत्र वा पितुः ।
तद् वा पुत्रस्ये'ति खलु वक्ष्यत्यारण्यके* स्फुटम् ॥

॥ @इन्द्र त्रिधातु शरणमिति सामप्रगाथः ॥

द्वृचः ।

॥ त्रिवाँस्तृतीयेऽहनि ॥

त्रिधात्विति ।

॥ तृतीयस्याह्नो रूपम् ॥
॥ ¶त्यमू षु वाजिनं देवजूतमिति तार्क्ष्योऽच्युतः ॥

प्रथमः खण्डः ।

॥ &यो जात एव प्रथमो मनस्वानिति सूक्तम् $॥

निविद्धानं पञ्चदशर्चम् ।

॥ समानोदर्कं तृतीयेऽहनि ॥

सं जनास इति बहुकृत्वोऽस्ति ।

---

* ऐ० आ० २. १. ८. @ ऋक्सं० ४. ७. २८. ४. ¶ ऋक्सं० ८. ८. ३६. १. ऋक्सं० २. ६. ७. १. $ 'यो जात एवेति निष्केवल्ये' इति आ० श्रौ० सू० ६. ६. १५.

॥ तृतीयस्याह्नो रूपम् ॥

एतत् स्तौति—

॥ तदु सजनीयम् * ॥

उ खलु ।

छो § 'मतौ छः सूक्तसाम्नोः' सूत्रेण सजनात् कृतः ।
किञ्च,

॥ एतद्वा इन्द्रस्येन्द्रियं यत् सजनीयम् ॥

इन्द्रस्येन्द्रियनाम्ना [1] हि प्रथितं श्रुतिषु त्विदम् ।
इयमन्वर्था संज्ञेत्याह --

॥ एतस्मिन् वै शस्यमान इन्द्रमिन्द्रयमाविशति ॥

एतस्मिन् सूक्ते शस्यमाने इन्द्रियमैश्वर्यं ¶ कर्तृ ।

उपपादयति—

॥ तद्धाप्याहुः छन्दोगास्तृतीयेऽहनि बह्वृचा इन्द्रस्येन्द्रियं शंसन्तीति ॥

तद्ध तथाहि $ ।

---

[1] 'साम्ना' ग. घ. पाठः ।

---

* सजनोयं तस्मिन् सङ्गः कर्तव्य इत्यर्थः । यद्वा सजनास इत्यनेन सजनशब्दवद् इति सजनीयम्' इति गोविन्दस्वामी । § पा० सू० ५. २. ५९. ¶ 'इन्द्रियं चक्षुरादिपाटवम्; $ 'तद्ध तस्मिन्नेव सजनीयसूक्ते' इति सायणः ।

मामगैः खलु (मान? नामा)स्य सूक्तस्य परिकथ्यते ।
तृतीयेऽहनि शंसन्ति हीन्द्रस्येन्द्रियसंज्ञकम् ॥
योजातीयं बह्वृचार्थं इन्द्रैश्वर्यमिदं त्विति ।

किञ्च,

॥ तदु गार्त्समदम् ॥

उ पुनः । गृत्समदेन दृष्टम् ।
स्पष्टयति—

॥ एतेन वै गृत्समद इन्द्रस्य प्रियं धामोपागच्छत् ॥

एतेन योजातीयेन । धाम स्थानम् ।

॥ स परमं लोकमजयत् ॥

परममुत्कृष्टम् । जयो वशीकरणम् ।
आहुरत्र कथां पुण्यामार्याः सूक्ष्मेक्षिकाक्षमाः ॥
*'शुनकानां गृत्समद'[1]सूत्रे प्रवरमध्यगे[2] ।
असूचयद् यां हर्षेण भगवानाश्वलायनः ॥
'त्वमग्न इति गृत्समदः ¶शौनको भृगुतां गतः ।
शौनहोत्रः प्रकृत्या तु स आङ्गिरस उच्यते ॥'
इति ह्यार्षानुक्रमण्यां शौनको याममाषत[3] ।

---

[1] 'सूत्र', [2] 'मध्यमे' क. ख. पाठः. [3] 'भाषत। सर्वां' ख. पाठः.

* आ० श्रौ० सू० १२. १०. ११. ¶ मुद्रितार्षानुक्रमण्यां चेत्थमानुपूर्वी दृश्यते—
'ऋषिर्गृत्समदो नाम विज्ञेयः स च शौनकः ।
औरसः शुनहोत्रस्य शुनकस्येच कृत्रिमः ॥
तस्मादाङ्गिरसः पूर्वं पश्चात् स भृगुतां गतः ।' (सं० २. श्लो० २., ३.)

इति ।

सर्वानुक्रमणीशास्त्रे कात्यायनमहामुनिः ।
†'य आङ्गिरस'सूत्रेण यां मुदा समवर्णयत् ॥
‡भरद्वाजात्मजाद् जज्ञे शुनहोत्रान्महामुनिः ।
शौनहोत्रस्तस्य यज्ञे सर्वलोकस्य पश्यतः ॥
इन्द्रो जगाम प्रीत्यर्थमृषेर्यज्ञपतिः स्वयम् ।
इन्द्रमेकाकिनं मत्वा जिघृक्षन्तो महासुराः ॥
परिवव्रुर्यज्ञवाटं तदिन्द्रोऽप्यन्वबुध्यत ।
अथेन्द्रो यजमानस्य वेषमास्थाय निर्गतः ॥
यजमानं पुनर्दृष्ट्वा जगृहुस्ते महासुराः ।
शौनहोत्रमिन्द्रबुद्ध्या सजनीयं ददर्श सः ॥
नाहमिन्द्रः स एवाज्ञा जना इति वदन् मुहुः ।
स तैर्मुक्तोऽयष्ट यष्टा ततो यज्ञे समापिते ॥
शौनहोत्रं प्रियसखमाहूयेन्द्र उवाच ह ।
गृणन् मादयसे यस्मात् तस्माद् गृत्समदोऽस्यृषे ॥
इन्द्रस्येन्द्रियसंज्ञं च योजातीयं भविष्यति ।
त्वं तु भूत्वा भृगुकुले शुनकाच्छौनको भवन्[1] ॥
एतत्सूक्तयुतं पश्य द्वितीयं मण्डलं महत् ।
ततो मल्लोकसंवासं लप्स्यसे च महत् सुखम् ॥
इतीन्द्रचोदितो जातः पुनर्गृत्समदो मुनिः ।
द्वितीयं मण्डलं दृष्ट्वा योजातीयेन संयुतम् ॥

---

[1] 'भवेत्' घ. पाठः, 'भव' क. पाठः

---

† म० २. सू० १. ‡ बृहद्देवतायां (अ. ४. ६२-६४) महाभारते च कथेयं किञ्चिदिव भिन्ना ।

ऐन्द्रं प्राप्य महद्धाम मुमुदे चेन्द्रपूजितः ॥

इति ।

॥ उपेन्द्रस्य प्रियं धाम गच्छति जयति परमं लोकं य एवं वेद ॥

सः ।

निष्केवल्यमिति प्रोक्तं वैश्वदेवमथोच्यते—

॥ [*]तत् सवितुर्वृणीमहेऽ [†]द्यानो देव सवितरिति वैश्वदेवस्य प्रतिपदनुचरौ ॥

वृत्तौ ।

॥ राथन्तरेऽहनि तृतीयेऽहनि तृतीयस्याह्नो रूपम् ॥

॥ [‡]तद्देवस्य सवितुर्वार्यं महदिति सावित्रम् ॥

सस्पष्टं निविद्धानम् ॥

॥ अन्तो वै महत् ॥

पादान्ते हि महच्छब्दः[§] ।

॥ अन्तस्तृतीयमहः ॥

---

[*] ऋक्सं० ४. ४. २५. १. [†] ऋक्सं० ४. ४. २५. ४. [‡] ऋक्सं ३. ८. ४. १.

[§] 'अन्तो वै महदिति। सातिशयनिरतिशयवत्तया अन्तो वै महदित्युच्यते' इति गोविन्दस्वामी. 'अत्र प्रथमपादे महच्छब्दोऽस्ति। महच्च वस्तु काम्यमानानां वस्तूनामन्तो भवति। न खलु महतोऽप्यधिकं केनचित् क्वचित् किञ्चिदधिकं काम्यते तद्विशेषस्याभावात्। तस्मान्महद् वस्त्वेवान्तो भवति' इति सायणः.

त्रिरात्रस्यान्त (भूं ? भू) तत्वात् ।

॥ तृतीयेऽहनि तृतीयस्याह्नो रूपम् ॥

अह्नोऽन्ततां[1] महच्छन्दोऽन्त(भूं ? भूतः) पूजयेत् खलु ॥

॥ *घृतेन द्यावापृथिवी अभीवृते इति द्यावापृथिवीयम् ॥

निविद्धानं तृचम् । सूत्र्यते हि¶— 'घृतेन द्यावापृथिवी इति तिस्रः' इति ।

॥ घृतश्रिया घृतपृचा घृतावृधेति[2] पुनरावृत्तं पुनर्निनृत्तं तृतीयेऽहनि ॥

द्यावा याता चाधा इति वर्णावृत्त्या (?) पुनरावृत्तं, घृतघृतेति पदावृत्या पुनर्निनृत्तम्§ ।

॥ तृतीयस्याह्नो रूपम् ॥

॥ \$अनश्वो जातो अनभीशुरुक्थ्य इत्यार्भवम् ॥

नवर्चं निविद्धानम् ।

॥ रथस्त्रिचक्र इति ॥

अस्ति ।

---

[1] 'ऽन्ते तां'. [2] 'ति. अस्ति । पु' ख. पाठः ।

---

* ऋक्सं० ५. १. १४. ४. ¶ आ० श्रौ० सू० ७. ७. २. § 'घृतश्रियेत्यादिर्द्वितीयः पादः । तत्र घृतशब्दस्य पुनः पुनरावृत्तिरेकं लिङ्गम् । तया चावृत्त्या नृत्तगतवाक्यानुकरणप्रतीतेः पुनर्निनृत्तं लिङ्गान्तरम्' इति सायणः । \$ ऋक्सं० ३. ७. ७. १.

॥ त्रिवत्तृतीयेऽहनि तृतीयस्याह्नो रूपम् ॥

॥ [§]परावतो ये दिधिषन्त आप्यमिति वैश्वदेवम् ॥

सप्तदशर्चं निविद्धानम् ।

॥ अन्तो वै परावतः ॥

अन्तपरावच्छब्दौ दूरार्थौ । सोर्जस्, परावत्[*] ।

॥ अन्तस्तृतीयमहस्तृतीयेऽहनि तृतीयस्याह्नो रूपम् ॥

॥ तदु गायम् ॥

उ पुनः । गायं गयेन दृष्टम् । 'परावतस्त्यूना गयः प्लातः' इति सर्वानुक्रमणी[†] ।

अत्र कथामाह—

॥ एतेन वै गयः प्लातो विश्वेषां देवानां प्रियं धामोपागच्छत् ॥

गयो नाम प्लात एष प्लुतेः[$] पुत्रोऽणि वृद्धिशात् ।
[‡]'एवाप्लुतेः सूनुरवीवृधदि'त्यध्यगीष्महि ॥

॥ स परमं लोकमजयत् । उप विश्वेषां देवानां प्रियं धाम गच्छति जयति परमं लोकं य एवं वेद ॥

स उपगच्छति ।

[§] ऋक्सं० ८. २. ३. १. [*] 'परावत इत्यनेन शब्देन दूरदेशोऽभिधीयते' इति सायणः. [†] मं० १०. सू० ६३. [$] 'प्लतनामकस्य पुत्रः' इति सायणः. 'गयो नाम प्लतेः पुत्रः न तु प्लतस्य' इति सर्वानुक्रमणीवृत्तौ (१०. ३२) षड्गुरुशिष्यः. [‡] ऋक्सं० ८. २. ५. ७.

इति प्रोक्तं वैश्वदेवमुच्यतेऽथाग्निमारुतम् —

॥ [*]वैश्वानराय धिषणामृतावृध इत्याग्निमारुतस्य प्रतिपत् ॥

शस्त्रस्यादौ निविद्धानं भवेत् पञ्चदशर्चकम् ।

॥ अन्तो वै धिषणा ॥

वाग् धिषणा[§] । अन्तो निर्णयः ।
मनोगतं त्वर्थरूपं वाचा निर्णयते खलु ।

[¶]आरण्यके हि वक्ष्यते— ‘मनसा वा अग्रे संकल्पयत्यथ वाचा व्याहरती’ति ।

॥ अन्तस्तृतीयमहस्तृतीयेऽहनि तृतीयस्याह्नो रूपम् ॥

॥ [$]धारावरा मरुतो धृष्ण्वोजस इति मारुतम् ॥

पञ्चदशर्चं निविद्धानम् ।

॥ बह्वभिव्याहृत्यम् ॥

व्याहृत्यं छान्दसः क्यप्तुग् बह्वनेकं हि वाच्यकम् ।
यत्र तद् बहुवक्तव्ययुक्तं धारावरादिकम् ॥

---

[*] ऋक्सं० २. ८. १७. १. ‘वैश्वानराय धिषणां धारावरा मरुतस्त्वमग्ने प्रथमो अंगिरा इत्याग्निमारुतम्’ इति आ० श्रौ० सू० ७. ७. २. [§] ‘धिषणेत्यन्तःकरणवाचकः श्रूयते, अन्तःकरणं च भूम्यादेरन्तं प्राप्तुं शक्नोति । तथाचान्यत्र श्रूयते— ‘न वा इमामश्वरथो न वाश्वतरीरथः सद्यः पर्याप्तुमर्हति’ इति । अतः सहसा भूम्याद्यन्तप्राप्तिहेतुत्वाद् धिषणाशब्दोऽन्तस्योपलक्षकः’ इति सायणः. ‘अन्तो वै। विपरीलक्षणा । नहि वाचोऽन्तोऽस्ति। नहि वै वागपक्षीयते ‘इति लिङ्गाद्’ इति गोविन्दस्वामी. [¶] ऐ० आ० ३. १. १. [$] ऋक्सं० २. ७. १९. १

॥ अन्तो वै बहु ॥

त्रिकेषु सप्तिनामन्त्यं बह्वर्थं वचनं खलु (?) ।

॥ अन्तस्तृतीयमहस्तृतीयेऽहनि तृतीयस्याह्नो रूपम् ॥

॥ [*]जातवेदसे सुनवाम सोममिति जातवेदस्यांच्युता ॥

॥ [†]त्वमग्ने प्रथमो अङ्गिरा ऋषिरिति जातवेदस्यम् ॥

अष्टादशर्चं निविद्धानम् ।

॥ पुरस्तादुदर्कं तृतीयेऽहनि ॥

[§]तुल्यो भाग उदर्कः स पुरस्ताद्यत्र तत्त्विदम् ।

॥ तृतीयस्याह्नो रूपम् ॥

कथं न्विदं प्रागुदर्कमत उत्तरमुच्यते—

॥ त्वं त्वमिति ॥

ऋचामादितोऽस्तीति शेषः । त्वमग्ने प्रथमो अङ्गिरा ऋषिस्त्वमग्ने प्रथमो अङ्गिरस्तम इति । एतच्च—

॥ उत्तरं त्र्यहमभिवदति संतत्यै ॥

---

[*] ऋक्सं० १. ७. ८. १. [†] ऋक्सं० १. २. ३२. १०. [§] 'उदर्को यद्यप्यन्तवचनस्तथापीह समानार्थलक्षणा' इति गोविन्दस्वामी । 'उदर्कशब्दोऽवसानवचनः अवसानं च विच्छेदः' इति सायणः.

उत्तरं चतुर्थादिकम् । अभिवदति[१] आह्वयति सन्तानार्थम् ।

॥ संततैस्त्र्यहैरव्यवच्छिन्नैर्यन्ति य एवं विद्वांसो यन्ति ॥

यन्ति अनुतिष्ठन्ति ।

वैयूह्ळे नवरात्रेऽह्नस्तृतीयं त्वेवमीरितम् ।

द्वितीयः खण्डः ।

चतुर्थेऽहनि कर्तव्यं न्यूङ्खं वक्तुं ब्रवीत्यथ—

॥ आप्यन्ते वै स्तोमा आप्यन्ते छन्दांसि तृतीयेऽहनि ॥

आप्यन्ते इनोर्यक् । झेर्झ । आप्नुवन्ति । जीर्यन्ति ।

आद्यं त्र्यहगतं स्तोमत्रिकं छन्दस्त्रिकं तथा ।
आद्ये त्रिवृत् पञ्चदशस्तथा[२] सप्तदशोऽथ च ॥

गायत्र्याद्ये ततस्त्रिष्टुप् तृतीये जगतीति च ।
उपयुक्ततयैतेषां सर्वं जीर्णं किल ह्यभूत् ॥

अत्र,

॥ एतदेव तत उच्छिष्यते वागित्येव ॥

ततः पूर्वत्र्यहात् । एवं खलु । एव पुनः । उच्छिष्यते परिशिष्यते ।

स्तौति—

---

[१] ‘आह्वयति । संततै’; घ. पाठः　[२] स्त्वथ’ क. घ. पाठः

॥ तदेतदक्षरं त्र्यक्षरम् ॥

स्पष्टयति—

॥ वागित्येकमक्षरम् ॥

एकाच् ।

॥ अक्षरमिति त्र्यक्षरम् ॥

त्र्यच् ।

॥ स एवैष उत्तरस्त्र्यहः ॥

कथम् ।

॥ वागेकं गौरेकं द्यौरेकम् ॥

वाग्देवत्यं चतुर्थं गोदेवत्यं पञ्चमं त्वहः ।
द्युदेवत्यं .... षष्ठं त्र्यचकः परस्त्र्यहः ॥
वाग्विभूति[1] गौश्च द्यौश्च जगत् सर्वं हि वाङ्मयम् ।
*'आरंभमाणा भुवनानि विश्वे'त्यभ्यगीष्महि ॥

॥ ततो वै वागेव चतुर्थमहर्वहति ॥

ततः,

---

१. 'तिं द्यौश्च गौश्च' क. ख. पाठः

---

* ऋक्सं० ८. ७. १२. ३.

॥ तद् यच्चतुर्थमहन्न्यूङ्खयन्त्येतदेव तदक्षरमभ्यायच्छन्ति* ॥

ङ्यर्थेऽमु्, चतुर्थेऽहनि । आयच्छन्ति† दीर्घयन्ति । आयामो हि दैर्घ्यम् ।

व्याचष्टे—

॥ एतद् वर्धयन्ति ॥

स्पष्टयति—

॥ एतत् प्रविभावयिषन्ति चतुर्थस्याह्न उद्यत्यै ॥

विशालं कर्तुमिच्छन्ति प्रकर्षेण हि वाङ्मयम्$ ।
भुवो णिचः सनि द्वित्वं न छन्दस्त्वाद्, गुणः ष इट् ॥

उद्यतिरुद्यमो दैर्घ्यम्§ ।

किञ्च,

॥ अन्नं वै न्यूङ्खः ॥

वै इव ।

उपपादयति —

॥ यदेळवा अभिगेष्णाश्चरन्त्यथान्नाद्यं प्रजायते ॥

इ(द?ल)मन्नं वैतुमर्थं ह्रस्त्रतेऽपिलवा जनाः (?) ।
कर्षका अभिगेष्णास्तु गानं गेष्णं तदन्विताः ॥

---

* न्यूङ्खलक्षणं तु 'द्वितीयं स्वरम्—' इत्यादिनाश्वलायनसूत्रे ७-११ खण्डे प्रपञ्चितं द्रष्टव्यम्। † 'आयच्छन्ति उद्यमं कुर्वन्ति', $ 'प्रविभावयिषन्ति प्रभुत्वं विभुत्वं वाक्षरस्य कर्तुमिच्छन्ति। प्रभुत्वं सामर्थ्यम्। विभुत्वं विशालत्वम्', § 'उद्यत्यै उद्यमनाय सर्वस्मादुत्कर्षाय' इति सायणः ।

भुक्तवन्तो गानपरा हलहस्ताः प्रहर्षिणः ।
महिषाद्यैः काल्यमानैः कुर्वन्तो वै सुकर्दमम् ।
यदा कृषन्तो वर्तन्ते तदा बह्वन्नदायि वै ।
स(ह्वा?स्य)मुत्पद्यते न्यूङ्खः कर्षकोद्गानसन्निभः ।

॥ तद्यच्चतुर्थमहन्न्यूङ्खयन्त्यन्नमेव तत् प्रजनयन्ति ॥

तत् तत्र । ङ्यर्थेऽम्, चतुर्थेऽहनि । न्यूङ्खयन्ति [१] यज्जनयन्ति सम्पादयन्ति तत् सत्रिणः । अतः स न्यूङ्खः,

॥ अन्नाद्यस्य प्रजात्यै ॥

स्यात् ।

प्रजातिस्तु महालाभो न्यूङ्खेनान्नं भवेद् बहु ।

किञ्च,

॥ तस्माच्चतुर्थमहर्जातवद् भवति ॥

तस्मात् खलु ।

जातवज्जनिधातूत्थपदसंयुक्तमन्त्रवत् ।

अत्र च,

॥ चतुरक्षरेण न्यूङ्खयेदित्याहुः ॥

*'स्वरमोकार'मित्यादिसूत्रे[२] न्यूङ्खः प्रदर्शितः ।
तं चतुर्थेऽचि वै कुर्यादिति केचिदिहोचिरे ॥

---

१. 'यन्ति जन', २. 'त्यादौ सूत्रे' ग. घ. पाठः ।

---

* आ० श्रौ० सू० ७. ११. २.

ङ्यर्थे टा । एवमुत्तरत्रापि ।

चतुर्थेनाक्षरेणेति प्राप्ते लुग् ङद्थुकोः[1] कृतः ।
द्व्यक्षरत्र्यक्षरेत्येवमुत्तरत्र च तीयलुक् ॥

स्तौति—

॥ चतुष्पादा वै पशवः ॥

स न्यूङ्खः,

॥ पशूनामवरुद्ध्यै ॥

स्यात् ।

॥ त्र्यक्षरेण न्यूङ्खयेदित्याहुः ॥

कुर्यादचि तृतीये वै न्यूङ्खमित्यपरेऽवदन् ।

किमित्येवम् ।

॥ त्रयो वा इमे त्रिवृतो लोकाः । एषामेव लोकानामभिजित्यै[2] ॥

स न्यूङ्खः स्यात् ।

॥ एकाक्षरेण न्यूङ्खयेदिति ह स्माह लाङ्गलायनो ब्रह्मा मौद्गल्यः ॥

यञ् गोत्रे मुद्गलाद् यूनि फक् च लाङ्गलशब्दतः ।
ब्रह्मा ब्राह्मण आह स्म न्यूङ्खयेदाद्यचीति हि ।

॥ एकाक्षरा वै वाक् ॥

---

१. 'लुग्वथुकोः' ग. घ. पाठः. २. 'जित्यै न्यूङ्ख' घ. पाठः.

एकाच् । ततः किम् ।

॥ एष वाव सम्प्रति न्यूङ्खं न्यूङ्खयति य एकाक्षरेण न्यूङ्खयतीति ॥

सम्प्रति युक्तम् ।

न्यूङ्खनं प्रथमेऽन्यत्र वागेकाच्त्वेन सङ्गतम् ।

इतिः समाप्त्यर्थः ।
अत्र सिद्धान्तयति—

॥ द्व्यक्षरेणैव न्यूङ्खयेत् ॥

एवेति नित्यार्थः ।

*द्वितीयं स्वरमित्या'दि सूत्रयत्यत एव हि ।

किमर्थम् ।

॥ प्रतिष्ठाया एव द्विप्रतिष्ठो वै पुरुषः चतुष्पादाः[1] पशव यजमानमेव[2] तद् द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति ॥

¶उक्तार्थानि[3] । निगमयति—

॥ तस्माद् द्व्यक्षरेणैव न्यूङ्खयेत् ॥

तत्र च,

---

[1] 'चतुष्पादा वै पशवः', [2] 'मेव द्वि' घ. पाठः. [3] 'उक्तार्थम्' । क. ग. घ. ङ पाठः. 'उक्तार्थानि तस्मात्' ख. पाठः.

---

* आ० श्रौ० सू० ७. ११. २. ¶ Vol I. pages 298 & 299.

॥ मुखतः प्रातरनुवाके न्यूङ्खयति ॥

प्रातरनुवाके 'आपो रेवती'रित्यस्यार्धर्चयोः द्वितीयावर्चौ न्यूङ्खयेत्‡ ।

॥ मुखतो वै प्रजा अन्नमदन्ति ॥

मुखतो मुखे ।

॥ मुखत एव तदन्नाद्यस्य यजमानं दधाति ॥

न्यूङ्खयन् होता यजमानं सत्रिगणम् ।

॥ मध्यत आज्ये न्यूङ्खयति ॥

(आग्नि:आग्नि) नाज्ये तृतीयेषु हित्वान्त्यां न्यूङ्खयेत् सुखम्* ।
पादेषु सप्तस्वचि[1] वै द्वितीये सनिनर्दकम् ॥
न्यूङ्खो निनर्द इति च सहत्वं ह्युच्यतेऽनयोः ।
†'स्वरादिरन्त ओकार' इति प्रोक्तो निनर्दकः ॥

॥ मध्यतो वै प्रजा अन्नं धिनोति ॥

जठरस्थं भुक्तमन्नं सदा प्रीणयति प्रजाः ।
‡'धिन्विकृण्व्योरच'. धिवे'रिदितो नुं'¶ लटस्तिबुः ॥

---

[1] 'पि' ख. पाठः ।

---

‡ 'चतुर्थेऽहनि प्रातरनुवाकप्रतिपद्यर्धर्चाद्योर्न्यूङ्खः' इति आ० श्रौ० सू० ७. ११. १.

* आग्नें न स्ववृक्तिभिरित्याज्यम् । तस्योत्तमावर्जं तृतीयेषु पादेषु न्यूङ्खो निनर्दश्च' इति आ० श्रौ० सू० ७. ११. ८, ९.

† आ० श्रौ० सू० ७. ११. ११.

‡ पा० सू० ३. १. ८०.

¶ पा० सू० ७. १. ५८.

मध्यत एव तदन्नाद्यस्य यजमानं दधाति ॥

आधिपत्यं सानुभवं मध्ये स्थापनमुच्यते ।

॥ मुखतो मध्यन्दिन न्यूङ्खयति ॥

श्रुधीहवकुहश्रवाद्यतृचयोर्न्यूङ्ख उच्यते ।
अर्धर्चेषु द्वादशसु द्वितीयेषु स्वरेषु वै[$] ॥

॥ मुखतो वै प्रजा अन्नमदन्ति मुखत एव तदन्नाद्यस्य यजमानं दधाति । तदुभयतो न्यूङ्खं परिगृह्णाति सवनाभ्यामन्नाद्यस्य परिगृहीत्यै ॥

उभयतः उभयत्र सवनाभ्याम् । सवनयोः प्रातर्मध्यन्दिनयोः । परिगृहीतिः स्वीकारः ।

तृतीयः खण्डः ।

उक्तो वैशेषिको न्यूङ्खः प्रयोगं कल्पयत्यथ—

॥ वाग्वै देवता चतुर्थमहर्वहत्येकविंशस्तोमो वैराजं सामानुष्टुप् छन्दः ॥

[$] ‘श्रुधीहवीयस्य तु तृच आद्येऽर्धर्चादिषु न्यूङ्खः। एवं कुहश्रुतीयस्य’ इति आ० श्रौ० सू० ७. ११. २८, २९.

वाक्स्तोमपृष्ठच्छन्दांसि चतुर्थं निर्वहन्त्यहः ।

॥ यथादेवतमेनेन यथास्तोमं यथासाम यथाच्छन्दसं राध्नोति य एवं वेद ॥

सः ।

॥ यद्वा एति च प्रेति च तच्चतुर्थस्याह्नो रूपं यद्ध्येव प्रथममहस्तदेतत् पुनर्यच्चतुर्थम् ॥

अह्नाताद्येनातिदेशाद् युक्तवत्त्वादि गृह्यते ।

तदाह —

॥ यद्युक्तवद् यद्रथवद् यदाशुमद्यत् पिबवद् यत् प्रथमे पदे देवता निरुच्यते यदयं लोकोऽभ्युदितः ॥

उक्तार्थम्* ।

॥ यज्जातवद्यद्धववद्यच्छुक्रवद्यद्वाचो रूपं यद्वैमदं यद्विरिफितं यद्विच्छन्दा यदूनातिरिक्तं यद्वैराजं यदानुष्टुभं यत् करिष्यद् यत् प्रथमस्याह्नो रूपमेतानि वै चतुर्थस्याह्नो रूपाणि ॥

ह्वधातुमत्तु ह्ववज्ज्ञातवज्जनिधातुमत् ।
शुक्रशब्दान्वितं वाचो रूपं यत् प्रतिपादकम् ॥

---

* Page 109

विमदेनर्षिणा दृष्टं रिफेः क्लेशार्थकात् क्त इट् ।
स्वतः क्लेशोच्चारणीयं त्रिच्छन्दा छान्दसास्त्विग्रहात् ॥

ना(म?ना)छन्दस्समायुक्तं यद्यच्चोनाधिकाक्षरम् ।
वैराजानुष्टुप्सम्बन्धि भविष्यत्प्रत्ययान्वयि ॥

प्रथमेऽहनि यच्चापि युक्तवत्त्वादि वर्णितम् ।
एतानि च[1] चतुर्थस्य योग्यान्यह्न इतीष्यताम्[2] ॥

तत्र,

॥ *आग्निं न स्ववृक्तिभिरिति चतुर्थस्याह्न आज्यं भवति ॥

एतच्च,

॥ वैमदम् ॥

भवतीत्येव । विमदाधिकारे हि 'आग्निं नाष्टावास्तारपाङ्क्तम्' इति सर्वानुक्रमणी† ।

॥ विरिफितम् ॥

भवतीत्येव ।

विवो मद इति बहुकृत्वः क्लेशोच्चारणसंयुतम्[3] ।

॥ विरिफितस्य ऋषेश्चतुर्थेऽहनि ॥

---

१. 'वै', २. इह्वेष्यताम्', ३. 'संयुक्तम्' घ. पाठः ।

---

* ऋक्सं० ७. ७. ४. १. † म० १० सू० २१.

इदमिति शेषः । *'ऋत्यकः' ।

महता तपसा क्लिष्टदेहो विरिफितो मुनिः ।
अस्य द्रष्टा यस्य पत्नीमूढवानाश्विनो रथः ॥
¶'यावर्भगाय विमदाय जाये'त्यध्यगीष्महि ।

॥ चतुर्थस्याह्नो रूपम् ॥

अथाग्निन्नीयं स्तौति—

॥ अष्टर्चं पाङ्क्तम् ॥

लोप आस्तारशब्दस्य कृतेऽण्यास्तारपङ्क्तितः ।
आस्तारपङ्क्तेराद्यौ द्वावष्टकौ जागतौ परौ ॥

॥ पाङ्क्तो यज्ञः । पाङ्क्ताः पशवः ॥

†उक्तार्थमेतत् ।

॥ पशूनामवरुद्ध्यै ॥

स्यात् । किञ्च,

॥ ता उ दश जगत्यः ॥

ताः पङ्क्तयोऽष्टौ संपत्त्या जगत्यो दश तत् कथम् ।
चत्वारिंशदक्षरैषा पङ्क्तिरष्टाधिकेतरा ॥

---

* पा० सू० ६. १. १२८.   ¶ ऋक्सं० १. ८. ८. १.   † Vol I. Page 510.

जगत्योऽष्टौ च नो सन्ति नतरां दश हीति चेत् ।
शृण्वाद्यान्त्यातित्वयोगादेता द्वादश पङ्क्तयः ॥
ता जगत्यो दशैव स्युः प्रागेव ह्यध्यगीष्महि ।
*‘सम्पदेति ब्रूयादि’ति छन्दःसम्पत्तिमुत्तमाम् ॥
अन्योन्यतुल्यव्यत्यासे छन्दश्छन्दोत्तरं त्विति ।
उक्तात्र पुनरर्थेन ह्याद्यान्त्याभ्याससूचनम् ॥

कृच्छ्रलब्धजगत्यात्र किं कार्यमत उच्यते —

॥ जगत्प्रातस्सवन एष त्र्यहः ॥

जगती जगदित्युक्ता चतुर्थादौ त्र्यहे त्रयः[1](?) ॥
प्रातस्सवनभागित्वं जगत्याः पूर्वमीरितम्[†] ॥

॥ तेन चतुर्थस्याह्नो रूपम् । ता उ पञ्चदशानुष्टुभः ॥

अनुष्टुभः पञ्चदश द्वादशास्तारपङ्क्तयः ।
किमत्रानुष्टुभा कार्यं सम्पदागतयोच्यते —

॥ आनुष्टुभं ह्येतदहः ॥

‘यदानुष्टुभ’मिति ह्युक्तम्[$] ।

॥ तेन चतुर्थस्याह्नो रूपम् ॥

॥ ता उ विंशतिर्गायत्र्यः ॥

---

१. ‘तयः’ क. घ. पाठः.

---

* Vol Page 384. † Page 103 ‘जगती गायत्र्यै च त्रिष्टुभश्च’ इत्यत्र. $ page 159.

गायत्र्यो विंशतिश्चापि द्वादशास्तारपङ्क्तयः।
किमत्र कार्यं गायत्र्येत्यत उत्तरमुच्यते —

॥ पुनः प्रायणीयं ह्येतदहः ॥

आरभ्यते चतुर्थेन द्वितीयस्तु त्र्यहः खलु।
स्थितैषाद्यह्नि गायत्री छन्दसामादिरेव च।

॥ तेन चतुर्थस्याह्नो रूपम् ॥

पुनः स्तौति —

॥ तदेतदस्तुतमशस्तमयातयामसूक्तं यज्ञ एव साक्षात् ॥

क्रतुष्वनुक्तमस्माभिः सामगैरपि न स्तुतम्।
अयातयामं सरसं साक्षाद्यज्ञः पुमानिव ॥
आग्निन्वीयं लब्धमेतच्चतुर्थेऽह्न्यन्य[1]दुर्लभम्।

॥ तद्यदेतच्चतुर्थस्याह्न आज्यं भवति यज्ञादेव तद्यज्ञं तन्वते ॥

यज्ञात् ल्यब्लोपे पञ्चमी, यज्ञमारभ्य। तत् तत्र।

॥ वाचमेव तत् पुनरुपयन्ति संतत्यै संततैस्त्र्यहैरव्यवच्छिन्नैर्यन्ति य एवं विद्वांसो यन्ति ॥

उक्तार्थम्*।

---

[1] 'ह्यन्य' क. पाठः

---

* Page 151.

चतुर्थेऽहन्याज्यमुक्तं प्रउगं प्रब्रवीत्यथ—

॥ [*]वायो शुक्रो अयामि ते [‡]विहि होत्रा अवीता [§]वायो शतं हरीणा[¶]मिन्द्रश्च वायवेषां सोमाना[$]माचिकितान सुक्रतू [†]आनो विश्वाभिरूतिभि[&]स्त्यमुवो अप्रहण[‖]मपत्यं वृजिनं रिपु[ct]मंबितमे नदीतम

इत्यानुष्टुभं प्रउगम् ॥

सोमानामिति सुतानां मा भूत्, किं तु पीतिमर्हथो युवामित्येव स्यात् ।

आद्यैस्त्रिभिः प्रतीकैस्तु वायव्यः सूत्र्यते खलु—

[ℂ]‘एकपातिन्यः प्रथमः’ इति ।

षळैन्द्रवायव्याद्यास्तु तृचाः सारस्वतान्तकाः ।
नन्वौष्णिहोऽपत्यमादिर्वैश्वदेवस्तृचोऽस्य किम् ॥
आनुष्टुभत्वं वर्णानां भाव्यं[1] द्वादशकेन हि ।
अत्रोत्तरं तु शृण्वेतदन्त्ये सारस्वते तृचे ॥
अन्त्या त्रिरुक्ता बृहती त्विमा ब्रह्मसरस्वती[2] ।
अनुष्टुभोऽतिरिक्तानि द्वादशैवाक्षराणि तु ॥
तैरौष्णिहो द्वादशोनो वैश्वदेवो हि पूर्यताम् ।
सम्पदा प्रउगं सर्वमेवमानुष्टुभं भवेत् ॥

॥ एति च प्रेति च शुक्रवच्च चतुर्थेऽहनि ॥

---

[1] ‘व्य’ क. पाठः. [2] ‘सरस्वती । इति । आ नुष्टुभो’ ख. पाठः.

---

[*] ऋक्सं० ३. ७. २३. १. [‡] ऋक्सं० ३. ७. २४. १. [§] ऋक्सं० ३. ७. २४. ५. [¶] ऋक्सं० ४. ३, ६. १. [$] ऋक्सं० ४. ४. ४. १. [†] ऋक्सं० ५. ३. ८. ४. [&] ऋक्सं० ४. ७. १६. ४. [‖] ऋक्सं० ४. ८. १३. ३. [ct] ऋक्सं २. ८. १०. १. [ℂ] आ० श्रौ० सू० ७. ११. १२.

आचिकितान, प्रशस्तिमम्ब नः, शुक्रो अयामि त इति ।

॥ चतुर्थस्याह्नो रूपम् ॥

मरुत्वतीयमाहाथ शस्त्रं माध्यंदिने पुरः—

॥ [*]तं त्वा यज्ञेभिरीमह इति मरुत्वतीयस्य प्रतिपत् ॥

तृचः ।

॥ ईमह इत्यभ्यायाम्यमिवैतदहः॥

इव एव । अभि सम्यक् । आयाम्यमायामयुक्तं, दीर्घीकृतं न्यूह्वादिना[ʃ] ।

अतनुर्मह[1] इति (?) दीर्घः सङ्गच्छते[2] खलु ।

॥ तेन चतुर्थस्याह्नो रूपम् ॥

॥ [£]इदं वसो सुतमन्ध [‡]इन्द्र नेदीय एदिहि [§]प्रैतु ब्रह्मणस्पति-
[¶]रग्निर्नेता [$]त्वं सोम क्रतुभिः [ℭ]पिन्वन्त्यपः [ℰ]प्रव इन्द्राय बृहत
इति प्रथमेनाह्ना समान आतानश्चतुर्थेऽहनि ॥

अनुचरेन्द्रनिहवौ ब्राह्मणस्पत्य एव च ।
धाय्या मरुत्वतीयश्च स्युरत्राद्ये यथाहनि ॥

---

[1] 'अतनु मह' ग. घ. पाठः.　[2] 'ते तेन' क. ख. पाठः.

---

[*] ऋक्सं० ६. ५. २. ४. [ʃ] 'अभ्यायाम्यं दीर्घं कर्तव्यमिव । एतच्चतुर्थमहर्भवति । ईमह इत्यनेन च तद् भवति । कथं दीर्घाक्षरयुक्तत्वादस्य पदस्य । ईमह इत्यस्य याच्ञाकर्मत्वाद्वा । याचितो हि पुरुषो दीर्घेण कालेन प्रयच्छति' इति गोविन्दस्वामी. [£] ऋक्सं० ५. ७. १७. १. [‡] ऋक्सं० ६. ४. २३. १. [§] ऋक्सं० १. ३. २०. ३. [¶] ऋक्सं० ३. १. २०. ४. [$] ऋक्सं० १. ६. १९. २. [ℭ] ऋक्सं० १. ५. ७. १. [ℰ] ऋक्सं० ६. ३. १२. ३.

शस्त्रेषु सूक्तादन्यस्तु भाग आह्वानसंज्ञकः ।

॥ चतुर्थस्याह्नो रूपम् ॥

॥ ¶श्रुधी हवमिन्द्र मा रिषण्य इति सूक्तम् ॥

एकविंशत्यृचे चाद्य तृचेऽर्धर्चेषु षट्सु वै ।
न्यूङ्खः स्यात् स *द्वितीयादिसूत्रोक्तः सूच्यते खलु —
§'श्रुधीहवीयस्य तु तृच आद्येऽर्धर्चादिषु न्यूङ्खः, एवं कुहश्रुतीयस्य' इति ।

॥ हववच्चतुर्थेऽहनि ॥

श्रुधी हवमिति ।

॥ चतुर्थस्याह्नो रूपम् ॥

॥ ‡मरुत्वाँ इन्द्र वृषभो रणायेति सूक्तम् ॥

पञ्चर्चमेतत् ।

॥ उग्रं सहोदामिह तं हुवेमेति[1] ॥

अस्ति ।

॥ हववच्चतुर्थेऽहनि ॥

ह्वेञो हवश्चेति पदं ह्वेञश्चाप्रत्यये ह्वः ।

---

[1] 'ति ह' ख. ग. पाठः.

¶ ऋक्सं० २. ६. ३. १. * आ० श्रौ० सू० ७. ११. २. § आ० श्रौ० सू० ७. ११. २८. २९. ‡ ऋक्सं० ३. ३. ११. १.

ह्वयेमेति लिङि प्राप्ते छन्दस्त्वात् सारणोवङौ ॥

॥ चतुर्थस्याह्नो रूपम् ॥

॥ तदु त्रैष्टुभम् ॥

उ पुनः । त्रिष्टुप्छन्दस्कम् ।

॥ तेन प्रतिष्ठितपदेन सवनं दाधार ॥

लटो लिट् । अभ्यासदीर्घः । तेन त्रैष्टुभेन सवनं माध्यंदिनं दाधार धारयति ।

॥ आयतनादेवैतेन न प्रच्यवते ॥

सत्रिगणः स्थानान्न[१] च्युतः स्यात् ।

॥ *इमं नु मायिनं हुव इति पर्यासः ॥

पर्यस्यतेः समाप्त्यर्थात् करणे घञ् कृतस्त्विह ।
तृचो निविद्धान एष एवमत्र हि सूत्र्यते—

¶'मध्यंदिनेषु गायत्रांस्तृचानुपशंसस्य तेषु निविदो दध्यादिमं[२] नु मायिनमि'त्यादि ॥

॥ हववांश्चतुर्थेऽहनि ॥

हुवे ह्वेञो लट इति लट्[३] छन्दस्सारणोवङौ ।

---

१. 'न प्रच्युतः स्यात्' ग. घ. पाठः. २. मं न्वित्या' क. ख. पाठः । ३. 'लट्' क. ग. पाठः.

---

* ऋक्सं० ६. ५. २७. १. ¶ आ० श्रौ० सू० ८. ८. १,२.

॥ चतुर्थस्याह्नो रूपम् ॥

॥ ता उ गायत्र्यः ॥

तास्तिस्रः । उ खलु ।

॥ गायत्र्यो वा एतस्य त्र्यहस्य मध्यंदिनं वहन्ति ॥

एतस्य चतुर्थादिकस्य । कथम् ।

॥ तद्वै तच्छन्दो वहति यस्मिन्निविद्धीयते ॥

सवनं निर्वहत्येव निविद्यत्र निधीयते ।

तत् तत्र । व खलु ।

निगमयति—

॥ तस्माद् गायत्रीषु निविदं दधाति[1] ॥

मरुत्वतीयमित्युक्तं निष्केवल्यं ब्रवीत्यथ—

॥*पिबा सोममिन्द्र मन्दतु त्वा §श्रुधी हवं विपिपानस्याद्रेरिति ॥

$स्तोत्रियानुरूपौ तृचौ । कुतः ।

॥ वैराजं पृष्ठं भवति ॥

यस्मादत्रेति शेषः ।

---

[1] 'दधाति । इति । मरुत्वतीयम्' ख. पाठः.

---

* ऋक्सं० ५. ३. ५. १. § ऋक्सं० ५. ३. ५. ४. $ 'वैराजं चेत् पृष्ठं पिबा सोममिन्द्र मन्दतु त्वेति स्तोत्रियानुरूपौ' इति आ० श्रौ० सू० ७. ११. २६.

॥ बार्हतेऽहनि चतुर्थेऽहनि ॥

[*]प्रागवोचाम बृहतो वैराजं समभूदिति ।
षण्णां विराजां पादेषु न्यूङ्खः स्यान्मध्यमेषु तु ।
तद् 'विराजां मध्यमेषु पादेष्वि'ति हि सूच्यते[$] ।

॥ चतुर्थस्याह्नो रूपम् ॥

॥ [§] यद्वावानेति धाय्याच्युता ॥

॥ [¶]त्वामिद्धि हवामह इति बृहतो योनिमनुनिवर्तयति ॥

तृचं शंसेत् ।

॥ बार्हतं ह्येतदहरायतनेन ॥

॥ [∫]त्वमिन्द्र प्रतूर्तिष्विति सामप्रगाथः ॥

त्र्यृचः ।

॥ अशस्तिहा जनितेति ॥

अस्ति ।

॥ जातवांश्चतुर्थेऽहनि ॥

प्रगाथः ।

---

[*] page 104. [$] आ० श्रौ० सू० ७. ११. ३०. [§] ऋक्सं० ८. ३. ५. ६.
[¶] ऋक्सं० ४. ७. २७. १. [∫] ऋक्सं० ६. ७. ३. ५.

॥ चतुर्थस्याह्नो रूपम् ॥

॥ *त्यमूषु वाजिनं देवजूतमिति तार्क्ष्योऽच्युतः ॥

चतुर्थः खण्डः ।

॥ †कुह श्रुत इन्द्रः कस्मिन्नद्येति सूक्तम् ॥

पञ्चदशर्चम् ।

॥ वैमदं विरिफितं विरिफितस्य ऋषेश्चतुर्थेऽहनि चतुर्थस्याह्नो रूपम् ।

अस्यादितः षळर्धर्चा द्वितीयान्न्यूङ्खभागिनः ।
‡'एवं कुहश्रुतीये'ति न्यूङ्खः संस्तूयते खलु ॥

॥ §युध्मस्य ते वृषभस्य स्वराज इति सूक्तम् ॥

पञ्चदशर्चम् ।

॥ उरुं गभीरं जनुषाभ्युग्रमिति ॥

अस्ति ।

॥ जातवच्चतुर्थेऽहनि ॥

---

* ऋक्सं० ८. ८. ३६. १. † ऋक्सं० ७. ७. ६. १. ‡ आ० श्रौ० सू० ७. ११. २९.
§ ऋक्सं० ३. ३. १०. १.

॥ चतुर्थस्याह्नो रूपम् ॥

जनुषेति हि [*]'जनेरुसिः' ।

॥ तदु त्रैष्टुभम् । तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते ॥

॥ [¶]त्यमु वः सत्रा साहमिति पर्यासः ॥

तृचो निविद्धानः ।

॥ विश्वासु गीर्ष्वायतमिति ॥

अस्ति ।

॥ अभ्यायाम्यमिवैतदहः ॥

[†]उक्तार्थम् ।

पदत्रयदीर्घयुतमादीदात्वात् सुसङ्गतम् ।

॥ तेन चतुर्थस्याह्नो रूपम् ॥

॥ ता उ गायत्र्यो गायत्र्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति तद्धै तच्छन्दो वहति यस्मिन्निविद्धीयते तस्माद् गायत्रीषु निविदं दधाति ॥

निष्केवल्यमिति प्रोक्तं वैश्वदेवमथोच्यते —

---

[*] उणादि १–११५. [¶] ऋक्सं० ६. ६. १६. २. [†] page 165.

॥ [*]विश्वो देवस्य नेतु[§]स्तत् सवितर्वरेण्य[¶]म्। विश्वदेवं सत्पतिमिति वैश्वदेवस्य प्रतिपदनुचरौ ॥

[§]एका विश्वो तत्सविर्द्वे तिस्र आविश्वतौ तृचौ ।

॥ बार्हतेऽहनि चतुर्थेऽहनि चतुर्थस्याह्नो रूपम् ॥

॥ [‖]आ देवो यातु सविता सुरत्न इति सावित्रम् ॥

चतुर्ऋचं निविद्धानम् ।

॥ एति चतुर्थेऽहनि ॥

आ देव इति ।

॥ चतुर्थस्याह्नो रूपम् ॥

॥ [‡]प्र द्यावा यज्ञैः पृथिवी नमोभिरिति द्यावापृथिवीयम् ॥

तृचं निविद्धानम् । नमोभिरित्यृतावृधेति मा भूत् ।

॥ प्रेति चतुर्थेऽहनि । चतुर्थस्याह्नो रूपम् ॥

॥ [ℭ]प्र ऋभुभ्यो दूतमिव वाचमिष्य इत्यार्भवम् ॥

एकादशर्चं निविद्धानम् । [डी]'ऋत्यकः' ।

---

[*] ऋक्सं० ४. ३. ४. १. [§] ऋक्सं० ३. ४. १०. ५. [¶] ऋक्सं० ४. ४. २६. २. [§] 'विश्वो देवस्य नेतुरित्येका तत्सवितुर्वरेण्यमिति द्वे आ विश्वदेवं सत्पतिमिति तु वैश्वदेवस्य प्रतिपदनुचरौ' आ० श्रौ० सू० ७. ६. ६. [‖] ऋक्सं० ५. ४. १२. १. [‡] ऋक्सं० २. ३. २. १. [ℭ] ऋक्सं० ३. ७. १. १. [डी] पा० सू० ६. १. १२८.

॥ प्रेति च वाचमिष्य इति च चतुर्थेऽहनि ॥

प्रशब्दवद्वाचमिष्येत्युक्तेर्या(नु?शु)क्तियोगि च ।

॥ चतुर्थस्याह्नो रूपम् ॥

॥ *प्र शुक्रैत देवी मनीषेति वैश्वदेवम् ॥

पञ्चविंशत्यृचं निविद्धानम् ।

॥ प्रेति च शुक्रवच्च चतुर्थेऽहनि ॥

प्रशुक्रेति ।

॥ चतुर्थस्याह्नो रूपम् । ता उ विच्छन्दसः ॥

ताः प्रशुक्रियस्था ऋचः । उ खलु । विच्छन्दसः । कथम् ।

॥ सन्ति द्विपदाः ॥

'प्रशुक्रा पञ्चाधिका वैश्वदेवं ह्याद्या एकविंशतिर्द्विपदाः' इति सर्वानुक्रमणी¶

॥ सन्ति चतुष्पदाः ॥

अन्त्याश्चतस्रः ।

॥ तेन चतुर्थस्याह्नो रूपम् ॥

वैश्वदेवं शस्त्रमुक्तमुच्यतेऽथाग्निमारुतम् —

---

* ऋक्सं० ५. ३. २५. १. ¶ म० ७. सू० ३४.

॥ *वैश्वानरस्य सुमतौ स्यामेत्याग्निमारुतस्य प्रतिपत् ॥

तृचं सूक्तं निविद्धानमन्त्यायाः प्राग्भवेन्निवित् ।

॥ इतो जात इति जातवच्चतुर्थेऽहनि ॥

'इतो जातो विश्वमिदं विचष्टे' इति ह्यस्ति ।

॥ चतुर्थस्याह्नो रूपम् ॥

॥ †क ईं व्यक्ता नरः सनीळा इति मारुतम् ॥

पञ्चविंशत्यृचं निविद्धानम् ।

॥ नकिर्ह्येषां जनूंषि वेदेति ॥

अस्ति ।

॥ जातवच्चतुर्थेऽहनि । चतुर्थस्याह्नो रूपम् । ता उ विच्छन्दसः ॥

कथम् ।

॥ सन्ति द्विपदाः ॥

'कईं पञ्चाधिका मारुतं हाद्या एकादशद्विपदाः' इति हि सर्वानुक्रमणी‡ ।

॥ सन्ति चतुष्पदाः ॥

अन्त्याश्चतुर्दश ।

---

*ऋक्सं० १. ७. ६: १. †ऋक्सं० ५. ४. २३. १. ‡म० ७. सू० ५६.

॥ तेन चतुर्थस्याह्नो रूपम् ॥

॥ [*]जातवेदसे सुनवाम सोममिति जातवेदस्याच्युता ॥

॥ [‡]अग्निं नरो दीधितिभिररण्योरिति जातवेदस्यम् ॥

पञ्चविंशत्यृचं निविद्धानम् ।

॥ हस्तच्युती जनयन्तेति ॥

अस्ति ।

॥ जातवच्चतुर्थेऽहनि चतुर्थस्याह्नो रूपम् । ता उ विच्छन्दसः ॥

कथम् ।

॥ सन्ति विराजः ॥

'अग्निं पञ्चाधिका विराजोऽष्टादशाद्याः' इति हि सर्वानुक्रमणी[§] ।

॥ सन्ति त्रिष्टुभः ॥

अन्त्याः सप्त । सूत्र्यते हि[¶] — 'अष्टादशोत्तमे विराजो द्विपदा एकादश मारुत एकविंशतिर्वैश्वदेवसूक्ते' इति ।

॥ तेन चतुर्थस्याह्नो रूपमह्नो रूपम् ॥

---

[*] ऋक्सं० १. ७. ८. १. [‡] ऋक्सं० ५. १. २३. १. [§] म० ७. सू० १. [¶] आ० श्रौ० सू० ८. ८. ४, ५.

*द्विरुक्तिरुक्तार्था ।

पञ्चमः खण्डः ।

इति षड्गुरुशिष्य[1]विरचितायां साहिदासैतरेयब्राह्मणवृत्तौ
सुखप्रदायामेकविंशोऽध्यायः ॥

* * *

अथ द्वाविंशोऽध्यायः ।

वर्ण्यते नवरात्रेऽहर्वैयूह्ळे पञ्चमं त्वथ —

॥ गौर्वै देवता पञ्चममहर्वहति ॥

गौरत्र सुरभिर्यद्वा ब्रह्मपत्नी सरस्वती ।

॥ त्रिणवः स्तोमः ॥

त्रयस्तु नवका यस्मिन् स स्तोमस्त्रिणवो¶ मतः ।

॥ शाक्वरं साम । पङ्क्तिश्छन्दः ॥

त्रिष्वप्येतेषु वाक्येषु वहन्तीत्यनुवर्तते ।

---

[1] 'ष्येण' घ. पाठः.

---

* Vol I. Page 44. ¶ 'नवभ्यो हिं करोति स तिसृभिः सः पञ्चभिः स एकया । नवभ्यो हिं करोति स एकया स तिसृभिः स पञ्चभिः । नवभ्यो हिं करोति स पञ्चभिः स एकया स तिसृभिः । वज्रो वै तृणवः' इति तृणवस्तोमस्वरूपम् ।

॥ यथादेवतमेनेन यथास्तोमं यथासाम यथाच्छन्दसं राध्नोति य एवं वेद । यद्वै नेति न प्रेति यत् स्थितं तत् पञ्चमस्याह्नो रूपम् ॥

किञ्च,

॥ यद्ध्येव द्वितीयमहस्तदेतत् पुनर्यत् पञ्चमम् ॥

स्पष्टयति —

॥ यदूर्ध्ववद् यत् प्रतिवद्यदन्तर्वद् यद् वृषण्वद् यद् वृधन्वद् यन्मध्यमे पदे देवता निरुच्यते यदन्तरिक्षमभ्युदितम् ॥

उक्तार्थम्[*] ।

॥ यद् दुग्धवद् यदूधवद् यद्धेनुमद् यत् पृश्निमद् यन्मद्वद् यत् पशुरूप यदध्यासवत् ॥

एतानि पञ्चमस्याह्नो रूपाणीत्यनुकर्षः ।
'दुहप्रपूरणे'धातुसिद्धवद् दुग्धवन्मतम् ।
ऊधःशब्दयुतं यच्च सलोपश्छान्दसस्त्विह ॥
धेनुपृश्निशब्दवच्च 'मदीहर्षे'तिधातुमत् ।
अध्या (क्षि ? सोऽधि)कपादाभो यः पादो धीयते स च ॥
पशोर्वालधितुल्यत्वात् पशुरूपमितीष्यते[†] ।
पशुरूपं यच्च किञ्चित् प्रपञ्चयति तत् पुनः —

---

[*] Page 122. [†] 'प्रकृतौ यावदस्ति तावतोऽप्यधिकपादोपेतमध्यासवत्. पशूनामपि चतुर्भ्यः पादेभ्योऽधिकं मुखमेकं परिगण्यते । अतोऽध्यासवत् पशुरूपं भवति' इति सायणः । 'पशोर्हि पादातिरिक्तं मुखम्' इति च गोविन्दस्वामी ।

॥ विक्षुद्रा इव हि पशवः ॥

अपचितपरिमाणः क्षुद्रः । वि नाना । नानात्वमजगजादिभेदेन । किञ्च,

॥ यज्जागतम् ॥

तच्च पश्वमस्य रूपमिति शेषः ।

॥ जागता हि पशवः ॥

'जगती हि तानाहर'दिति *प्रागध्यगीष्महि ।

॥ यद्बार्हतम् ॥

पूर्ववच्छेषः ।

॥ बार्हता हि पशवः ॥

'षट्त्रिंशतमनुब्रूयात् पशुकामस्ये'ति श्रुतेः । बृहत्याश्च षट्त्रिंशदक्षरत्वात् ।

॥ यत् पाङ्क्तम् ॥

पूर्ववत् ।

॥ पाङ्क्ता हि पशवः ॥

मुखमेकं पशोः पादाश्चत्वार इति पाङ्क्ताः ।

॥ यद्वामम् ॥

---

* Vol I. Page 518.

वननीयं शुभं वामं सुखोच्चारणसंयुतम् ।
तच्च रूपं पञ्चमस्येत्येवमत्रावधार्यताम् ॥

॥ वामं हि पशवः ॥

'आ गावो अग्मन्नुत भद्रमक्रन्नि'त्यध्यगीष्महि[*] ।
'गवां हुङ्कारशब्देन ह्यलक्ष्मीः प्रतिहन्यते' ॥

इति हि महाभारते भवति ।

॥ यद्धविष्मत् ॥

पूर्ववत् ।

॥ हविर्हि पशवः ॥

महाभारते[§] हि भवति —

'ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम् ।
एकत्र मन्त्रास्तिष्ठन्ति हविरेकत्र तिष्ठति' ।

॥ यद्वपुष्मत् । वपुर्हि पशवः ॥

'यूयं गावो मेदयथा कृशमि'त्यध्यगीष्महि[£] ।

॥ यच्छाकरं[&] यत् पाङ्क्तं यत् कुर्वद् यद् द्वितीयस्याह्नो रूपमेतानि वै पञ्चमस्याह्नो रूपाणि ॥

तत्र,

---

[*] ऋक्सं० ४. ६. २५. १. [§] अनुशासनपर्वणि ८६ अध्याये. [£] ऋक्सं० ४. ६. २५. ६. [&] विदा मघवन्नित्यादिमहानाम्नीषूत्पन्नं शाक्वरं साम ।

॥ [*]इममूषु वो अतिथिमुषर्बुधमिति पञ्चमस्याह्न आज्यं भवति ॥

ऋचोऽत्र नव। सूत्र्यते हि[‖]— 'इममूषु वो अतिथिमुषर्बुधमिति नवाज्यमि'ति।

॥ जागतमध्यासवत् पशुरूपं पञ्चमेऽहनि ॥

'भरद्वाजाय सप्रथ' [$]इत्यध्यासः।

॥ पञ्चमस्याह्नो रूपम् ॥

आज्यं शस्त्रमिति प्रोक्तं प्रउगं प्रब्रवीत्यथ—

॥ [ʊ]आनो यज्ञं दिविस्पृश [£]मानो वायो महेतने [ℂ]रथेन पृथुपाजसा [§]बहवः सूरचक्षस [Sl]इमा उ वां दिविष्टयः [Cl]पिबा सुतस्य रसिनो [×]देवं देवं वोऽवसे देवं देवं [+]बृहदु गायिषे वच इति बार्हतं प्रउगं पञ्चमेऽहनि ॥

द्वे एका चेत्याद्यतृचो रथाद्याः षट् तृचाः परे।
सूत्र्यते हि[¶]— 'आ नो यज्ञं दिविस्पृशमिति द्वे, आ नो वायो महेतन इत्येका रथेने'त्यादि। देवं देवमितीन्द्रमिन्द्रं गृणीषणीति माभूत्। इह च, बृहत्या अष्टकावाद्यौ ततो द्वादशकाष्टकौ।

---

[*] ऋक्सं० ४. ५. १७. १. [‖] आ० श्रौ० सू० ७. १२. ६. [$] सूक्तेऽस्मिन् तृतीयस्यामृचि भरद्वाजाय सप्रथ इत्याधिकः पाद आम्नायते। [ʊ] ऋक्सं० ६. ७. ७. ४. [£] ऋक्सं० ६. ४. ५. ५. [ℂ] ऋक्सं० ३. ७. २२. ५. [§] ऋक्सं० ५. ५. ९. ५. [Sl] ऋक्सं० ५. ५. २१. १. [Cl] ऋक्सं० ५. ७. २५. १. [×] ऋक्सं० ६. २. ३३. ३. [+] ऋक्सं० ५. ६. २०. १. [¶] आ० श्रौ० सू० ७. १२. ८.

सतोबृहत्या युक्पादावष्टकौ जागतौ परौ ॥

त्रिभिरष्टाक्षरैर्युक्ता गायत्रीति स्थिते सति ।
रथेनगायत्रतृचे षट्त्रिंशद्वर्णहानितः ॥

द्वासप्तत्यक्षरत्वेन े बृहत्यौ, ततः परा ।
नैवास्ति बृहती त्वत्र द्वितीयाः षट्तृचाः स्थिताः (?) ॥

सतोबृहत्योऽन्त्येऽन्त्या (न्त ? त)रसमा प्रस्तारपङ्क्तिका ।
द्विजागतत्र्यष्टकयुक्त्रित्वे तु द्वादशाभवन् ॥

प्रत्यृचं चतुराधिक्यात् षट्त्रिंशद्वर्णलाभतः ।
बृहत्य आसन् गायत्र्योऽप्येवं गणकतोलनात् ॥

एवं बार्हतसंपत्तिं प्राहुः सूक्ष्मेक्षिकाक्षमाः ।
द्वितीयान्त्यतृचौ हित्वा द्वृचान् पञ्चापरेऽवदन् ॥

सूच्यते हि[*] — 'प्रगाथानेके द्वितीयोत्तमवर्ज'मिति ।

अत्रापि षोळशानां स्याद् बृहतीत्वं तु पूर्ववत् ।
सतोबृहत्यो गायत्रीं स्पष्टं बृहतयन्ति हि ॥

॥ पञ्चमस्याह्नो रूपम् ॥

मरुत्वतीयमाहाथ शस्त्रं माध्यन्दिने पुरः —

॥ [¶]यत् पाञ्चजन्यया विशेति मरुत्वतीयस्य प्रतिपत् ॥

तृचः ।

॥ पाञ्चजन्ययेति पञ्चमेऽहनि । पञ्चमस्याह्नो रूपम् ॥

---

[*] आ० श्रौ० सू० ७. १२. ८. [¶] ऋक्सं० ६. ४. ४३. १. 'यत्पाञ्चजन्यया विशा इन्द्र इत् सोमपा एक इति मरुत्वतीयस्य प्रतिपदनुचरौ' आ० श्रौ० सू० ७. १२. ९.

॥ [*]इन्द्र इत् सोमपा एक [†]इन्द्र नेदीय एदिह्यु[‡]त्तिष्ठ ब्रह्मणस्पते[§]ऽग्निर्नेता [‖]त्वं सोम क्रतुभिः [ℭ]पिन्वन्त्यपो [¶]बृहदिन्द्राय गायतेति द्वितीयेनाह्ना समान आतानः पञ्चमेऽहनि ॥

अनुचरेन्द्रनिहवौ ब्राह्मणस्पत्य एव च ।
धाय्या मरुत्वतीयश्च पञ्चमे स्युर्द्वितीयवत् ।

॥ पञ्चमस्याह्नो रूपम् ॥

॥ [⁂]अवितासि सुन्वतो वृक्तबर्हिष इति सूक्तम् ॥

सप्तर्चम् । एतच्च,

॥ मद्वत् ॥

मदाय कमिति ।

॥ पाङ्क्तं पञ्चपदं पञ्चमेऽहनि ॥

'अविता सप्त शाक्वरं महापङ्क्त्यन्त'मिति [+]सर्वानुक्रमण्या पाङ्क्तमित्यन्वयमात्रम् । महापङ्क्तेश्चापि पूर्वपदलोपः ।

॥ पञ्चमस्याह्नो रूपम् ॥

॥ [$]इत्था हि सोम इन्मद इति सूक्तम् ॥

---

[*] ऋक्सं० ५. ७. १७. ४. [†] ऋक्सं ६. ४. २३. १. [§] ऋक्सं० ३. १. २०. ४. [‖] ऋक्सं० १. ६. १९. २. [‡] ऋक्सं० १. ३. २०. १. [¶] ऋक्सं० ६. ६. १२. १. [⁂] ऋक्सं० ६. ३. १८. १. [ℭ] ऋक्सं० १. ५. ७. १. [$] ऋक्सं० १. ५. २९. १. [+] ऋक्सं० ८. ३६. १.

षोळर्चम् ।

॥ मद्वत् पाङ्क्तं पञ्चपदं पञ्चमेऽहनि पञ्चमस्याह्नो रूपम् ॥

॥ *इन्द्र पिब तुभ्यं सुतो मदायेति सूक्तम् ॥

पञ्चर्चम् ।

॥ मद्वत् त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते ॥

॥ §मरुत्वाँ इन्द्र मीढ्व इति पर्यासः ॥

तृचो निविद्धानः ।

॥ नेति न प्रेति पञ्चमेऽहनि पञ्चमस्याह्नो रूपम् ॥

॥ ता उ गायत्र्यः गायत्र्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति। तद्धैतच्छन्दो वहति यस्मिन्निविद्धीयते तस्माद् गायत्रीषु निविदं दधाति ॥

प्रथमः खण्डः ।

मरुत्वतीयमित्युक्तं निष्केवल्यमथोच्यते—

॥ महानाम्नीष्वत्र स्तुवते शाक्वरेण साम्ना ॥

---

* ऋक्सं० ४. ७. १२. १. § ऋक्सं० ६. ५. २८. १.

सामगाः ।

॥ रथन्तरेऽहनि पञ्चमेऽहनि ॥

मातृ रथन्तराज्जातं [*]प्रागवोचाम शाक्वरम् ।
[‡]'विदामघे'ति चारभ्य महानाम्न्य ऋचो नव ।
प्रकृत्या नव तिस्रः[§] स्युस्तासु गीतां हि शाक्वरम् ।

॥ पञ्चमस्याह्नो रूपम् ॥

अथ महानाम्नीशब्दं निराह—

॥ इन्द्रो वा एताभिर्महानात्मानं निरमिमीत ॥

आमः सुः, महान्तम् । निर्माणं सम्पादनम् ।

॥ तस्मान्महानाम्न्यः ॥

इन्द्रस्य महतो नाम रूपमाभिः स्तुतं त्विति ।

॥ अथो इमे वै लोका महानाम्न्यः ॥

अथो अपि च वै लोकवदुपकारिण्यो महानाम्न्यः ।

॥ इमे महान्तः ॥

लिङ्गव्यत्ययः । कर्मणि महेरतिः शतृवच्च[+] ।

---

[*] page 105. [‡] ऐ० आ० ४. १. [§] तिसृभिस्तिसृभी ऋग्भिर्मिलिताभिः एकैकस्यामृचि निष्पादितायां प्रकृत्या नवसङ्ख्याका अपि सम्पादनेन तिस्र ऋचो भवन्ति। तथाच आ० श्रौ० सू० – ता अध्यर्धकारम्। नव प्रकृत्या तिस्रो भवन्ति । (७: १२. १०.) इति. [+] उणादि. २५१:.

इमाः खलु महानाम्न्यः पूजयनीया ऋचः शुभाः ।

किञ्च,

॥ इमान् वै लोकान् प्रजापतिः सृष्ट्वेदं सर्वमशक्नोद्यदिदं किञ्च ॥

इमाः । रक्षितुमिति शेषः । सृजिर्दर्शनार्थः* । सर्वमिति व्याचष्टे—यदिदं किञ्चेति । वै इव ।

इमा लोकोपमा दृष्ट्वा जगत् सर्वं प्रजापतिः ।
शक्तोऽभूद्रक्षितुं तासां त्रिकलेन स चाप्यृषिः ॥
'वैश्वामित्र्यो महानाम्न्य ऐन्द्र्यो वैके प्रजापतिः ।
इति ह्यार्षानुक्रमण्यां† शौनकः समदीदृशत् ॥

। यदिमान् लोकान् प्रजापतिः सृष्ट्वेदं सर्वमशक्नोद्यदिदं किञ्च
तच्छक्वर्योऽभवंस्तच्छक्वरीणां शक्वरीत्वम् ॥

शक्केर्वनिप् तु करणे ङीब् 'वनो र च'‖ शक्वरी ।
ऋचामासां शक्वरीत्वात्§ तत्स्थं साम च शाक्वरम् ।

। ता ऊर्ध्वाः सीम्नोऽभ्यसृजत ॥

ऊर्ध्वाः शुभा महानाम्नीस्तास्सीम्नो दृष्टवान् प्रभुः¶ ।

---

* 'महानाम्नीरनुसन्धाय तदात्मकान् लोकान् प्रजापतिः सृष्ट्वा ताभिर्महानाम्नीभिरनुगृहीतः पश्चादेषु लोकेषु यत् किञ्चित् स्थावरं जङ्गमं प्राणिजातं स्रष्टव्यमस्ति तत्सर्वं स्रष्टुमशक्नोत्' इति सायणः. † पद्यमिदं मुद्रितार्षानुक्रमण्यां नोपलभ्यते. ‖ पा॰ सू॰ ४. १. ७. § शक्तिप्रदत्वात् इत्यर्थः, ¶ 'या एता महानाम्न्यः सन्ति ताः सीम्न ऊर्ध्वा अभ्यसृजत । अग्निमीळ इत्यारभ्य यथा वः सुसहासतीत्यन्ता दाशतयीनां सीमा । तस्याः सीम्न ऊर्ध्वंभाविनीः कृत्वा प्रजापतिराभितः सृष्टवान् । अत एवैताः संहिताः संहितायां नाम्नायन्ते' इति सायणः.

एताभिः सर्वमर्यादाः प्रवर्तन्तां जगत्स्विति[१] ।

॥ यदूर्ध्वाः सीम्नोऽभ्यसृजत तत् सिमा अभवंस्तत् सिमानां सिमात्वम् ॥

महानाम्नीः (सीम्न ? सिमा)स्तस्माद्वदन्ति ब्रह्मवादिनः ।
ईत इत् । सीमात्वम् ।
महानाम्न्यः सीमा एताः शक्वर्यश्च त्रिनामिकाः ।

॥ [*]स्वादोरित्था विषूवत[§] उपनो हरिभिः सुत[‡]मिन्द्रं विश्वा अवीवृधन्नित्यनुरूपः ॥

अनुरूपो नवर्चोऽयं त्रय एते तृचा इति ।

सूच्यते हि[£] — 'महानाम्न्यः स्तोत्रियस्ता अध्यर्धकारम्' इत्यारभ्य 'अवीवृधन्निति त्रयस्तृचा अनुरूप' इति ।

॥ वृषण्वान् पृश्निमान् मद्वान् वृधन्वान् पञ्चमेऽहनि ॥

'वृष्णा मदन्ति शोभसे' 'सोमं श्रीणन्ति पृश्नयो' 'याहि मदानां पते' 'इन्द्रं विश्वा अवीवृधन्नि'ति ।

॥ पञ्चमस्याह्नो रूपम् ॥

॥ [ℒ]यद्वावानेति धाय्याच्युता ॥

---

१. 'जगत्स्थितिः' ख. पाठः.

---

[*] ऋक्सं० १. ६. ६. ५. [§] ऋक्सं० ६. ६. २७. १. [‡] ऋक्सं० १. १. २१. १.
[£] आ० श्रौ० सू० ७. १२. १० *to* १५. [ℒ] ऋक्सं० ८. ३. ५. ६.

॥ *अभि त्वा शूर नोनुम इति रथन्तरस्य योनिमनु निवर्तयति राथन्तरं ह्येतदहरायतनेन ॥

॥ †मोषु त्वा वाघतश्च नेति सामप्रगाथोऽध्यासवान् ॥

त्र्यृचः । सद्विपदत्वादध्यासवत्त्वम् । सूत्र्यते हि§ — 'मोषु त्वा वाघतश्च नेति सद्विपद उपसमस्येद् द्विपदामि'ति । द्वृचान्ते प्रणवमकृत्वा रायस्काम इति द्विपदोच्यते । यथा रथेन पादमादधू रायस्काम इति ।

॥ पशुरूपं पञ्चमेऽहनि ॥

प्रगाथः पशुवत्तस्य द्विपदा वालधिर्यथा ।

॥ पञ्चमस्याह्नो रूपम् ॥

॥ ¶त्यमू षु वाजिनं देवजूतमिति तार्क्ष्योऽच्युतः ॥

द्वितीयः खण्डः ।

॥ +प्रेदं ब्रह्म वृत्रतूर्येष्वाविथेति सूक्तम् ॥

सप्तर्चम् ।

॥ पाङ्क्तं पञ्चपदं पञ्चमेऽहनि पञ्चमस्याह्नो रूपम् ॥

---

* ऋक्सं० ५. ३. २१. २. † ऋक्सं० ५. ३. १७. १. § आ० श्रौ० सू० ७. ३. १९. ¶ ऋक्सं० ८. ८ ३६. १. + ऋक्सं० ६. ३. १९.१.

आद्यातिजगती त्वन्या महापङ्क्तय एव षट् ।
'प्रेदं महापाङ्क्तमाद्यातिजगती'ति हि सर्वानुक्रमणी* ।

॥ §इन्द्रो मदाय वावृध इति सूक्तम् ॥

नवर्चम् ।

॥ महद्वत् पाङ्क्तं पञ्चपदं पञ्चमेऽहनि ॥

मदायेति ।

॥ पञ्चमस्याह्नो रूपम् ।

॥ ¶सत्रा मदासस्तव विश्वजन्या इति सूक्तम् ॥

पञ्चर्चम् ।

। महद्वत् त्रैष्टुभम् ।

मदास इति ।

॥ तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते ।

॥ ‡तमिन्द्रं वाजयामसीति पर्यासः ॥

तृचो निविद्धानः ।

। स वृषा वृषभो भुवदिति ॥

---

* म० ८. सू० ३७. § ऋक्सं० १. ६. १. १. ¶ ऋक्सं० ४. ७. ८. १.
‡ ऋक्सं० ६. ६. २२. २.

अस्ति।

॥ पशुरूपं पञ्चमेऽहनि पञ्चमस्याह्नो रूपम्। ता उ गायत्र्यो गायत्र्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति तद्वै तच्छन्दो वहति यस्मिन्निविद्धीयते तस्माद् गायत्रीषु निविदं दधाति[1] ॥

निष्केवल्यमिति प्रोक्तं वैश्वदेवमथोच्यते —

॥ *तत्सवितुर्वृणीमहे§ऽद्या नो देव सवितरिति वैश्वदेवस्य प्रतिपदनुचरौ ॥

तृचौ।

॥ राथंतरेऽहनि पञ्चमेऽहनि पञ्चमस्याह्नो रूपम् ॥

॥ †उदु ष्य देवः सविता दमूना इति सावित्रम्। आ दाशुषे सुवति भूरि वाममिति[2] ॥

निविद्धाने तृचेऽस्ति।

॥ वामम्, पशुरूपं पञ्चमेऽहनि पञ्चमस्याह्नो रूपम् ॥

॥ $मही द्यावापृथिवी इह ज्येष्ठे इति द्यावापृथिवीयम् ॥

---

[1] 'ति इति।' ख. ग. पाठः. [2] 'ति वा' ख. पाठः.

---

* ऋक्सं० ४. ४. २५. १. § ऋक्सं ४. ४. २५. ४. † ऋक्सं० ५. ४. ५. १.
$ ऋक्सं० ३. ८. ८. १.

चतूऋचं निविद्धानम्। सूच्यते हि[@] — 'उदु ष्य देवः सविता दमूना इति तिस्रो मही द्यावापृथिवी इह ज्येष्ठे इति चतस्र' इति।

॥ रुवद्धोक्षेति ।

अस्ति।

॥ पशुरूपं पञ्चमेऽहनि ॥

उक्षेति ह्यृषभनाम।

॥ पञ्चमस्याह्नो रूपम् ॥

॥ [§]ऋभुर्विभ्वा वाज इन्द्रो नो अच्छेत्यार्भवम् ॥

एकादशर्चं निविद्धानम्।

॥ वाजो वै पशवः ।

वाजस्यान्नस्य भुक्तिर्हि गव्यैः[1] क्षीरघृतादिभिः।

॥ पशुरूपं पञ्चमेऽहनि पञ्चमस्याह्नो रूपम् ॥

॥ [¶]स्तुषे जनं सुव्रतं नव्यसीभिरिति वैश्वदेवम्।

पञ्चदशर्चं निविद्धानम्।

---

[1] 'नव्यैः' ख. पाठः.

[@] आ० श्रौ० सू० ८. ८. ६. [§] ऋक्सं० ३. ७. ३. १. [¶] ऋक्सं० ४. ८. ५. १. 'स्तुषे जनमिति वैश्वदेवं' आ० श्रौ० सू० ८. ८. ६.

॥ अध्यासवत् ॥

‘स्पृधो अदेवी[1]रभि च क्रमाम विश’ इत्यध्यासः ।

॥ पशुरूपं पञ्चमेऽहनि पञ्चमस्याह्नो रूपम् ।

वैश्वदेवं शस्त्रमुक्तमाग्निमारुतमुच्यते —

॥ *हविष्पान्तमजरं स्वर्विदीत्याग्निमारुतस्य प्रतिपत्[2] ।

एकान्नविंशत्यृचं निविद्धानम् ।

॥ हविष्मत् पञ्चमेऽहनि पञ्चमस्याह्नो रूपम् ॥

॥ §वपुर्नु तच्चिकितुषे चिदस्त्विति मारुतम् ॥

एकादशर्चं निविद्धानम् ।

॥ वपुष्मत् पञ्चमेऽहनि पञ्चमस्याह्नो रूपम् ॥

॥ §जातवेदसे सुनवाम सोममिति जातवेदस्याच्युता ॥

॥ ¶अग्निर्होता गृहपतिः स राजेति जातवेदस्यम्[3] ॥

तृचं निविद्धानम् । ‘पतिः स राजा’ इत्येवं खलु सूत्र्ये॥ ।

---

[1] ‘वीरिति । अभि’. [2] ‘पत् ह’ ख. पाठः. [3] ‘म् । पतिः’ ख. पाठः.

---

* ऋक्सं० ८. ४. १०. १. ‘हविष्पान्तं वपुर्नु तदग्निर्होता गृहपतिः स राजेति तिस्र इत्याग्निमारुतम् ।’ आ० श्रौ० सू० ८. ८. ६. § ऋक्सं० ५. १७. १. § ऋक्सं० १. ७. ८. १. ¶ ऋक्सं० ४. ५. १९ ३.

॥ अध्यासवत् ॥

'विश्वानि दुरिता तरेमे'त्यध्यासः ।

॥ पशुरूपं पञ्चमेऽहनि पञ्चमस्याह्नो रूपम् ॥

वैयूह्ळे नवरात्रेऽह्नः पञ्चमं त्वेवमीरितम् ।

तृतीयः खण्डः ।

अथ वैयूह्ळिकं षष्ठमहः पार्ष्ठिकमुच्यते —

॥ देवक्षेत्रं वा एतद्यत् षष्ठमहः ॥

क्षेत्रं स्थानं निवासार्थात् ष्ट्रन्याधारे[¶] क्षियो गुणे ।
वै[$] इव ।

॥ देवक्षेत्रं वा एत आगच्छन्ति ये षष्ठमहरागच्छन्ति ॥

वै इव[1] । किंतु ।

॥ न वै देवा अन्योन्यस्य गृहे वसन्ति नर्तुर्ऋतोर्गृहे वसतीत्याहुः ॥

---

[1] 'इव नवै' घ.

‖ आ० श्रौ० स० ८. ८. ६. ¶ उणादि ४. १७१. $ 'एव' इति सायणः.

वै इव ।

अतिस्वतन्त्रा देवा हि नान्योन्यगृहवासिनः ।
एवमेवर्तुयाजस्था मध्वाद्या ऋतवोऽपि च ॥

इत्याहुर्ब्रह्मवादिनः ।

॥ तद्यथायथमृत्विज ऋतुयाजान् यजन्त्यसम्प्रदायं तद्यथर्तून् कल्पयन्ति यथायथं जनताः ॥

तत्तत्र[1], ऋतुयाजान् द्वादश । असम्प्रदायम् । ल्यबर्थे णमुल् । (अद्य वै मम मदत्त्वा ? अन्यस्मा अदत्त्वा) यजन्ति यद्, ऋतून् वसन्तादीन् यथर्तु ऋत्वनतिक्रमेण यथायथं यथास्वं कल्पयन्ति तद् । जनताः* जनसङ्घांश्च ।

अध्वर्युयजमानौ स्वौ होत्रे दातुं न चार्हतः ।
प्रकृताविवर्तुयाजौ किं तत्र यजतां स्वयम् ।

सूच्यते हि§ — 'होताध्वर्युगृहपतिभ्यां होतरेतद्यजेत्युक्तः । स्वयं षष्ठे पृष्ठ्याहनि' इति । किञ्चात्र,

॥ तदाहुर्नर्तुप्रैषैः प्रेषितव्यं नर्तुप्रैषैर्वषट्कृत्यं वाग्वा ऋतुप्रैषा आप्यते वै वाक् षष्ठेऽहनीति ॥

नर्तुप्रैषैः प्रेषितव्यं न यष्टव्यं च पूर्ववत् ।
पञ्चमं प्रैषसूक्तं हि साक्षाद्वाचो वपुर्महत् ॥
जीर्यते वाक् च षष्ठेऽह्नीत्यृतुप्रैषांस्त्यजेत् ततः ।
†'विभाषा कृवृषोः' क्यप् तु कृत्यं कर्तव्यमुच्यते ।

---

[1] 'तत् ऋ' ख. घ. पाठः.

---

* 'अत्र जनशब्दो देवेषु वर्तते । न वै देवा इत्युपक्रमवशात् । तथाहि जनशब्दो देववचनः ऊर्जादं उत यज्ञियासः पञ्चजना इति' इति गोविन्दस्वामी । § आ० श्रौ० सू० ५. ८. ५, ६. † पा० सू० ३. १. १२०.

ततश्च,

॥ यदृतुप्रैषैः प्रेष्येयुर्यदृतुप्रैषैर्वषट्कुर्युर्वाचमेव तदाप्तां श्रान्तामृक्णवहीं वह्रराविणीमृच्छेयुः ॥

यद्यदि, *आप्तामत्युच्चारणेनाभिभूताम् । श्रान्तां श्रमयोगिनीम् । ऋक्णवहीम्, वहः स्कन्धः । वृश्चेः क्तः, वृक्णः ।

वलोपश्छान्दसो ङीब्वै छिन्नस्कन्धान्वितां सतीम् ।

वहराविणीं वह्रेन वहनेन । भावे घञ् । (अ)वृद्धिः । राविणीमार्तशब्दयुक्ताम् । ऋच्छेयुः बाधेरन् ॥

तर्हि तांस्त्यक्ष्याम इति चेन्नेत्याह —

॥ यद्वेभिर्न प्रेष्येयुर्यद्वेभिर्न वषट्कुर्युरच्युताद्यज्ञस्य च्यवेरन् । यज्ञात् प्राणात् प्रजापतेः पशुभ्यो जिह्मा ईयुः ।

यद् यदि । उ खलु । यज्ञात् । यजेः कर्मणि नङ् । §यष्टव्यात् पूज्यादच्युतादविश्लात् । प्राणाद् यज्ञस्य संबन्धिनः ऋत्विजः च्यवेरन् । प्रजापतेः सम्बन्धिभ्यः पशुभ्यश्च जिह्मा कुटिलगतयः ईयुः गळिताः स्युः ॥

करणे वर्जने चापि दोषश्चेत् कुर्महेऽत्र किम् ।

अत आह —

॥ तस्मादृग्मेभ्य एवाधिप्रेषितव्यमृग्मेभ्योऽधि वषट्कृत्यम् ॥

---

* 'आप्तां समाप्ताम्' इति सायणः. § 'अच्युताद् यज्ञस्य प्रयोगात् प्रच्यवेरन् ऋत्विजः । तथाच यज्ञात् प्राणाच्च' । किञ्च प्रजापतेर्यजमानात् पशुभ्यश्च जिह्माः कुटिला वक्रा ईयुः । अनवधृतविशेष्यत्वात् सन्निधानात् सामर्थ्याच्च प्राणा ईयुः इति द्रष्टव्यम्' इति गोविन्दस्वामी ।

तस्मादेवं सतीत्यर्थः । अधि उपरि । ऋग्मेभ्यः ऋचो मतुपि तलोपः । भिसो भ्यस् ।

ऋग्मभिः प्रेषणं कुर्युः प्रैषैर्यागं च ऋत्विजः ।

सूत्र्यते हि[*][1]— 'उपरिष्टात् त्र्यृच ऋतुयाजानाम् । प्रैषमृतेऽसौयजमृचं चानवानमुक्त्वा ऋगन्तैरसौ यजेति प्रैष्येत् । एवमेत्र यजन्ति । तुभ्यं हिन्वानो वसिष्ट गा अप इति द्वादशे'ति[2] ।

॥ तन्न वाचमाप्तां श्रान्तामृक्णवहीं वहगाविणीमृच्छन्ति ॥

तत् तेन ऋग्मत्वेन, ऋच्छन्ति बाधन्ते ।

॥ नाच्युताद्यज्ञस्य च्यवन्ते न यज्ञात् प्राणात् प्रजापतेः पशुभ्यो जिह्मायन्ति ॥

प्राणान्न च्यवन्ते पशुभ्यश्च न यन्ति न गळिताः स्युः ॥

चतुर्थः खण्डः ।

अथ प्रस्थितयाज्यासु विशेषं प्रब्रवीति हि —

॥ पारुच्छेपीरुपदधति पूर्वयोः सवनयोः पुरस्तात् प्रस्थितयाज्यानाम् ॥

प्रातस्तु प्रकृतिभ्यः प्राक् स्युर्वृषन्नदिसूत्रिताः[§] ।
माध्यंदिने प्राकृतीभ्यः प्राक् पिबासोमसूत्रिताः[‡] ।

---

[1] 'हि । 'प्रै' ख. पाठः. [2] 'गा अप इति' इत्येव मुद्रितपाठः. द्वादश इति तु न दृश्यते ।

[*] आ० श्रौ० सू० ८. १. ५–८. [§] आ० श्रौ० सू० ८. १. २. [‡] आ० श्रौ० सू० ८. १. ४.

दैवोदासिपरुच्छेपनृपेणोक्ताश्चतुर्दश ।

उपदधति उपदध्युः ।

षष्ठस्य प्रातस्सवन इत्यादि खलु *सूत्र्यते[1] ।

स्तौति —

॥ रोहितं वै नामैतच्छन्दो यत् पारुच्छेपम् ॥

रोहितत्वं निराह —

॥ एतेन वा इन्द्रः सप्त स्वर्गान् लोकानरोहत ॥

भूराद्याः सत्यपर्यन्ताः स्वर्गलोकास्तु सप्त वै ।
स्वर्ग (:) [2]स्यान्नववर्षा भूर्विना भारतवर्षतः ॥

॥ रोहति सप्त स्वर्गान् लोकान् य एवं वेद[3] ॥

सः ॥

॥ तदाहुः ॥

चोद्यस्वरूपमाह —

॥ यत् पञ्चपदा एव पञ्चमस्याह्नो रूपं षट्पदाः षष्ठस्याथ कस्मात् सप्तपदाः षष्ठेऽहम् शस्यन्त इति ॥

यद् यदि, रूपं योग्यम् । अथ तथासति । अहन् , ङिलुक् अहनि शस्यन्ते ।

---

[1] 'ते इति । स्तौ' ख. पाठः. [2] 'स्थ न' [3] 'द । त' घ. पाठः.

---

* आ० श्रौ० सू० ८. १. १.

परिहरति —

॥ षड्भिरेव पदैः षष्ठमहराप्नुवन्ति ॥

एव खलु । शस्त्रिणः ।

॥ अपच्छिद्येवैतदहर्यंत् सप्तमम् ॥

अपच्छिद्य क्त्वार्थे ल्यप् । अपच्छिन्नं गलितम् । इव एव । एतद् सप्तममहः । ततः किम् ।

॥ तदेव सप्तमेन पदेनाभ्यारभ्य वसन्ति ॥

अभ्यारभ्य गृहीत्वा । वसन्ति वर्तन्ते ।

मध्यत्र्यहान्तषष्ठाद्धि गळितं (सप्तमं त्वहः) ।
सप्तमेन पदेनात्र सहितं खलु कुर्वते ॥

एवं कुर्वन्तः,

॥ वाचमेव तत् पुनरुपयन्ति संतत्यै संततैस्त्र्यहैरव्यवच्छिन्नैर्यन्ति य एवं विद्वांसो यन्ति ।

*उक्तार्थम् ।

पञ्चमः खण्डः ।

पारुच्छेपीष्वन्त्यपदं सप्तमं स्तौति वै पुनः —

॥ देवासुरा वा एषु लोकेषु समयतन्त ॥

+उक्तार्थम् ।

---

* page 151. + Vol. I. page. 93.

॥ ते वै देवाः षष्ठेनैवाहैभ्यो लोकेभ्योऽसुरान् प्राणुदन्त ॥

षष्ठेनाद्रावयन् देवा दैत्यान् लोकत्रयात् पुरा ।

॥ तेषां यान्यन्तर्हस्तीनानि वसून्यासंस्तान्यादाय समुद्रं प्रौप्यन्त[1] ॥

कृत्वेति शेषः । तेषां जस आम्, ते दैत्याः* । वसूनि धनानि यान्यासन् तान्यादाय हस्तीनानि कृत्वा ।

हस्ती गज इनः स्वामी त्वर्थ आद्यच्छसस्तु (तिः ? शिः) ।

महागजाधिरूढानि कृत्वाऽ समुद्रं प्रौप्यन्त । अन्तर्मध्ये । प्र अधः । औप्यन्त, शपो यक् अ(ह ? वप)न् गूढं निक्षिप्तवन्तः । अथ,

॥ त एतेनैव छन्दसानुहायान्तर्हस्तीनानि वसून्याददत ॥

ते देवाः । एतेन रोहितनाम्ना छन्दसा अनुहायानुद्रुत्य । अन्तः समुद्रमध्यं प्राप्य हस्तीनानि कृत्वाददत । §'आङो दोऽनास्यविहरणे' इति तङ् । गृहीतवन्तः । कथम् ।

॥ तद्यदेतत्पदं[2] । पुनः पदम् । स एवाङ्कुश आसञ्जनाय ॥

तत्तत्र, आसञ्जनं नामाकर्षणम् ।

सप्तमः पुनरुक्ताहः पादोऽङ्कुश इवाभवत् ।

॥ आ द्विषतो वसु दत्ते ॥

---

१. 'प्रौप्यन्त । अन्तर्मध्ये'. घ. २. 'पदम् । कथम् । पुनः' ख.

---

* 'तेषामसुराणाम्' इति गोविन्दस्वामिसायणौ । § 'अन्तर्हस्तीनानि हस्तिनां गजानामुपरि भारवहनाय स्थापितानि । यद्वा स्वकीयस्य हस्तस्यान्तर्मध्ये गोप्यत्वेन स्थापितानि' इति सायणः । 'अन्तर्हस्तीनानि हस्तिसम्बन्धीनि' इति गोविन्दस्वामी. § पा० सू० १. ३. २०.

य एवं वेदेत्यपकर्षः ।

वेदिता धनमादत्ते सर्वं स द्विषतो गृहात् ।

॥ निरेनमेभ्यः सर्वेभ्यो लोकेभ्यो नुदते य एवं वेद ॥

सः । एनं शत्रुं निर्णुदति ।

षष्ठः खण्डः ।

उक्तः परिकरः षष्ठे तदहः कल्पयत्यथ ।

॥ द्यौर्वै देवता षष्ठमहर्वहति । *त्रयस्त्रिंशः स्तोमो रैवतं सामातिच्छन्दाश्छन्दः ॥

पुंस्त्वं छान्दसम् ।

॥ यथादेवतमेनेन यथास्तोमं यथासाम यथाच्छन्दसं राध्नोति य एवं वेद ॥

सः ।

। यद्वै समानोदर्कं तत् षष्ठस्याह्नो रूपम् । यद्ध्येव तृतीयमहस्तदेतत्पुनर्यत् षष्ठम् ॥

---

* एकादशभ्यो हिङ्करोति । स तिसृभिः स सप्तभिः स एकया । एकादशभ्यो हिङ्करोति स एकया स तिसृभिः स सप्तभिः । एकादशभ्यो हिङ्करोति स सप्तभिः स एकया स तिसृभिः । अन्तो वै त्रयस्त्रिंशः' इति त्रयंस्त्रिंशस्तोमस्वरूपम् ।

स्पष्टयति —

॥ यदश्ववद्यदन्तवत् यत्पुनरावृत्तं यत्पुनर्निनृत्तं यद्रतवद्यत्पर्यस्तवद् यत्त्रिवद्यदन्तरूपं यदुत्तमे पदे देवता निरुच्यते यदसौ लोकोऽभ्युदितः ॥

उक्तार्थम्[*] ।

॥ यत् पारुच्छेपं यत् सप्तपदं यन्नाराशंसं यन्नाभानेदिष्ठं यद्रैवतं यदतिच्छन्दा यत् कृतं यत्तृतीयस्याह्नो रूपमेतानि वै षष्ठस्याह्नो रूपाणि ॥

पारुच्छेपर्षिणा दृष्टं यच्च सप्तमपादवत् ।
नाराशंसं न(रा ? रै) स्तुत्या आशंसेर्घञ् तु कर्मणि ॥

भवार्थेऽण् यच्च संदृष्टं नाभानेदिष्ठनामिना (!) ।
§रैवतं यत्र सामास्ति छन्दोऽतिच्छन्द एव यत्[1] ॥

जगत्या उत्तरं, पुंस्त्वं छन्दस्त्वाद्, भूतवत् कृतम् ।
यत्तृतीयेऽह्नि चैतानि षष्ठयोग्यानि वै खलु ॥

अत्र,

॥ [¶]अयं जायत मनुषो धरीमणीति षष्ठस्याह्न आज्यं भवति ॥

अष्टर्चस्य पुरस्तात् स्यात् तूष्णींशंसो निविित्तथा ।

---

[1] 'तत्' ख. पाठः.

---

[*] page. 134. § रैवतीर्नः इत्यस्यामृच्युत्पन्नं साम रैवतम् । [¶] ऋक्सं० २. १. १४. १.

॥ पारुच्छेपमतिच्छन्दाः सप्तपदं षष्ठेऽहनि ॥

अग्निंहोतारमित्यादित्रयोदशकसूक्तदृक् ।
दैवोदासिः परुच्छेपः सखेन्द्रस्य महान् नृपः ॥
महायशास्तेन दृष्टमष्टर्चमयमादिकम् ॥

॥ षष्ठस्याह्नो रूपम् ॥

आज्यं शस्त्रमिति प्रोक्तं प्रउगं प्रब्रवीत्यथ —

[*]स्तीर्णं बर्हिरुपनो याहि वीतये [‡]आ वां रथो नियुत्वान्वक्षदवसे [§]सुषुमा यातमद्रिभि[¶]र्युवां स्तोमेभिर्देवयन्तो अश्विनावर्मह[@] इन्द्र [ct]वृषन्निन्द्रास्तु[St] श्रौषळोपूणो[†] अग्ने शृणुहि त्वमीळितो [$]ये देवासो दिव्येकादशस्थेय[£] मददाद्रभसमृणच्युतमिति प्रउगम् ॥

अवर्मं द्वे वृषन्नेका संभार्यः पञ्चमस्तृचः ।
अस्तु श्रौषळोषु ये द्वे तिसृभिः षष्ठ उच्यते ।

[‰]सूत्र्यते हि— 'द्वे चैका च पञ्चम एकपातिन्य उपोत्तम' इति ।

॥ पारुच्छेपमतिच्छन्दाः सप्तपदं षष्ठेऽहनि ॥

पारुच्छेपतात्र भूम्ना भारद्वाजोऽन्तिमस्तृचः ।
अतिच्छन्दस्त्वत्रयेदेवासऋक् त्रिष्टुबेव हि ॥
इयं तृचो जागतश्च किञ्च सप्तपदत्ववत् ।
जगतीनां त्रिष्टुभश्च चतुष्पात्त्वं स्फुटं खलु ॥

---

[*] ऋक्सं० २. १. २४. १. [‡] ऋक्सं० २. १. २४. ४. [§] ऋक्सं० २. २. १. १. [ct] ऋक्सं० २. २. ४. १. [¶] ऋक्सं० २. २. ३. ३. [@] ऋक्सं० २. १. २२. ६. [$] ऋक्सं० २. २. ४. ६. [St] ऋक्सं० २. २. ३. १. [†] ऋक्सं० २. २. ४. २. [£] ऋक्सं० ४. ८. ३०. १. [‰] आ० श्रौ० सू० ८. १. १२.

तृचेऽन्त्येऽन्त्याष्टकाभ्यासोऽन्वृचं सूत्रे विकल्पितः ।

[*]'उत्तमेऽन्वृचमभ्यासा अष्टाक्षराः, न वे'ति। यथा- 'तविषा सरस्वति तविषा सरस्वतोमि'त्यादि ।

॥ षष्ठस्याह्नो रूपम् ॥

मरुत्वतीयमाहाथ शस्त्रं माध्यन्दिने पुरः—

॥ [‡]स पूर्व्यो महानामिति मरुत्वतीयस्य प्रतिपत्[¶] ॥

तृचः ।

॥ अन्तो वै महत् ॥

पादान्ते महदर्थन्तु[1] महानामिति हि श्रुतम् ।
महन्मही महमहि मन्महन्महता सतम् ।
मह्वा[2]मह्वि[3] महानां माहिमहे महसीति च (?) ।

॥ अन्तः षष्ठमहः ॥

षळहस्यान्तत इदं मध्यमस्य त्र्यहस्य ह ।

॥ षष्ठेऽहनि ॥

वर्तते चेति शेषः ।

॥ षष्ठस्याह्नो रूपम् । [§]त्रय इन्द्रस्य सोमा [&]इन्द्र नेदीय एदिहि

---

[1] 'स्तु' [2] 'ह्वा' [3] 'ह्वि' ख. ङ. पाठः.

---

[*] आ० श्रौ० सू० ८. १. १३, १४. [‡] ऋक्सं० ६. ४. ४२. १. [¶] 'स पूर्व्यो महानां त्रय इन्द्रस्य सोमा इति मरुत्वतीयस्य प्रतिपदनुचरौ' आ० श्रौ० सू० ८. १. १५. [§] ऋक्सं० ५. ७. १८. २. [&] ऋक्सं० ६. ४. २३. १.

[*]प्रनूनं ब्रह्मणस्पति[†]रग्निर्नेता [‡]त्वं सोम क्रतुभिः [¶]पिन्वन्त्यपो [$]नकिः सुदासो रथमिति तृतीयेनाह्ना समान आतानः षष्ठेऽहनि ।

अनुचरेन्द्रनिहवौ ब्राह्मणस्पत्य एव च ।
धाय्या मरुत्वतीयश्च स्युस्तृतीय इवात्र च ॥

॥ षष्ठस्याह्नो रूपम् ॥

॥ [£]थं त्वं रथमिन्द्र मेधसातय इति सूक्तम् ॥

एकादशर्चम् ।

॥ पारुच्छेपमतिच्छन्दाः सप्तपदं षष्ठेऽहनि षष्ठस्याह्नो रूपम् ॥

॥ [§]सं यो वृषा वृष्ण्येभिः समोका इति सूक्तम् ॥

एकान्नविंशत्यृचम् ।

॥ समानोदर्कं षष्ठेऽहनि ॥

'मरुत्वान्' इति बहुकृत्वोऽस्ति ।

॥ षष्ठस्याह्नो रूपम् ॥

॥ [ct]इन्द्र मरुत्व इह पाहि सोममिति सूक्तम् ॥

तृचम् ।

---

[*] ऋक्सं० १. ३. २०. ५. [†] ऋक्सं० ३. १. २०. ४. [‡] ऋक्सं० १. ६. १९. २. [¶] ऋक्सं० १. ५. ७. १. [$] ऋक्सं० ५. ३. १८. ५. [£] ऋक्सं० २. १. १६. १. [§] ऋक्सं० १. ७. ८. १, [ct] ३. ३. १६. २.

सूत्र्यते हि[*] — 'यं त्वं रथमिन्द्र स यो वृषेन्द्र मरुत्व इति तिस्र' इति । [†]'चर्षणीधृत'मिति द्वादशर्चस्य तृतीयतृचेऽत्र सूक्तोक्तिश्चिन्त्या(र्था ?)[‡] ।

॥ '[§]तेभिः साकं पिबतु वृत्रखाद' इति ॥

अस्ति ।

॥ अन्तो वै खादः ॥

पादान्ते खाद इत्यस्ति भक्ष्यं खादान्तमेव[¶] च ।

॥ अन्तः षष्ठमहः षष्ठेऽहनि षष्ठस्याह्नो रूपम् ॥

॥ तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते ॥

॥ [£]अयं ह येन वा इदमिति पर्यासः ॥

तृचो निविद्धानः ।

॥ स्वर्मरुत्वता जितमिति ॥

अस्ति ।

॥ अन्तो वै जितम् ॥

पादान्ते जितमित्यस्ति जयान्तं युद्धमुच्यते ।

---

[*] आ० श्रौ० सू० ८. १. १५. [†] ऋक्सं० ३. ३. १५. १. [‡] 'यद्यपीदं सूक्तं न भवति तथापि सूक्तस्थानापन्नत्वात् सूक्तमित्युक्तम्' इति सायणः. [§] ऋक्सं० ३. ३. १६. ४. [¶] 'वृत्रं खादति भक्षयतीति वृत्रखादः । तेन भक्षणेन वृत्रस्यावसानं मरणं सम्पद्यते । खादो वृत्रस्यान्तः' इति सायणः । [£] ऋक्सं० ६. ५. २७. ४.

॥ अन्तः षष्ठमहः षष्ठेऽहनि षष्ठस्याह्नो रूपम् ॥

॥ ता उ गायत्र्यो गायत्र्यो वा एतस्य ऽहस्य मध्यन्दिनं वहन्ति तद्वै तच्छन्दो वहति यस्मिन्निविद्धीयते तस्माद् गायत्रीषु निविदं दधाति ॥

मरुत्वतीयमित्युक्तं निष्केवल्यं ब्रवीत्यथ —

॥ *रेवतीर्नः सधमादे §रेवाँ इद्रेवतः स्तोतेति ॥

स्तोत्रियानुरूपौ तृचौ‖ । रैवतं पृष्ठं भवति ।

॥ बार्हतेऽहनि । षष्ठेऽहनि ॥

बृहतो रैवतं जातं प्रागवोचाम¶ सुस्फुटम् ।

॥ षष्ठस्याह्नो रूपम् ॥

॥ यद्वावानेति धाय्याच्युता ॥

॥ §त्वामिद्धि हवामह इति बृहतो योनिमनुनिवर्तयति बार्हतं ह्येतदहस्वायतनेन । ⁋इन्द्रमिद्देवतातय इति सामप्रगाथः ॥

द्वृचः ।

॥ निनृत्तवान् षष्ठेऽहनि ॥

---

* ऋक्सं० १. २. ३०. ३. § ऋक्सं० ५. ७. १९. ३. ‖ 'रैवतं चेत् पृष्ठं रेवतीर्नः सधमादे रेवां इद्रेवतः स्तोतेति स्तोत्रियानुरूपौ' आ० श्रौ० सू० ८. १. १७. ¶ page 105. § ऋक्सं० ४. ७. २७. १. ⁋ ५. ७. २५. ५.

इङ्कारावृत्तिर्ह्यस्ति ।

॥ षष्ठस्याह्नो रूपम् । [*]त्यमूषु वाजिनं देवजूतमिति ताक्ष्योऽच्युतः ॥

सप्तमः खण्डः ।

॥ [¶]एन्द्र याह्युप नः परावत इति सूक्तम् ॥

दशर्चम् ।

॥ पारुच्छेपमतिच्छन्दाः सप्तपदं षष्ठेऽहनि षष्ठस्याह्नो रूपम् ॥

॥ [§]प्र घा न्वस्य महतो महानीति सूक्तम् ॥

दशर्चम् ।

॥ समानोदर्कं षष्ठेऽहनि ॥

सोमस्य ता मद इति ।

॥ षष्ठस्याह्नो रूपम् ॥

॥ [+]अभूरेको रयिपते रयीणामिति सूक्तम् ।

पञ्चर्चम् ।

---

[*] ऋक्सं० ८. ८. ३६. १. [¶] ऋक्सं० २. १. १८. १. 'एन्द्र याह्युप नः प्रघान्वस्याभूरेक इति निष्केवल्यम्' आ० श्रौ० सू० ८. १. १८. [§] ऋक्सं० २. ६. १५. १. [+] ऋक्सं० ४. ७. ३. १.

॥ रथमातिष्ठ तुविनृम्ण भीममित्यन्तो वै स्थितम् ॥

निर्णयोऽन्तः स्थितं[1] सर्वस्तमाश्रित्य प्रवर्तते ।

॥ अन्तः षष्ठमहः षष्ठेऽहनि षष्ठस्याह्नो रूपम् । तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते ॥

॥ *उप नो हरिभिः सुतमिति पर्यासः ॥

तृचो निविद्धानः ।

॥ समानोदर्कः[2] षष्ठेऽहनि ॥

उप नो हरिभिरिति पर्यावृत्तेः ।

॥ षष्ठस्याह्नो रूपम् । ता उ गायत्र्यो गायत्र्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति । तद्धै तच्छन्दो वहति यस्मिन्निविद्धीयते तस्माद् गायत्रीषु निविदं दधाति ।

इति ।

निष्केवल्यमिति प्रोक्तं वैश्वदेवमथोच्यते —

॥ ¶अभि त्यं देवं सवितारमोण्योरिति वैश्वदेवस्य प्रतिपत् ॥

एकेति शेषः । सूत्र्यते हि§ — 'अभि त्यं देवं सवितारमोण्योरित्येका तत्सवितुर्वरेण्यमिति द्वे' इति ।

---

[1] 'ऽन्दस्थितः' ग. घ. पाठः. [2] 'कैं' घ. पाठः.

---

* ऋक्सं० ६. ६. २७. १. ¶ अथर्व० ७. १४. १. § आ० श्रौ० सू० ८. १. १८.

॥ अतिच्छन्दाः षष्ठेऽहनि ॥

चतुष्षष्ट्यक्षराष्टित्वादतिच्छन्दा अभीति वै ।

॥ षष्ठस्याह्नो रूपम् । *तत् सवितुर्वरेण्यम्[1] ॥

द्वे इति शेषः । प्रतिपत्तृचः ।

॥ दोषो आगादित्यनुचरः ॥

तृचः सूत्रपठितः§ ।

॥ अन्तो वै गतम् ॥

गत्यन्तत्वात् सर्वस्य ।

॥ अन्तः षष्ठमहः षष्ठेऽहनि षष्ठस्याह्नो रूपम् ॥

॥ $उदुष्य देवः सविता सवायेति सावित्रम् ॥

एकादशर्चं निविद्धानम् ।

॥ शश्वत्तमं तदपा वह्निरस्थादित्यन्तो वै स्थितमन्तः षष्ठमहः षष्ठेऽहनि षष्ठस्याह्नो रूपम् ॥

॥ ×कतरा पूर्वा कतरापरायोरिति द्यावापृथिवीयम् ॥

---

[1] 'ण्यं इति द्वे' ख.

---

* ऋक्सं० ३. ४. १०. ५. § आ० श्रौ० सू० ८. १. १९. $. ऋक्सं० ५. ४. ५. १.
× ऋक्सं० २. ५. २. १.

एकादशर्चं निविद्धानम् ।

॥ समानोदर्कं षष्ठेऽहनि ॥

'द्यावा रक्षत'मित्यावृत्तेः ।

॥ षष्ठस्याह्नो रूपम् ॥

॥ [*]किमु श्रेष्ठः किं यविष्ठो न आजगन्नुप[¶] नो वाजा अध्वरमृभुक्षा इत्यार्भवम् ॥

किमु त्रयोदश ऋचश्चतस्र उपनस्तथा ।
सूत्र्यते हि[S]— 'किमु श्रेष्ठ उप नो वाजा इति त्रयोदशार्भवं चतस्रश्च' इति ।

॥ नाराशंसं त्रिवत् षष्ठेऽहनि ॥

नाराशंसं नरा ह्यत्र स्तूयन्ते ऋभवस्त्विति ।
'ऽयुदायं देवहित'मिति त्रिशब्दवत् ।

॥ षष्ठस्याह्नो रूपम् ॥

॥ [§]इदमित्था रौद्रं गूर्तवचा [†]ये यज्ञेन दक्षिणया समक्ता इति वैश्वदेवम् ॥

॥ [£]नाभानेदिष्ठं शंसति ॥

---

[*] ऋक्सं० २. ३. ४. १. [¶] ऋक्सं० ३. ७. ९. १. [S] आ० श्रौ० सू० ८. ८. ८. [§] ऋक्सं० ८. १. २६. १. [†] ऋक्सं० ८. २. १. १. [£] उत्तरखण्डस्यादिमं वाक्यमिदं सायणीयव्याख्यायाम् ।

वाक्यार्थमध्ये[1] विच्छेदादनार्षं खण्डखण्डनम् ।
'उद्धृत्य चोत्तमेत्यादि'[*]सूत्रोक्तमिह गृह्यताम् ॥
[§]'वैश्वदेवसूक्ते तृचमन्त्य'मित्यादि चेष्यताम् ।
स्वस्तिनोऽन्त्यस्तृचः प्रोक्त उपासासूक्तमुत्तमम् ॥
इदमित्थेति यत् सूक्तं सप्तविंशत्यृचं महत् ।
षड्विंश्याः प्रागत्र ये यज्ञेनैकादशकं वदेत्[$] ॥
अन्त्यायाः प्राक् चतुर्थ्यास्तच्छंसेदर्धर्चशः परम् ।
शिष्टे शंसेच्च षड्विंश्या निविदूर्ध्वं त्रिरान्तिमा[¶] ॥

अष्टमः खण्डः ।

अथ प्राह कथां श्रेष्ठां नाभानेदिष्ठगोचराम् —

॥ नाभानेदिष्ठं वै मानवं ब्रह्मचर्यं वसन्तं भ्रातरो निरभजन् ॥

मानवं तु मनोः पुत्रं कनिष्ठं च गुरोः कुले ।
ब्रह्मचर्यं वेदपाठतदर्थज्ञानगोचराम् ॥
चर्यां कर्तुं चरेर्भावे यद् वसन्तं सुदूरगम् ।
ज्येष्ठा निरभजन्नेनं भ्रातरो हीनभागकम् ॥
अकुर्वन् सकलं द्रव्यमग्रहीषुः स्वयं त्विति ।

---

[1] 'ध्य' खः पाठः.

---

[*] आ० श्रौ० सू० ८. १. २०. [§] आ० श्रौ० सू० ८. ८. ८. [$] 'प्रागुपोत्तमाया ये यज्ञेनेत्यावपते' इति आ० श्रौ० सू० ८. १. २२. [¶] तथाच आ० श्रौ० सू० – 'तस्यार्धर्चशः प्रागुत्तमाया ऊर्ध्वं चतुर्थ्याः । शिष्टे शस्त्वा स्वस्ति नो मिमीतामश्विनामग इति तृचः' इति ८. १. २३, २४.

†[मानवं मनोः पुत्रं नाभानेदिष्ठाख्यमृषिम् । ब्रह्मचर्यं व्रतं, तच्चरणार्थं गुरुकुले वसन्तम् । तस्यर्षेः भ्रातरो विभागं कुर्वन्तो निरभजन् । भागशून्यमकुर्वन् ।]

॥ सोऽब्रवीदेत्य किं मह्यमभाक्तेति ॥

गुरोः कुलात् स चाभ्येत्य स्वभ्रातॄनिदमब्रवीत् ।
मह्यं मदर्थं किं वस्तु कृतव(स्थ? न्त)श्च खल्विति ॥
भजेर्लुङ् थ त सिच् §‘चोः कु’ ‘झलो झलि’ ‡‘वदव्रजा’त्’St ।

[सोऽप्युपकुर्वाण[1]ब्रह्मचारित्वाद् गुरुकुलात् समावृत्त एत्यात्मनो भागार्थमृषिरब्रवीत् – यूयं किं धनं मह्यमभाक्तेति । त आहुः ।]

॥ एतमेव निष्ठावमववादितारमित्यब्रुवन् ॥

[एतमेव[2] पितरं निष्ठावमववदितारम् । *तुभ्यमभक्ष्महीति वाक्यशेषः । निष्ठावो धर्माधर्मानुष्ठानानुष्ठानव्यवस्थापकः । अववदिता शासिता धाता ।]

पिता निष्ठाव इत्युक्तो निष्ठां कार्यव्यवस्थितम् ।
वाति प्रापयति ण्यर्थाद् वातेरनुपसर्गकात् ॥
मत्वर्थे वाववदिता शिक्षकोऽत्रेति सान्त्वने ।
भजेति शेषः पितरं भज पृच्छेति तेऽब्रुवन् ॥
पितुर्निर्वाहकत्वं यत्तैरुक्तं युक्तमेव तत् ।

इत्याह —

---

[1] ‘णो’ ख. पाठः. [2] ‘व नि’ घ. पाठः.

---

† कोष्ठकान्तर्गतैवानुपूर्वी गोविन्दस्वामिभाष्येऽपि परिदृश्यते। * पृच्छेति वाक्यशेषाध्याहारः सायणीयव्याख्यायाम् । § पा० सू० ८. २. ३० ‡ पा० सू० ८. २. २६.
St पा० सू० ७. २. ३.

॥ तस्माद्धाप्येतर्हि पितरं पुत्रा निष्ठावोऽववदितेत्येवाचक्षते ॥

तस्मात्तथाहि त्वेतर्हि पुत्रा लोके वदन्ति तु ।
पितरं सर्वकार्येषु स एवाववदेदिति ।

॥ स पितरमेत्याब्रवीत् ॥

स भ्रातृचोदितोऽभ्येत्य मनुं तातं सुतोऽब्रवीत् ।

॥ त्वां ह वा मह्यं तताभाक्षुरिति ॥

भ्रातरस्त्वामकार्षुर्मे भागत्वेनेह हे तत ।
भजेर्लुङि *'सिजभ्यस्त' झेर्जुस् वृद्धिषड्त्वमट् ॥

॥ तं पिताब्रवीत् ॥

कनिष्ठं नाभानेदिष्ठं पिता मनुरथोक्तवान् ।
कथम् ।

॥ मा पुत्रक तदादृथाः ॥

तत् तैः कृतं त्रिभागं तु प्रति त्वं मादरं कृथाः ।
दृङ्आदरे §'नमाङ्योगे' $'ह्रस्वादङ्गात्' क्वि‡'दुश्च' सि (क्! च्)
पुत्रात् कन्'नुकम्पायां'¶ धतोशयं च मे शृणु ।

॥ अङ्गिरसो वा इमे स्वर्गाय लोकाय सत्रमासत ते षष्ठं षष्ठमेवाहरागत्य मुह्यन्ति तानेते सूक्ते षष्ठेऽहनि शंसय तेषां यत् सहस्रं

---

* पा० सू० ३. ४. १०९. § पा० सू० ६. ४. ७४. $ पा० सू० ८. २. २७. ‡ पा० सू० १. २. १२. ¶ पा० सू० ५. ३. ७६. 'कुत्सायां कप्रत्ययः' इति गोविन्दस्वामी।

सत्रपरिवेषणं तत्ते स्वर्यन्तो दास्यन्तीति ॥

गवां सहस्रं करणे ल्युट् भुक्त्यर्थे* विषेः कृतः ।
षष्ठस्य द्विर्वचोऽनेकप्रयोग[1]प्रैषसूचनम् ॥

इदंयोः सूक्तयोः षष्ठे प्रयोगो दुष्करः खलु ।
तानेते शंसय सुत सूक्ते दृष्टे त्वया शुभे ॥

ते च तुभ्यं प्रदास्यन्ति स्वः स्वर्गं हि महर्षयः ।
यन्तो गच्छन्त उद्युक्तास्तत्सहस्रं गवामिति ॥

॥ तथेति तानुपैत् प्रतिगृभ्णीत मानवं सुमेधस इति ॥

तथेति पितुराज्ञाय वचनं स ऋषीनगात् ।
ℓ'प्रतिगृभ्णीते'ति पादं बहुशः सूक्तकं वदन् ॥

सुमेधसो महाज्ञाना हे मनोस्तनयं तु माम् ।
गृह्णीत स्वीकुरुत वै §'हृग्रहो'रिति हस्य भः ॥
ऋषयोऽङ्गिरसस्ते च दृष्ट्वा श्रद्धासमन्विताः ।

॥ तमब्रुवन् किंकामो वदसीति ॥

कस्मिन् कामो यस्य स त्वं किंकामो वदसीह वै ।

स च ,

॥ इदमेव वः षष्ठमहः प्रज्ञापनीयानीत्यब्रवीदथ यद्व एतत् सहस्र

---

[1] 'गे' घ. पाठः.

---

* 'सत्रपरिवेषणं सत्रार्थं परितः सम्पादितं ' इति सायणः. 'परिवेषणं भोजनं' तदुपायाः पशवः परिवेषणशब्देन लक्ष्यन्ते, सम्राड् धग् इत्येवमादयः' इति गोविन्दस्वामी।

ℓ ऋक्सं० ८. २. १. १. § पा० सू० वा० ८. २. ३५.

सत्त्रपरिवेषणं तन्मे स्वर्यन्तो दत्तेति ॥

युष्मान् प्रयोगसंमूढान् संशयान् ज्ञापयानि वै ।
अथ यूयं गोसहस्रं स्वर्यन्तो दातुमर्हथ ॥
दाञो लोट् थ त शब्लुर्द्वे चातः श्नाभ्यस्तयोः खरि ।
इत्युक्ता ऋषयश्चैते तथेति प्रतिपेदिरे ॥

इत्याह —

॥ तथेति ॥

ते तमब्रुवन्निति शेषः । स च,

॥ तानेते सूक्ते षष्ठेऽहन्यशंसयत् ॥

येयज्ञीयेदमित्थीये सूक्ते तान् समशंसयत् ।

॥ ततो वै ते प्र यज्ञमजानन् प्र स्वर्गं लोकम् ॥

अजानन्नित्येव ।

यज्ञ स्वर्गगतं ज्ञानमेषां तच्छंसनादभूत् ।

॥ तद्यदेते सूक्ते षष्ठेऽहनि शंसति यज्ञस्य प्रज्ञात्यै स्वर्गस्य लोकस्यानुख्यात्यै ॥

‡उक्तार्थम् ।

अथ ते,

॥ तं स्वर्यन्तोऽब्रुवन् ॥

तं नाभानेदिष्ठम् । कथम् ।

---

‡ Vol. I. page 59.

॥ एतत्ते ब्राह्मण सहस्रमिति ॥

दद्मो गृहाणेति शेषः ।

ब्राह्मण ब्रह्मसंपूर्ण ब्रह्माण्यणासि (?) वै पुरा ।
दद्मस्ते गोसहस्रं तद् गृहाणेत्यभिधाय वै ।

पश्यतस्तस्य ते स्वर्गं जग्मुर्लोकं स च स्थितः ।
गवां सहस्रं तैर्दत्तं कालयन् पर्यपालयत् ॥

॥ तदेनं समाकुर्वाणं पुरुषः कृष्णशवास्युत्तरत उपोत्थायाब्रवीत ।
मम वा इदं मम वै वास्तुहमिति ॥

तत् तत्र गोसहस्रं तत् [*]समाकुर्वाणमञ्जसा ।
कालयन्तमुत्तरतः समीपे भूतविग्रहः ॥

उत्थाय त्वब्रवीत् कश्चित् पुरुषो मम वा इदम् ।
गोसहस्रं वास्तुहं तु मम वेति श्रुतं खलु ।

स च कृष्णशवासीति पुरुषोऽत्र विशेष्यते ।
कृष्णशं नीलवस्त्रं स्यान्मलिनं त्वपरेऽवदन् ॥

शुक्लं कृष्णदशं चान्ये कृष्णवर्णोल्बणं परे ।
[‡]छन्दोगसूत्रे बहुधा कृष्णशं तु निरुच्यते —

‘कृष्णशं वास इति । कृष्णं कद्रुमिश्रितमिति शाण्डिल्यः । शुक्लं कृष्णदशमिति गौतमः । कृष्णमित्येव मन्य इति धानंजय्य’ इति ।

---

[*] ‘समाकुर्वाणं आत्मसात्कुर्वाणम्’ इति गोविन्दस्वामिसायणौ । [†] ‘मलीमसवासाः कृत्तिवासा वा’ इति गोविन्दस्वामी । ‘अतिशयेन कृष्णं मलिनं वस्त्रं कृष्णशं’ इति सायणः । [‡] द्राह्यायणश्रौतसूत्रम् २३ - २,

मम वै वास्तुहमिति प्रागेवार्थोऽस्य वर्णितः[*] ।

अत्र पुरुषमात्रोक्तावप्ययं भगवान् रुद्र एव च । [§]यजुर्वेदे मन्थिग्रहसंस्रावहोममन्त्रस्य 'एष ते रुद्रभाग' इत्यस्य व्याख्या(नु ? न)रूपे नाभानेदिष्ठब्राह्मणे 'मनुः पुत्रेभ्यो दायमि'त्यादिके 'तं पशुभिश्चरन्तं यज्ञवास्तौ रुद्र आगच्छत्' इति दर्शनादित्याहुः ।

॥ सोऽब्रवीन्मह्यं वा इदमदुरिति ॥

स नाभानेदिष्ठः । वै इति सान्त्वे । अदुरिति झेर्जुस् । दत्तवन्तः । स च,

॥ तमब्रवीत् तद्वै नौ तत्रैव पितरि प्रश्न इति ॥

कार्य इति शेषः । तद् गोसहस्रं वै तर्हि नौ आवयोर्मध्ये कस्य स्यादिति तव पितरि मनौ सर्वमध्यस्थे प्रश्नः कार्य इति ।

तं च त्वमेवैत्य पृच्छ गोसहस्रमिदं त्वहम् ।
रक्षिष्यामीति देवोक्तः सोऽगात् स्वं पितरं प्रति ॥

इत्याह —

॥ स पितरमैत् ॥

आगतं च,

॥ तं पिताब्रवीत् ॥

पिता मनुः । कथम् ।

॥ ननु ते पुत्रकादु३रिति ॥

---

[*] Vol. I. page. 561. [§] तै० सं० ३. १. ९.

नाभानेदिष्ठ किं ते ते दत्तवन्तो गवां गणम् ।
प्रश्ने प्लुतः स मनुना पित्रोक्त इदमुक्तवान् ॥

इत्याह—

॥ अदुरेव म इत्यब्रवीत् । तत्तु मे पुरुषः कृष्णशवास्युत्तरत उपोदतिष्ठत् । मम वा इदं मम वै वास्तुहमित्यादितीति ॥

एवेति खेदे तच्चे मे दत्तवन्तो गवां कुलम् ।
किन्त्वत्र कश्चित् पुरुषो मम तूत्तरदेशतः ॥

उदतिष्ठत् सोऽग्रहीच्च ममेदमिति गोकुलम् ।
तङा[*]'ङो दोऽनास्य' इति [$]'स्थाघ्वोरिच्चे'ति सिच्च कित् ॥
अथो मनुर्ज्ञानदृष्ट्या ज्ञात्वा रुद्रं घृणानिधिम् ।
द्विसूक्तिदर्शिनि सुते प्रयोगज्ञे च सुप्रियम् ॥

क्रीडमानं च तेनैव नाभानेदिष्ठकेन ह ।
सम्पूज्य मनसा चैनं साक्षात्कृतमहेश्वरम् ॥

कृतसंभाषणं चैव स्मृतमात्राघहारिणा ।
उवाच पुत्रं तस्येदं सहस्रं वै गवामिह ॥

त्वमितो द्रुतमेवेत्य तवेति मनुरुक्तवान् ।
इति तं वद हृष्टः स सहस्रं ते प्रदास्यति ॥

इत्युक्तवानित्याह —

॥ तं पिताब्रवीत् तस्यैव पुत्रक तत्तत्तु स तुभ्यं दास्यतीति ॥

तर्हि ।

मनुना प्रेरितस्त्वेवं सोऽगाद्रुद्रं पुनर्द्रुतम् ।

---

[*] पा० सू० १. ३. २०.　[$] पा० सू० १. २. १७.

इत्याह —

॥ स पुनरेत्याब्रवीत् ॥

कथम् ।

॥ तव ह वाव किल भगव इदमिति मे पिताहेति ॥

हे भगव भगवन् !

*प्रहर भगव इति निरुक्तं भगवत्पदम् ।
किलेति विस्मये हेति निश्चये गोकुलं त्विदम् ॥
पिता मे मनुराहेह तवैवेति हि निश्चिनु ।
इति श्रुत्वा यत्तु रुद्र उक्तवांस्तद् ब्रवीत्यथ —

॥ सोऽब्रवीत्तदहं तुभ्यमेव ददामि य एव सत्यमवादीरिति ॥

एवेति विस्मये ।

[1]एकः पृष्ट्वा मनुं सत्यं यदवादीस्ततो ह्यहम् ।
सुप्रीतस्तुभ्यमेवेदं गोसहस्रं ददामि वै ।
योऽहं यदात्मकश्चाहं पितुर्ज्ञास्यसि मां गतः ।
इत्युक्त्वास्मै तच्च दत्त्वा तत्रैवान्तरधीयत ।
सोऽपि तं गोगणं लब्ध्वा समेत्य मनुना ततः ।
वेदप्रियत्वं रुद्रस्य घृणाऽधित्वं च शुश्रुवान् ।
पितृप्रसादसंप्राप्तगोसहस्रसमन्वितः ।
भ्रातॄणां लब्धभागानां पश्यतां मुमुदे चिरम् ॥

---

[1] 'एतत्' ख. पाठः.

---

* Vol. I. page. 490.

अथ प्रसङ्गात् सत्योक्तिं सम्यगेव प्रशंसति —

॥ तस्मादेवंविदुषा सत्यमेव वदितव्यम् ॥

नाभानेदिष्ठवृत्तान्तवित् सत्यं वक्तुमर्हति ॥

किञ्च,

॥ स एष सहस्रसनिर्मन्त्रो यन्नाभानेदिष्ठः ॥

यद् यः ।

सहस्रस्य सनिर्दाता (वे ? चेन्) '*छन्दसि वने'ति ह ।
द्विशक्तिरूपोऽतिगुह्यो मन्त्रो ज्ञेयः सहस्रदः ।

॥ उपैनं सहस्रं नमति ॥

य एवं वेदेत्यपकर्षः । उपनमिः स्वयंप्राप्त्यर्थः ।

॥ प्र षष्ठेनाह्ना स्वर्गं लोकं जानाति य एवं वेद ॥

षष्ठेनाह्ना प्रजानीयात् स्वर्गं चैव स वेदिता ।
वैश्वदेवशस्त्रमित्थं षष्ठे सम्यक् प्रवर्णितम् ॥

नवमः खण्डः ।

नाभानेदिष्ठशिल्पस्य प्रसङ्गादन्य उच्यते —

॥ तान्येतानि सहचराणीत्याचक्षते ॥

---

*पा० सू० ३. २. २७.

एतानीति कानीत्याह —

॥ नाभानेदिष्ठं वालखिल्या वृषाकपिमेवयामरुतम् ॥

आचक्षत इत्येव ।

येयज्ञीयेदमित्थीये नाभानेदिष्ठनामके ।
[*]सूक्ताष्टकं खैलिकं तु बालखिल्या [£]अभिप्रवः ॥
[७]प्रवोमहे नवर्चं तु सूक्तं स्यादेवयामरुत् ।
त्रयोविंशत्यृचं सूक्तं [टी]विहिसोतो वृषाकपिः ॥
इति चत्वारि शिल्पानि तेषां साहित्यमाह ह —

॥ तानि सहैव शंसेत् ॥

असाहित्यं निन्दति —

॥ यदेषामन्तरियात्तद्यजमानस्यान्तरियात् ॥

एषां मध्ये यत् त्यजेत् तद्यष्टुर्नाशाय वै भवेत् ।
अन्तरिण् त्यागनाशार्थौ विविच्यैतद् ब्रवीत्यथ —

॥ यदि नाभानेदिष्ठं रेतोऽस्यान्तरियात् ॥

इत्येव । अस्य यष्टुः ।

नाभानेदिष्ठसन्त्यागो रेतसो नाशको भवेत् ।

॥ यदि बालखिल्याः प्राणानस्यान्तरियात् ॥

पूर्ववत् ।

---

[*] मुद्रितर्क्संहितायां तु सूक्तैकादशकं दृश्यते। [£] ऋक्सं० ६. ४. १४. १. [७] ऋक्सं०
४. ४. २२. १. [टी] ऋक्सं० ८. ४. १. १.

॥ यदि वृषाकपिमात्मानमस्यान्तरियात् ॥

पूर्ववत् ।

*आत्मा देहः ।

॥ यद्येस्यामरुतं प्रतिष्ठाया एनं च्यावयेद्दैव्यै च मानुष्यै च ॥

ङसो ङेद्वयम् ।

एवयामरुतस्त्यागे प्रतिष्ठान्वयविच्युतिः† ।

अथ सहत्वं स्तौति —

। नाभानेदिष्ठेनैव रेतोऽसिञ्चत् ॥

यष्टुरुत्पत्त्यर्थं होता ।

॥ तद्वालखिल्याभिर्व्यकरोत् ॥

प्रशास्ता वर्धयेत् सिक्तं वृद्ध्यर्थो विकृत्युच्यते§ ।

॥ सुकीर्तिना काक्षीवतेन योनिं व्यह्रापयत ॥

सुकीर्तिकीर्तनं ह्यत्र वृषाकपिसहत्वतः ।

¶अपप्राचेति शस्त्वाथ शस्यते हि वृषाकपिः ।

सूत्र्यते हि‡ — 'अपप्राच इन्द्रेति सुकीर्तिः, तस्यार्धर्चशश्चतुर्थीम्, अथ वृषाकपिं शंसेत्' इति ।

---

* 'आत्मा क्षेत्रज्ञः परमात्मा वा । तस्यान्तरयः शरीरवियोगः' इति गोविन्दस्वामी । † 'दैवी प्रतिष्ठा वैदिककर्मानुष्ठानम् । मानुषी तु प्रतिष्ठा प्रसिद्धैव' इति गोविन्दस्वामी । 'अविघ्नेन कर्मसमाप्तिर्दैवी प्रतिष्ठा । तत्साधनभूतधनादिसम्पत्तिर्मानुषी प्रतिष्ठा' इति सायणः । § 'विकारो विपरिणामः' इति गोविन्दस्वामी । 'व्यकरोत् विकृतं गर्भमकरोत्' इति सायणः । ¶ ऋक्सं० ८. ७. १९. १. ‡ आ० श्रौ० सू० ८. ३. २, ३, ४.

हो णिजडूलहूति पुक् चापि गर्भनिस्सरणाय वै ।
अवकाशं करोतीह ब्राह्मणाच्छंसिनामकः ॥

अत्रास्ति —

॥ उरौ यथा तव शर्मन् मदेमेति ॥

उरौ विस्तीर्णे । शर्मन् ङिलुक्, शर्माणि स्थाने । मदेम श्यनः स्वप्, माद्येम हर्षमनुभवेमेति ह्यर्थः ।

॥ तस्माद् ज्यायान् सन् गर्भः कनीयांसं सन्तं योनिं न हिनस्ति ॥

तस्मात्तथाहि । ज्यायान् वृद्धतरः । कनीयांसमल्पतरम् । ईयसुन् । [¶]'युवाल्पयोः कन्' ।

श्रोणियोन्यूर्मयश्चेति योनिः स्त्रीपुंसलिङ्गकः[1] ।
[§]'अयं ते योनिः' [‡]'स्वां योनि'मपीति खलु दृश्यते ।

॥ ब्रह्मणा हि स क्लृप्तः ॥

सप्रकाराकृतिः क्लृप्तिरात्मा ब्रह्म[*] प्रवर्तकः ।
योनेरबाधो गर्भेण परमेश्वरनिर्मितः ॥

॥ एवयामरुत्तैतत्रै करोति ॥

इणस्तवै तुमर्थे हि समर्थं गन्तुमेव तत् ।
अच्छावाकः करोत्यत्र त्वेवयामरुतं वदन् ।

॥ तेनेदं सर्वमेतत्रै कृतमेति यदिदं किञ्च ॥

---

[1] 'तः' ख. पाठः.

[¶] पा० सू०. ५. ३. ६४. [§] ऋक्सं० ३. १.३३. ५. [‡] ऐ० ब्रा० ३७. ४. [*] ब्रह्मणा सुकीर्तिनामकेन मन्त्रेण' इति सायणः । 'ब्रह्मणावेदेन परमेष्ठिना' इति गोविन्दस्वामी ।

सर्वमिति व्याचष्टे – यदिदं किञ्चेति । तेन ब्रह्मणा एति वर्तते ॥

प्रासङ्गिकं समापय्य प्रकृतं ह्यनुवर्तते —

॥ [*]अहश्च कृष्णमहरर्जुनं चेत्याग्निमारुतस्य प्रतिपत्[‡] ॥

उक्ताच्छस्त्राद्वैश्वदेवाद्यत् परं त्वाग्निमारुतम् ।
तस्य प्रतिपदाद्यं वै सूक्तं सप्तर्चमिष्यताम् ।

॥ अहश्चाहश्चेति पुनरावृत्तं पुनर्निनृत्तं षष्ठेऽहनि ॥

अक्षरैः पुनरावृत्तं पदावृत्त्या निनृत्तकम्[§] ।
निविद्वैश्वानरीयात्र परं षष्ठ्या निधीयते ।

॥ षष्ठस्याह्नो रूपम् ॥

॥ [¶]मध्वो वो नाम मारुतं यजत्रा इति मारुतम् ॥

सप्तर्चं निविद्धानम् ।

॥ बह्वभिव्याहृत्यम् ॥

[𝕮]'धारावरे'त्यत्र चेदं निरुक्तं वाक्यमिष्यताम् ।

॥ अन्तो वै बह्वन्तः षष्ठमहः षष्ठेऽहनि षष्ठस्याह्नो रूपम् ॥

॥ [+]जातवेदसे सुनवाम सोममिति जातवेदस्याच्युता ॥

---

[*] ऋक्सं० ४.५.११.१. [‡] 'अहश्च कृष्णं मध्वो वो नाम स प्रत्नथेत्याग्निमारुतस्य' आ० श्रौ० सू० ८.८.९. [§] अहःशब्दोऽत्र पुनः पुनः पठ्यमानत्वात् पुनरावृत्तमित्युच्यते । तालध्वानिसमानत्वाच्च पुनर्निनृत्तम्' इति सायणः. [¶] ऋक्सं० ५.४.२८.१. [𝕮] page 149. [+] ऋक्सं० १.७.८.१.

॥ *स प्रत्नथा सहसा जायमान इति जातवेदस्यम् ॥

नवर्चं निविद्धानम् ।

॥ समानोदर्कं षष्ठेऽहनि ॥

'देवा अग्निं धारयन्निति' ह्यावर्तते ।

॥ षष्ठस्याह्नो रूपम् ॥

अथ धारयन्निति पदं स्तौति —

॥ धारयन् धारयन्निति शंसति प्रस्रंसाद्वा अन्तस्य बिभाय ॥

लटो लिट्[1] स्रंस शैथिल्ये सत्रिसङ्गो बिभेत्यतः ।
अशैथिल्याय बहुशो धारयन्निति शंसति ।

सदृष्टान्तं स्पष्टयति —

॥ तद्यथा पुनराग्रन्थं पुनर्निग्रन्थमन्तं बध्नीयान्मयूखं वान्ततो धारणाय निहन्यात् तादृक्तद्यद् धारयन् धारयन्निति शंसति संतत्यै ॥

ग्रन्थेः क्त्वार्थे णमुल् । रज्ज्वादिषु पुनराग्रथ्य पुनर्निग्रथ्य च मयूखं शङ्कुं पावकर्मादिषु धारणाय दार्ढ्याय[§] निहन्यात् स्थापयेत् संतत्यै संश्लेषाय[2] च ।

---

[1] 'लिट् प्रस्रंसः शैथिल्यं' ख. घ. पाठः [2] 'संश्लेषणाय' ख. ङ. पाठः.

---

[*] ऋक्सं० १. ७. ३. १. [§] यथा 'चर्मकाराश्चर्मणोऽसङ्कोचाय' इति गोविन्दस्वामिसायणौ ।

॥ संततैस्त्र्यहैरव्यवच्छिन्नैर्यन्ति य एवं विद्वांसो यन्ति यन्ति ॥

*उक्तार्थम् । द्विरुक्तिरुक्तार्थाℒ ॥

दशमः खण्डः ।

इति षड्गुरुशिष्यविरचितायां महिदासैतरेयब्राह्मणवृत्तौ सुखप्रदायां
द्वाविंशोऽध्यायः ।

* * *

अथ त्रयोविंशोऽध्यायः ।

(षष्ठ ? पृष्ठ्य)स्य षळहस्याद्यस्त्र्यहश्छन्दोमसंज्ञितः ।
सूत्र्यते हि$ — 'पृष्ठ्यः षळहः पूर्वस्त्र्यहः पुनश्छन्दोमाः' इति ।
तस्य त्र्यहस्यादिमं तु वर्ण्यते सप्तमं त्वथ —

॥ यद्वा एति च प्रेति च तत् सप्तमस्याह्नो रूपम् । यद्ध्येव प्रथममहस्तदेवैतत् पुनर्यत् सप्तमम् ॥

एव खलु । स्पष्टयति —

॥ यद्युक्तवद्यद्रथवद्यदाशुमद्यद् पिबवद् यत् प्रथमे पदे देवता निरुच्यते यदयं लोकोऽभ्युदितः ॥

---

१. 'इति ब्राह्मण' ख. घ. ङ पाठः

---

* page 151. ℒ Vol 1. page 44. $ आ० श्रौ० सू० ८. ७. १८.

उक्तार्थम्[*] ।

॥ यज्जातवद्यदनिरुक्तं यत् करिष्यद्यत् प्रथमस्याह्नो रूपम्
एतानि वै सप्तमस्याह्नो रूपाणि ॥

जातवज्जनिमद्यच्च भविष्यत्प्रत्ययान्वितम् ।
अस्पष्टदेवतं यच्च प्रथमेऽहनि यत् स्थितम् ॥
एतानि सप्तमस्याह्नो योग्यानीत्यवगम्यताम् ।

तत्र,

॥ [‡]समुद्रादूर्मिर्मधुमाँ उदारदिति सप्तमस्याह्न आज्यं भवति ॥

एकादशर्चमस्मात् प्राक् तूष्णींशंसो निवित्तथा ।

॥ अनिरुक्तं सप्तमेऽहनि ॥

'समुद्रादेकादशाग्नेयं जगत्यन्तं सौर्यं वापं वा गव्यं वा घृतस्तुतिर्वा' इति हि [¶]सर्वानुक्रमणीति देवतानिर्णयाभावादनिरुक्त[१]त्वम् ।

॥ सप्तमस्याह्नो रूपम् ॥

एतत् स्तौति —

॥ वाग्वै समुद्रः ॥

वै इव । कथम् ।

---

[१] 'क्तम्' ख. पाठः.

---

[*] pages 108 & 109. [‡] ऋक्सं० ३. ८. १० १. 'अथ छन्दोमाः समुद्रादूर्मिरित्याज्यम्' आ० श्रौ० सू० ८. ९. १, २. [¶] म० ४. सू० ५८.

॥ न वै वाक् क्षीयते । न समुद्रः क्षीयते ॥

समुद्रोऽप्यपरिच्छेद्यो भवत्येवं हि भारते[S] —
"ब्रह्मर्षिणा च तपता वर्षाणां शतमत्रिणा ।
अनासादितगाधं च पातालतलमव्ययम् ॥"
इति ।

अशक्यं च परिच्छेत्तुमेवमेव हि वाङ्मयम् ।
स्मर्यते हि[*]— 'यथाहि परिमिता वर्णा अपरिमितां वाचो गतिम्'[1]इति ।

॥ तद्यदेतत् सप्तमस्याह्न आज्यं भवति यज्ञादेव तद्यज्ञं तन्वते वाचमेव तत् पुनरुपयन्ति संतत्यै । संततैस्त्र्यहैरव्यवच्छिन्नैर्यन्ति य एवं विद्वांसो यन्ति ॥

उक्तार्थम्[†] ।

पुनः स्तौति —

॥ आप्यन्ते वै स्तोमा आप्यन्ते छन्दांसि षष्ठेऽहनि ॥

व्यक्तम् । ततः किम् ।

॥ तद्यथैवादः ॥

एवमिवैतत् स्यादित्यर्थः ।

॥ आज्येनावदानानि पुनः प्रत्यभिघारयन्त्यथातयामताया एवमेवै-

---

[1] 'गतिमाप्नुवन्ति' ख. पाठः.

[S] आदिपर्वणि अध्या० १९ श्लो० १२. (Edited by V. S. Suktankar Ph. D.) [*] आ० श्रौ० सू० १०. ५. १६. [†] pages 151 & 163.

तत्स्तोमाँश्च छन्दांसि च पुनः प्रत्युपयन्त्ययातयामतायै यदेतत् सप्तमस्याह्न आज्यं भवति ॥

दर्शपूर्णमासादौ प्रत्यभिघारणवदाप्यायकत्वान्नीरसत्वनिवर्तकमिदं समुद्रीयं स्यादित्यर्थः ।

॥ तदु त्रैष्टुभम् ॥

उ. पुनः किमिदं प्रातस्सवन इत्याह —

॥ त्रिष्टुप्प्रातस्सवन एष त्र्यहः ॥

एष च्छन्दोमाख्यः ।

सप्तमेऽह्न्याज्य[1]मित्युक्तं प्रउगं प्रब्रवीत्यथ —

॥ [*]आवायो भूष शुचिपा उप नः [g]प्रयाभिर्यासि दाश्वांसमच्छा[ℂ]नो नियुद्भिः शतिनीभिरध्वरं [ct]प्र सोता जीरो अध्वरेष्वस्थाद्[ß] वायव इन्द्रमादनासो [†]या वां शतं नियुतो याः सहस्रं [¶]प्र यद्वां मित्रावरुणा स्पूर्धन्ना[×] गोमता नासत्या रथेनानो[§] देव शवसा याहि शुष्मिन् [$]प्र वो यज्ञेषु देवयन्तो अर्चन् [st]प्रक्षोदसा धायसा सस्र एषेति प्रउगम् ॥

---

[1] 'सप्तमेऽहन्याज्यमुक्तं' ख. पाठः.

[*] ऋक्सं० ५. ६. १४. १. [g] ऋक्सं० ५. ६. १४. ३. [ℂ] ऋक्सं० २. १. २४. ३. [ct] ऋक्सं० ५, ६. १४. २. [ß] ऋक्सं० ५. ६. १४. ४. [†] ऋक्सं ५. ६. १३. ६. [¶] ऋक्सं० ५. १. १०. ४. [×] ऋक्सं० ५. ५. १९. १. [§] ऋक्सं० ५. ३. १४. १. [$] ऋक्सं० ५. ४. १० १. [st] ऋक्सं० ५. ६. १९. १.

प्रयद्वाद्यास्तृचाः पञ्च पूर्वौ द्वौ तिसृभिस्तृचौ ।
सूत्र्यते हि[£] — 'याः सहस्रमित्येकपातिन्यः' इति ।

॥ एति च प्रेति च सप्तमेऽहनि ॥

आवायो प्रयाभिरिति ।

॥ सप्तमस्याह्नो रूपम् । तदु त्रैष्टुभं त्रिष्टुप्प्रातःसवन एष त्र्यहः ॥

मरुत्वतीयमाहाथ शस्त्रं माध्यंदिने पुरः —

॥ [*]आ त्वा रथं यथोतय [+]इदं वसो सुतमन्ध [‡]इन्द्र नेदीय एदिहि [§]प्रैतु ब्रह्मणस्पति[S]रग्निर्नेता [❡]त्वं सोम क्रतुभिः [&]पिन्वन्त्यपः [¶]प्र व इन्द्राय बृहत इति प्रथमेनाह्ना समान आतानः सप्तमेऽहनि ॥

तृचौ द्वृचतृचौ तिस्रो द्वृचः स्युः प्रथमे यथा ।

॥ सप्तमस्याह्नो रूपम् ॥

॥ [ℭ]कया शुभा सवयसः सनीळा इति सूक्तम् ॥

पञ्चदशर्चम् ।

॥ न जायमानो न शतेन जात इति ॥

अस्ति ।

[£] आ० श्रौ० सू० ८.९.२. [*] ऋक्सं० ६.५.१.१. [+] ऋक्सं० ५.७.१७.१. [S] ऋक्सं० ३.१.२०.४. [‡] ऋक्सं० ६.४.२३.१. [§] ऋक्सं० १.३.२९.३. [&] ऋक्सं० १.५.७.१, [¶] ऋक्सं० ६.६.१२.३. [❡] ऋक्सं० १.६.१९.२. [ℭ] ऋक्सं० २.३.२४.१.

॥ जातवत् सप्तमेऽहनि सप्तमस्याह्नो रूपम् ॥

॥ तदु कयाशुभीयम् ॥

उ प्रशस्तमित्यर्थः । कथम् ।

॥ एतद्वै संज्ञानं संतनि सूक्तं यत् कयाशुभीयम् ॥

*ऐकचित्यहेतुभूतं सन्तानस्य च वर्धनम् ।
जानातेः करणे ल्युट् च णिन्यवृद्धिश्च सन्तनः ॥

कथम्,

॥ एतेन ह वा इन्द्रोऽगस्त्यो मरुतस्ते समजानत ॥

ह पुरा ।

तदगस्त्येन्द्रमरुतां सूक्तमाहुर्मनीषिणः ।
कयाशुभेति संवादं न नूनमिति तद् द्वयोः§ ॥

इति ह्यार्षानुक्रमण्यां शौनकः समदीदृशत् ।
अगस्त्य इन्द्राय हविर्निरूप्य मरुतः प्रति ॥

तद्दातुमैच्छदिन्द्रोऽथागस्त्यमेत्य शुशोच ह ।
ततोऽगस्त्योऽपि मरुत इन्द्रेण समजीगमत् ॥

इत्यर्थः ।

॥ तद्यत् कयाशुभीयं शंसति संज्ञात्या एव ॥

संज्ञातिरेकचित्तता ।

॥ तद्वायुष्यम् ॥

---

* 'संज्ञानं परस्परैकमत्यसाधनम्' इति सायणः, 'संवादहेतुः' इति गोविन्दस्वामी ।

§ नेयमानुपूर्वी मुद्रितार्षानुक्रमण्यां दृश्यते ।

उ किञ्च । आयुष्यमायुषे हितम् । †‘मय उञो वो वा’ ।

। तद्योऽस्य प्रियः स्यात् कुर्यादेवास्य कयाशुभीयम् ॥

अस्य होतुः । कृतिरिति श्रद्धा ।

॥ तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते ॥

॥ *त्यं सुमेषं महया स्वर्विदमिति सूक्तम् ॥

पञ्चदशर्चम् ।

॥ अत्यं न वाजं हवनस्यदं रथमिति ॥

अस्ति ।

॥ रथवत् सप्तमेऽहनि सप्तमस्याह्नो रूपम् । तदु जागतम् ॥

भूम्नात जागतत्वम् । ‘त्यं सु त्रयोदश्यन्त्ये त्रिष्टुभौ शिष्टा जगत्यः’ इति हि सर्वानुक्रमणी‡ ।

॥ जगत्यो वा एतस्य त्र्यहस्य मध्यंदिनं वहन्ति । तद्धै तच्छन्दो वहति यस्मिन्निविद्धीयते तस्माज्जगतीषु निविदं दधाति । मिथुनानि सूक्तानि शस्यन्ते ॥

मिश्राणि । कथम् ।

---

† पा० सू० ८. ३. ३३. * ऋक्सं० १. ४. १२. १ ‡ म० १. सू० ५२. ‘त्यं सु त्रयोदश्यन्त्ये त्रिष्टुभौ’ इत्येतावानेव मुद्रितपाठः.

॥ त्रैष्टुभानि च जागतानि च ॥

ततः किम् ।

॥ मिथुनं वै पशवः ॥

पशूनां मिथुनकर्मण्यभिनिवेशात् ।

॥ पशवश्छन्दोमाः ॥

पशुसाधनत्वात् ।

॥ पशूनामवरुध्यै ॥

तन्मिश्रत्वं स्यात् ।
मरुत्वतीयमुक्त्वैवं निष्केवल्यं ब्रवीत्यथ —

॥ *त्वामिद्धि हवामहे §त्वं ह्येहि चेरव इति ॥

द्व्यृचभूततृचौ स्तोत्रियानुरूपौ । कुतः ।

॥ बृहत् पृष्ठं भवति सप्तमेऽहनि यदेव षष्ठस्याह्नस्तत् ॥

षष्ठेऽह्नि यद् बृहत् पृष्ठं स्यात् तदेव तु सप्तमे ।
नन्वभूद्रैवतं षष्ठे बृहन्नेत्यत आह ह —

॥ यद्वै रथन्तरं तद्वैरूपं यद् बृहत् तद्वैराजं यद्रथन्तरं तच्छाक्वरं यद् बृहत् तद्रैवतम् ॥

षष्ठे कृतं रैवतं यत्तत्कार्यत्वाद् बृहद्धि तत् ।

---

* ऋक्सं० ४. ७. २७. १. § ऋक्सं० ६. ४. ३७. २.

॥ तद्यद् बृहत् पृष्ठं भवति बृहतैव तद् बृहत् प्रत्युत्तभ्नुवन्त्यस्तोमकृन्तत्राय ॥

विच्छिन्नपतितोद्धार उत्तंभनमिहोच्यते ।
कृन्तत्रं छेदनं स्तोमो मध्यमा + त्र्यहान्वयी ॥
सन्धीयतेऽत्र बृह (तां ? ता) ह्युभयत्र कृतेन वै ।

रथंतरपृष्ठत्वं निन्दति —

॥ यद्रथन्तरं स्यात् कृन्तत्रं स्यात् ॥

यद् यदि ।

(पृ ? ष) ष्ठेनाह्नास्य विच्छेदः स्यात्तु पृष्ठे रथंतरे ।
रैवतं बृहतो जातं प्रागुक्तं न रथंतरात्[*] ।

निगमयति —

॥ तस्माद् बृहदेव कर्तव्यम् ॥

षष्ठत्वेन ।

॥ [§]यद्वावानेति धाय्याच्युता ॥

॥ [‡]अभि त्वा शूर नोनुम इति रथंतरस्य योनिमनु निवर्तयति । राथंतरं ह्येतदहरायतनेन ॥

---

[*] Page 105. [§] ऋक्सं० ८. ३. ५. ६. [‡] ऋक्सं० ५. ३. २१. २.

प्रथमेनाह्नातिदिष्टत्वात् ।

॥ [*]पिबा सुतस्य रसिन इति सामप्रगाथः ॥

त्र्यृचः ।

॥ पिबवान् सप्तमेऽहनि सप्तमस्याह्नो रूपम् ॥

॥ [¶]त्यमूषु वाजिनं देवजूतमिति तार्क्ष्योऽच्युतः ॥

प्रथमः खण्डः ।

॥ [$]इन्द्रस्य नु वीर्याणि प्रवोचमिति सूक्तम् ॥

पञ्चदशर्चम् ।

॥ प्रेति सप्तमेऽहनि ॥

प्रवोचमिति ।

॥ सप्तमस्याह्नो रूपम् ॥

॥ तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते ॥

॥ [ℂ]अभि त्यं मेषं पुरुहूतमृग्मियमिति सूक्तम् ॥

---

[*] ऋक्सं० ५. ७. २५. १ [¶] ऋक्सं० ८. ८. ३६. १ [$] ऋक्सं० १. २. ३६. १. [ℂ] ऋक्सं० १. ४. ९. १.

पञ्चदशर्चम् ।

मन्त्रभिः कीर्तितो नादौ तत् कुतोऽत्राभिरागतः ।
इति चोद्यं नुदन्नस्य प्र[1]साम्यं प्राह कौशलात् —

॥ यद्वाव प्रेति तदभीति सप्तमेऽहनि ॥

यत्र प्रेत्युच्यते तत्राप्यभिशब्दो जिघृक्षते ।
तुल्यार्थत्वेन तेनेह साक्षादेवाभिरागतः ॥
काकण्यर्थं प्रयातानां कोटिलाभोपमोऽह्ययम् ।
अतोऽभिशब्दवत्त्वं हि सुसंगतमितीष्यताम् ॥

॥ सप्तमस्याह्नो रूपम् ॥

॥ तदु जागतम् ॥

सूक्तेदं, त्रिष्टुभावन्त्ये जगत्योऽन्यास्त्रयोदश ।

'अभि त्यं पञ्चोना सव्यो द्वित्रिष्टुबन्तं शिष्टा जगत्यः'* इति हि सर्वानुक्रमणी+ ।

॥ जगत्यो वा एतस्य त्र्यहस्य मध्यंदिनं वहन्ति । तद्वै तच्छन्दो वहति यस्मिन्निविद्धीयते तस्माज्जगतीषु निविदं दधाति । मिथुनानि सूक्तानि शस्यन्ते त्रैष्टुभानि च जागतानि च । मिथुनं वै पशवः पशवश्छन्दोमाः पशूनामवरुध्यै ॥

निष्केवल्यमिति प्रोक्तं वैश्वदेवमथोच्यते —

---

[1] 'प्रा' क. ग. घ. पाठः.

---

* 'त्रिष्टुबन्तम्' इत्येतदन्त एव मुद्रितपाठः. + म० १. सू० ५१,

॥ [*]तत् सवितुर्वृणीमहे[§]ऽद्या नो देवसवितरिति वैश्वदेवस्य प्रतिपदनुचरौ राथन्तरेऽहनि सप्तमेऽहनि सप्तमस्याह्नो रूपम् ॥

॥ [¶]अभि त्वा देव सवितरिति सावित्रम् ॥

तृचं निविद्धानम् । सूच्यते हि[‡]— 'अभि त्वा देव सवितः प्रेतां यज्ञस्य शंभुवायं देवाय जन्मन इति तृचाः' इति ।

॥ यद्वाव प्रेति तदभीति सप्तमेऽहनि ॥

[&]उक्तार्थम् ।

॥ सप्तमस्याह्नो रूपम् । [ℭ]प्रेतां यज्ञस्य शंभुवेति द्यावापृथिवीयम् ॥

तृचं निविद्धानम् ।

॥ प्रेति सप्तमेऽहनि सप्तमस्याह्नो रूपम् ॥

॥ [$]अयं देवाय जन्मन इत्यार्भवम् ॥

तृचं निविद्धानम् ।

॥ जातवत् सप्तमेऽहनि ॥

जन्मन इति ।

॥ सप्तमस्याह्नो रूपम् ॥

---

[*] ऋक्सं० ४. ४. २५. १. [§] ऋक्सं० ४. ४. २५. ४. [¶] ऋक्सं० १. २. १३. ३.
[‡] आ० श्रौ० सू० ८. ९. ५. [&] Page 235. [ℭ] ऋक्सं० २. ८. १०. ४.
[$] ऋक्सं० १. २, २. १.

॥ *आयाहि वनसा सहेति द्विपदाः शंसति ॥

चतस्रः ।

॥ द्विपाद्वै पुरुषः । चतुष्पादाः पशवः पशवश्छन्दोमाः पशूनामवरुध्यै । तद्यद् द्विपदाः शंसति यजमानमेव तद् द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति ॥

तत्तत्र ।

॥ †ऐभिरग्ने दुवो गिर इति वैश्वदेवम्§ ॥

द्वादशर्चं निविद्धानम् ।

॥ एति सप्तमेऽहनि ॥

आ एभिरिति ।

॥ सप्तमस्याह्नो रूपम् । तान्यु गायत्राणि ॥

उ खलु । तानि सावित्रद्यावापृथिव्यार्भववैश्वदेवसूक्तानि चत्वारि । तृतीयसवने गायत्रीत्यत आह —

॥ गायत्रतृतीयसवन एष त्र्यहः ॥

सप्तमाष्टमनवमात्मकः ।

वैश्वदेवं शस्त्रमुक्तमुच्यतेऽथाग्निमारुतम् —

---

* ऋक्सं० ८. ८. ३०. १. † ऋक्सं० १. १. २६. १. § 'ऐभिरग्ने दुव इति वैश्वदेवम्' आ० श्रौ० सू० ८. ९. ५.

॥ वैश्वानरोऽजीजनदित्याग्निमारुतस्य प्रतिपत् ।

इतिराद्यर्थः । सूत्रे[‡] 'वैश्वानरो अजीजनदित्येका स विश्वमि'त्यादिपठितं तृचं निविद्धानम् ।

॥ जातवत् सप्तमेऽहनि ॥

अजीजनदिति ।

॥ सप्तमस्याह्नो रूपम् ॥

॥ [§]प्र यद्वस्त्रिष्टुभमिषमिति मारुतम् ॥

षट्त्रिंशदृचं निविद्धानम् ।

॥ प्रेति सप्तमेऽहनि ॥

प्र यदिति ।

॥ सप्तमस्याह्नो रूपम् ॥

॥ [£]जातवेदसे सुनवाम सोममिति जातवेदस्याच्युता । [$]दूतं वो विश्ववेदसमिति जातवेदस्यम् ॥

अष्टर्चं निविद्धानम् ।

॥ अनिरुक्तं सप्तमेऽहनि ॥

अस्पष्टार्थपदानां हि बाहुल्यादनिरुक्तता ।

[‡] आ० श्रौ० सू० ८. ९. ७. [§] ऋक्सं० ५. ८. १८. १. [£] ऋक्सं० १. ७. ८. १.
[$] ऋक्सं० ३. ५. ८. १.

॥ सप्तमस्याह्नो रूपम् । तान्यु गायत्राणि ॥

उ खलु । तानि वैश्वानरीयमारुतजातवेदस्यसूक्तानि त्रीणि ।

॥ गायत्रतृतीयसवन एष त्र्यहः ॥

इति छन्दोमाद्यमुक्तं नवरात्रस्य सप्तमम् ॥

द्वितीयः खण्डः ।

अथ द्वितीयं छन्दोमं नवरात्रस्य चाष्टमम् ।
प्ररोचयन् प्रब्रवीति हृष्टः शिष्टेष्टपुष्टये —

॥ यद्वै नेति न प्रेति यत् स्थितं तदष्टमस्याह्नो रूपम् । यद्ध्येव द्वितीयमहस्तदेवैतत् पुनर्यदष्टमम् ॥

एव खलु । स्पष्टयति —

॥ यदूर्ध्ववद्यत् प्रतिवद्यदन्तर्वद्यद् वृषण्वद्यद् वृधन्वद्यन्मध्यमे पदे देवता निरुच्यते यदन्तरिक्षमभ्युदितम् ॥

उक्तार्थम्* ।

॥ यद् द्व्यग्नि यन्महद्वद् यद् द्विहूतवद् यत् पुनर्वद् यत् कुर्वद् यद्

---

* page 122.

द्वितीयस्याह्नो रूपमेतानि वा अष्टमस्याह्नो रूपाणि ॥

अग्निशब्दद्वययुतं महदर्थान्वितं च यत् ।
ह्वेगो यत्र द्विरुक्तिश्च पुनर्वत् कुर्वदेव च ।
द्वितीयेऽहनि यच्चोक्तं रूपमाष्टमिकं त्विदम् ।

तत्र,

॥ [*]अग्निं वो देवमग्निभिः सजोषा इत्यष्टमस्याह्न आज्यं भवति[‡] ॥

दशर्चम् ।

॥ द्व्यग्न्यष्टमेऽहन्यष्टमस्याह्नो रूपम् ॥

॥ तदु त्रैष्टुभं त्रिष्टुप्प्रातस्सवन एष त्र्यहः ॥

इत्थमाज्यं शस्त्रमुक्त्वा प्रउगं प्रब्रवीत्यथ —

॥ [§]कुविदङ्ग नमसा ये वृधासः [£]पीवो अन्नां रयिवृधः सुमेधा [𝔖]उच्छन्नुषसः सुदिना अरिप्रा [ℭ]उशन्ता दूता न दभाय गोपा [Sl]यावत्तरस्तन्वो३ यावदोजः [$]प्रति वां सूर उदिते सूक्तैर्धेनुः[ʃ] प्रत्नस्य काम्यं दुहाना [¶]ब्रह्मा ण इन्द्रोप याहि विद्वानूर्ध्वो[×] अग्निः सुमतिं वस्वो अश्रेदुत[‖] स्या नः सरस्वती जुषाणेति प्रउगम् ॥

---

[*] ऋक्सं० ५. २. ३. १. [‡] 'द्वितीयस्याग्निं वो देवमित्याज्यम्' इति आ० श्रौ० सू० ८. १०. १. [§] ऋक्सं० ५. ६. १३. १. [£] ऋक्सं० ५. ६. १३. ३. [𝔖] ऋक्सं० ५. ६. १२. ४. [ℭ] ऋक्सं० ५. ६. १२. २. [Sl] ऋक्सं० ५. ६. १२. ४. [$] ऋक्सं० ५. ५. ७. १. [ʃ] ऋक्सं० ३. ४. ३. १. [¶] ऋक्सं० ५. ३. १२. १. [×] ऋक्सं० ५. ४. ६. १. [‖] ऋक्सं० ५. ६. १९. ४.

प्रतीकेषु चतुर्ष्वे(कं? का)[1] पञ्चमो द्वे तृचाः परे ।

सूच्यते हि[*] — 'अरिप्रा इत्येकपातिन्य उशन्ता दूता न दभाय गोपा यावत्तरस्तन्वो यावदोज इत्येका[2] द्वे चे'त्यादि ।

॥ प्रतिवदन्तर्वद् द्विहूतवदूर्ध्ववदष्टमेऽहनि ॥

'प्रति वामि'ति प्रतिवत् । 'अन्तः पुत्र' इत्यन्तर्वत् । 'मित्रं हुवे वरुणं पूतदक्ष'मिति द्वयोर्द्विः ह्वञस्ति । 'ऊर्ध्वो अग्नि'रित्यूर्ध्ववत् ।

॥ अष्टमस्याह्नो रूपम् । तदु त्रैष्टुभं त्रिष्टुप्प्रातःसवन एष त्र्यहः ॥

मरुत्वतीयमाहाथ शस्त्रं माध्यन्दिने पुरः —

॥ [¶]विश्वा नरस्य वस्पतिमिन्द्र[†] इत्सोमपा एक [‡]इन्द्र नेदीय एदि[°]ह्युत्तिष्ठ[§] ब्रह्मणस्पतेऽ[ʃ]ग्निर्नेता [ꝏ]त्वं सोम क्रतुभिः [+]पिन्वन्त्यपो [ct]बृहदिन्द्राय गायतेति द्वितीयेनाह्ना समान आतानोऽष्टमेऽहनि ॥

तृचौ द्वचतृचौ तिस्रो द्वचोऽत्र स्युर्द्वितीयवत् ।

॥ अष्टमस्याह्नो रूपम् ॥

---

[1] 'चतुर्ष्वैक्यं क. ग. घ. पाठः. [2] 'कं' ख. पाठः.

---

[*] आ० श्रौ० सू० ८. १०. १. [¶] ऋक्सं० ६. ५. १. ४. [†] ऋक्सं० ५. ७. १७. ४. [‡] ऋक्सं० ६. ४. २३. १. [§] ऋक्सं० १. ३. २०. १ [ʃ] ऋक्सं० ३. १. २०. ४ [ꝏ] ऋक्सं० १. ६. १९. २. [+] ऋक्सं० १. ५. ७. १. [ct] ऋक्सं० ६. ६. १२. १.

॥ *शंसा महामिन्द्रं यस्मिन् विश्वा इति सूक्तम् ॥

पञ्चर्चम् ।

॥ महद्वदष्टमेऽहनि ॥

महामिति ।

॥ अष्टमस्याह्नो रूपम् ॥

॥ $महश्चित्त्वमिन्द्र यत एतानिति सूक्तम् ॥

अष्टर्चम् ।

॥ महद्वदष्टमेऽहनि ॥

मह इति ।

॥ अष्टमस्याह्नो रूपम् ॥

॥ ¶पिबा सोममभि यमुग्र तर्द इति सूक्तम् ॥

पञ्चदशर्चम् ।

॥ ऊर्वं गव्यं महि गृणान इन्द्रेति ॥

अस्ति ।

॥ महद्वदष्टमेऽहनि ॥

---

* ऋक्सं० ३. ३.१३. १. $ ऋक्सं० २. ४. ८. १. ¶ ऋक्सं० ४. ६. १. १.

महि गृणान इति ।

॥ अष्टमस्याह्नो रूपम् ॥

॥ [§]महाँ इन्द्रो नृवदा चर्षणिप्रा इति सूक्तम् ॥

त्रयोदशर्चम् ।

॥ महद्वदष्टमेऽहनि ॥

महानिति ।

॥ अष्टमस्याह्नो रूपम् । तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते ॥

॥ [£]तमस्य द्यावापृथिवी सचेतसेति सूक्तम् ॥

द्वादशर्चं निविद्धानम् । सूत्र्यते हि[*] — 'अन्त्ये निविदं दध्यादनेकभावे सूक्तानामि'ति ।

॥ यदैत् कृण्वानो महिमानमिन्द्रियमिति ॥

अस्ति ।

॥ महद्वदष्टमेऽहनि ॥

महिमानं महच्छब्दाद्विलोप इमनिच्यभूत् ।

॥ अष्टमस्याह्नो रूपम् । तदु जागतं जगत्यो वा एतस्य त्र्यहस्य माध्यन्दिनं वहन्ति तद्धैतच्छन्दो वहति यस्मिन्निविद्धीयते तस्मा-

---

[§] ऋक्सं० ४. ६. ७. १, [£] ऋक्सं० ८. ६. १४ १. [*] आ० श्रौ० सू० ७. ११. १६

जगतीषु निविदं दधाति । मिथुनानि सूक्तानि शस्यन्ते त्रैष्टुभानि च जागतानि च । मिथुनं वै पशवः पशवश्छन्दोमाः पशूनामवरुद्ध्यै । महद्वन्ति सूक्तानि शस्यन्ते ॥

ततः किम् ।

॥ महद्वा अन्तरिक्षमन्तरिक्षस्याप्त्यै ॥

॥ पञ्च सूक्तानि शस्यन्ते पञ्चपदा पङ्क्तिः पाङ्क्तो यज्ञः पाङ्क्ताः पशवः पशवश्छन्दोमाः पशूनामवरुद्ध्यै ॥

मरुत्वतीयमित्युक्तं निष्केवल्यमथोच्यते —

॥ [*]अभि त्वा शूर नोनुमो[†]ऽभि त्वा पूर्वपीतय इति ॥

स्तोत्रियानुरूपौ द्वृचतृचौ । कुतः,

॥ रथन्तरं पृष्ठं भवत्यष्टमेऽहनि । [‡]यद्वावानेति धाय्याच्युता । [§]त्वामिद्धि हवामह इति बृहतो योनिमनुनिवर्तयति ॥

कुतः ।

॥ बार्हतं ह्येतदहरायतनेन ॥

द्वितीयेनाह्नातिदिष्टत्वात् ।

॥ [¶]उभयं शृणवच्च न इति सामप्रगाथः ॥

---

[*] ऋक्सं० ५. ३. २१. २. [†] ऋक्सं० ५. ७. २६. २. [‡] ऋक्सं० ८. ३. ५. ६
[§] ऋक्सं० ४. ७. २७. १. [¶] ऋक्सं० ६. ४. ३६. १.

द्वृचः ।

॥ यच्चेदमद्य यदु च ह्य आसीदिति ॥

उक्तार्थम्[*] ।

॥ बार्हतऽहन्यष्टमेऽहन्यष्टमस्याह्नो रूपम् । [$]त्यमू षु वाजिनं देवजूतमिति तार्क्ष्योऽच्युतः ॥

तृतीयः खण्डः

॥ [§]अपूर्व्या पुरुतमान्यस्मा इति सूक्तम् । महे वेशाय तवसे तुरायेति ॥

अस्ति ।

॥ महद्वदष्टमेऽहनि ॥

मह इति ।

॥ अष्टमस्याह्नो रूपम् ॥

॥ [ङ]तां सुते कीर्तिं मघवन् महित्वेति सूक्तम् ॥

---

[*] Page 127. [$] ऋक्सं० ८. ८. ३६. १. [§] ऋक्सं० ४. ७. ४. १.
[ङ] ऋक्सं० ८. १. १५. १.

षळृचम् ।

॥ महद्वदष्टमेऽहनि ॥

महित्वेति ।

॥ अष्टमस्याह्नो रूपम् ॥

॥ [*]त्वं महाँ इन्द्र यो ह शुष्मैरिति सूक्तम् ॥

नवर्चम् ।

॥ महद्वदष्टमेऽहनि ॥

महानिति ।

॥ अष्टमस्याह्नो रूपम् ॥

॥ [‡]त्वं महाँ इन्द्र तुभ्यं ह क्षा इति सूक्तम् ॥

एकविंशत्यृचम् ।

॥ महद्वदष्टमेऽहन्यष्टमस्याह्नो रूपम् ॥

॥ तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यते । [§]दिवश्चिदस्य वरिमा विपप्रथ इति सूक्तम् ॥

अष्टर्चम् ।

॥ इन्द्रं न महेति ॥

अस्ति ।

॥ महद्वदष्टमेऽहनि ॥

---

[*] ऋक्सं० १. ५. ४. १. [‡] ऋक्सं० ३. ५. २१. १. [§] ऋक्सं० १. ४. १९. १.

महद्वेति महता । अल्लोपः ।

॥ अष्टमस्याह्नो रूपम् ॥

॥ तद्दु जागतं जगत्यो वा एतस्य त्र्यहस्य मध्यन्दिनं वहन्ति तद्धैतच्छन्दो वहति यस्मिन्निविद्धीयते तस्माज्जगतीषु निविदं दधाति । मिथुनानि सूक्तानि शस्यन्ते त्रैष्टुभानि च जागतानि च । मिथुनं वै पशवः पशवश्छन्दोमाः पशूनामवरुद्ध्यै । महद्वन्ति सूक्तानि शस्यन्ते महद्वा अन्तरिक्षमन्तरिक्षस्याप्त्यै ॥

मरुत्वतीयेन सह निष्केवल्यं प्रशंसति —

॥ पञ्च पञ्च सूक्तानि शस्यन्ते पञ्चपदा पङ्क्तिः पाङ्क्तो यज्ञः पाङ्क्ताः पशवः पशवश्छन्दोमाः पशूनामवरुद्ध्यै। तानि द्वेधा ॥

कुर्यात्। तत्र,

॥ पञ्चान्यानि पञ्चान्यानि ॥

एकीकृत्य,

॥ दश सम्पद्यन्ते । सा दशिनी विराट् ॥

दशिनी दशत्ववती। व्रीह्यादीनेर्ङीप् ।

॥ अन्नं विराट् ॥

विराजनहेतुत्वात् ।

॥ अन्नं पशवः ॥

उपभोग्यत्वात् ।

॥ पशवश्छन्दोमाः पशूनामवरुद्ध्यै ॥

निष्केवल्यं शस्त्रमुक्तं वैश्वदेवमथोच्यते —

॥ [*]विश्वो देवस्य नेतुस्तत्[†] सवितुर्वरेण्यमा[‡] विश्वदेवंसत्पतिमिति वैश्वदेवस्य प्रनिपदनुचरौ । बार्हतेऽहन्यष्टमेऽहन्यष्टमस्याह्नो रूपम् । [§]हिरण्यपाणिमूतय इति सावित्रम् ॥

चतुर्ऋचं निविद्धानम् ।

॥ ऊर्ध्ववदष्टमेऽहनि ॥

ऊकार ऊर्ध्वशब्दस्य ह्येकदेशोऽत्र वर्तते ।

॥ अष्टमस्याह्नो रूपम् । [§]मही द्यौः पृथिवी च न इति द्यावापृथिवीयम् ॥

तृचं निविद्धानम् ।

॥ महद्वदष्टमेऽहन्यष्टमस्याह्नो रूपम् ॥

॥ [¶]युवाना पितरा पुनरित्यार्भवम् ॥

---

[*] ऋक्सं० ४. ३. ४. १. [†] ऋक्सं० ३. ४. १०. ५. [‡] ऋक्सं० ४. ४. २६. २. [§] ऋक्सं० १. २. ४. ५. [§] ऋक्सं० १. २. ६. ३. [¶] ऋक्सं० १. २. १. ४.

तृचं निविद्धानम् । सूत्र्यते हि[§] — 'हिरण्यपाणिमूतय इति चतस्रो मही द्यौः पृथिवी च नो युवाना पितरा पुनरिति तृचा'विति ।

॥ पुनर्वदष्टमेऽहनि ॥

पितरा पुनरिति ।

॥ अष्टमस्याह्नो रूपम् । [‖]इमा नु कं भुवना सीषधामेति द्विपदाः शंसति ॥

पञ्चर्चम् ।

॥ द्विपाद्वै पुरुषश्चतुष्पादाः पशवः पशवश्छन्दोमाः पशूनामवरुद्ध्यै । तद्यद् द्विपदाः शंसति यजमानमेव तद् द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति ॥

तत्तत्र,

॥ [¶]देवानामिद्वो महदिति वैश्वदेवम् ॥

नवर्चं निविद्धानम् ।

॥ महद्वदष्टमेऽहनि ॥

महदिति ।

[§] आ० श्रौ० सू० ८. १०. २. [‖] ऋक्सं० ८. ८. १५. १. [¶] ऋक्सं० ६. ६. ३. १.

॥ अष्टमस्याह्नो रूपम् । तान्यु गायत्राणि गायत्रतृतीयसवन एष त्र्यहः ॥

वैश्वदेवं शस्त्रमुक्त्वा प्रब्रवीत्याग्निमारुतम् —

[॥ ऋतावानं वैश्वानरमित्याग्निमारुतस्य प्रतिपत् ॥

तृचोऽयं सूत्रपठितो* निविद्धान ऋतादिकः ।

अत्रास्ति —

॥ अग्निर्वैश्वानरो महानिति । महद्वद्दष्टमेऽहन्यष्टमस्याह्नो रूपम् ॥

॥ §क्रीळं वः शर्धो मारुतमिति[1] मारुतम्¶ ॥

पञ्चदशर्चं निविद्धानम् ।

॥ जम्भे रसस्य वावृध इति ॥

अस्ति ।

॥ वृधन्वदष्टमेऽहनि ॥

वावृध इति वृद्धिमत् ।

॥ अष्टमस्याह्नो रूपम् ॥

---

[1] 'ति सूक्तं पञ्च' क. ख. पाठः.

---

* आ० श्रौ० सू० ८. १०. ३. § ऋक्सं० १. ३. १२. १. ¶ 'क्रीळं वः शर्धोऽग्ने मृळेत्याग्निमारुतम्' । आ० श्रौ० सू० ८. १०. ३.

॥ *जातवेदसे सुनवाम सोममिति जातवेदस्याच्युता । †अग्ने मृळ-
महाँ असीति जातवेदस्यम् ॥

अष्टर्चं निविद्धानम् ।

॥ महद्वदष्टमेऽहनि ॥

महानसीति ।

॥ अष्टमस्याह्नो रूपम् ॥

॥ तान्यु गायत्राणि गायत्रतृतीयसवन एष त्र्यह एष त्र्यहः ॥

‡द्विरुक्तिरुक्तार्थाख्यातमष्टमं त्वहरिष्टदम् ॥

चतुर्थः खण्डः ।

इति षड्गुरुशिष्यविरचितायां महिदासैतरेयब्राह्मणवृत्तौ सुखप्रदायां
त्रयोविंशोऽध्यायः ॥

* * *

अथ चतुर्विंशोऽध्यायः ।

छन्दोमानां तृतीयं यन्नवरात्रस्य चान्तिमम् ।
तदहर्नवमं सम्यक् प्रब्रवीति प्ररोचयन् —

---

* ऋक्सं० १. ७. ८. १. † ऋक्सं० ३. ५. ९. १. ‡ Vol I Page 44

॥ यद्वै समानोदर्कं तन्नवमस्याह्नो रूपम् । यद्ध्येव तृतीयमहस्तदेवैतत् पुनर्यन्नवमम् ॥

एव खलु । स्पष्टयति —

॥ यदश्ववद् यदन्तवद् यत् पुनरावृत्तंयत् पुनर्निनृत्तं यद्रतवद् यत् पर्यस्तवद् यत् त्रिवद् यदन्तरूपं यदुत्तमे पदे देवता निरुच्यते यदसौ लोकोऽभ्युदितः ॥

[*]उक्तार्थम् ।

॥ यच्छुचिवद् यत् सत्यवद् यत् क्षेतिवद् यद् गतवद् यदोकवद् यत् कृतं यत्तृतीयस्याह्नो रूपमेतानि वै नवमस्याह्नो रूपाणि ॥

शुचिशब्दः सत्यशब्द ओकशब्दश्च यत्र वै ।
संलोपः क्षी निवासेति धातुः क्षेतिस्तदन्वितम् ॥
यत् कृतं गमिनां युक्तं तार्तीयाश्वादिमच्च यत् ।
एतानि नवमस्याह्नो योग्यानीत्यवगम्यताम् ॥

तत्र,

॥ [†]अगन्म महा नमसा यविष्ठमिति नवमस्याह्न आज्यं भवति[§] ॥

तृचम् ।

॥ गतवन्नवमेऽहनि ॥

---

[*] Page 134. [†] ऋक्सं० ५. २, १५. १. [§] 'तृतीयस्यागन्म महेत्याज्यम्' आ० श्रौ० सू० ८. ११. १.

[$]मन्त्रे घसश्च लुङ्[1] (मो। 'म्वो)श्च'[ʒ] नोऽगन्म गामिधातुमत् ।

॥ नवमस्याह्नो रूपम् ॥

॥ तद्धु त्रैष्टुभं त्रिष्टुप्प्रातःसवन एष त्र्यहः ॥

आज्यं शस्त्रमाद्यमुक्त्वा प्रउगं प्रब्रवीत्यथ —

॥ [❦]प्र वीरया शुचयो दद्रिरे ते [+] ते सत्येन मनसादीध्याना [&]दिवि क्षयन्ता रजसः पृथिव्यामा[¶] विश्ववाराश्विना गतं नो[§]ऽयं सोम इन्द्र तुभ्यं सुन्व आतु [£]प्र ब्रह्माणो अङ्गिरसो नक्षन्त [‖]सरस्वतीं देवयन्तो हवन्त [*]आ नो दिवो बृहतः पर्वतादा [†]सरस्वत्यभि नो नेषि वस्य इति प्रउगम् ॥

षट्प्रतीकास्तृचा आदौ तिसृभिस्त्वन्तिमस्तृचः ।
'एकपातिन्य उत्तम' इति खल्वत्र सूत्र्यते[‡] ॥
ननु दद्रिर इत्यस्मात् कुतस्त्यं तेपदं परम् ।
शाकल्यस्य संहितायां वामिति ह्यध्यगीष्महि ॥
सत्यं प्रयोगपाठोऽयं वामुक्तावैन्द्रवायवः ।
तृचैः स्याद्वायुदेवत्यस्तत्रादितस्तृच इष्यते ॥
सर्वानुक्रमणीकारः कात्यायनमहामुनिः ।
'ऐन्द्र्यश्च या द्विवदुक्ता' इति स्पष्टं ब्रवीति ह[$] ॥

---

[1] 'घसभ्लुलुङ्' ग. घ. ङ. पाठः.

[$] पा० सू० २. ४. ८०. [ʒ] पा० सू० ८. २. ६५. [❦] ऋक्सं० ५. ६. १२. १. [+] ऋक्सं० ५. ६. १२. ५. [&] ऋक्सं० ५. ५. ६. १. [¶] ऋक्सं० ५. ५. १७. १. [§] ऋक्सं० ५. ३. १३. २. [£] ऋक्सं० ५. ४. ९. १. [‖] ऋक्सं० ७. ६. २४. २. [*] ऋक्सं० ४. २. २२. १. [†] ऋक्सं० ४. ८. ३३. ४. [‡] आ० श्रौ० सू० ८. ११. २ [$] सर्वा० ७. ९०

यद्वा बाष्कलपाठोऽयं ते हि ते इत्यधीयते ।
इदं च ब्राह्मणं प्राह संहिताद्वयगोचरम्[*] ।
मा भूर्चंतुह्युपवते[1] सुन्व आधित्वकग्रहात् (?) ॥

॥ शुचिवत् सत्यवत् क्षेतिवद् गतवदोकवन्नवमेऽहनि ॥

शुचयः सत्येन क्षयन्ता गतं नः प्रयाहि हरिवस्तदोका इति ह्यत्रास्ति ।

॥ नवमस्याह्नो रूपम् । तदु त्रैष्टुभं त्रिष्टुप्प्रातःसवन एष त्र्यहः ॥

मरुत्वतीयमाहाथ शस्त्रं माध्यन्दिने पुरः —

॥ [×]तं तामिद्राधसे महे [¶]त्रय इन्द्रस्य सोमा [&]इन्द्र नेदीय एदिहि [$]प्र नूनं ब्रह्मणस्पति[§]रग्निर्नेता [⁋]त्वं सोम क्रतुभिः [£]पिन्वन्त्यपो [‖]नकिः सुदासो रथमिति तृतीयेनाह्ना समान आतानो नवमेऽहनि ॥

तृचौ द्व्यचतृचौ तिस्रो द्व्यचश्चेह तृतीयवत् ।

॥ नवमस्याह्नो रूपम् ॥

॥ [ℂ]इन्द्रः स्वाहा पिबतु यस्य सोम इति सूक्तम् ॥

---

[1] 'मा सूर्चंन्नुपवते' ख. पाठः.

---

[*] 'ननु प्रवीरया शुचयो दद्रिरे वाम् इत्यस्यां शाकलसंहितायां पाठः । अतो वामिति प्रतीकेन भवितव्यम् । किमिदं दद्रिरे त इति अत्राह– स्यादेतदेवं यद्यस्या एव संहिताया इदं ब्राह्मणम् । एतत्तु बाष्कलकसंहिताया अपि समानम् । तथा निवित्प्रैषवालखिल्यकुन्तापानाम् । न केवलमैतरेयब्राह्मणमेव , आश्वलायनसूत्रमपि तथा । अस्य हि ब्राह्मणस्य तत् सूत्रमिति' इति गोविन्दस्वामी । [×] ऋक्सं० ६. ५. २. २. [¶] ऋक्सं० ५. ७. १८. २. [&] ऋक्सं० ६. ४. २३. १. [$] ऋक्सं० १. ३. २० ५. [§] ऋक्सं० ३. १. २०. ४ [⁋] ऋक्सं० १. ६. १९. २. [£] ऋक्सं० १. ५. ७. १. [‖] ऋक्सं० ५. ३. १८. ५. [ℂ] ऋक्सं० ३. ३. १४. १.

पञ्चर्चम् ।

॥ अन्तो वै स्वाहाकारः ॥

होममन्त्राणाम्* । सूच्यते हि+ 'स्वाहाकारान्तैर्मन्त्रैर्नचेन्मन्त्रे पठित' इति ।

॥ अन्तो नवममहः ॥

अन्त्यं छन्दोमत्र्यहस्य नवरात्रस्य वा त्रिवदम् ।

॥ नवमेऽहनि नवमस्याह्नो रूपम् । ‡गायत् साम नभन्यं यथा-वेरिति सूक्तम् ॥

त्रयोदशर्चम् ।

॥ अर्चाम तद्वावृधानं स्वर्वदिति ॥

अस्ति ।

॥ अन्तो वै स्वः ॥

§त्रिलोकान्ते हि स्वर्गः ।

॥ अन्तो नवममहः । नवमेऽहनि नवमस्याह्नो रूपम् ॥

---

* 'कथमन्तः स्वाहाकारः। (तया ?) प्रदानार्थतया स्वाहाकारेण वा वषट्कारेण वा देवेभ्यो हविः प्रदीयते इति श्रुतेः। प्रदानं च प्रक्षेपः। सहि यागस्यान्तः। अन्तो वै स्वाहाकार इत्युच्यते लक्षणया' इति गोविन्दस्वामी।

+ आ० श्रौ० सू० १. ११. १०

‡ ऋक्सं० २.४.१३.१.

§ 'अन्तो वै स्वरिति साधारणानि दिवश्चादित्यस्य च। स्वर्गो हि पुरुषार्थानां परमा काष्ठा। आदित्योऽप्यपवर्गहेतुतया' इति गोविन्दस्वामी।

॥ *तिष्ठा हरी रथ आ युज्यमानेति सूक्तम् ॥

एकादशर्चम् ।

॥ अन्तो वै स्थितम् ॥

भावे क्तः ।

सुखावस्थानसिद्ध्यर्था गत्यादिसकला क्रिया ।

॥ अन्तो नवममहः । नवमेऽहनि नवमस्याह्नो रूपम् ॥

॥ @इमा उ त्वा पुरुतमस्य कारोरिति सूक्तम् ॥

द्वादशर्चम् ।

॥ धियोरथेष्ठामिति ॥

अस्ति ।

॥ अन्तो वै स्थितम् । अन्तो नवममहर्नवमेऽहनि नवमस्याह्नो रूपम् । तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते । $प्र मन्दिने पितुमदर्चता वच इति सूक्तम् ॥

एकादशर्चं निविद्धानम् ।

॥ समानोदर्कं नवमेऽहनि ॥

मरुत्वन्तं सख्यायेति हि बहुकृत्वोऽस्ति ।

॥ नवमस्याह्नो रूपम् । तदु जागतम् ॥

---

* ऋक्सं० ३. २. १७. १. @ ऋक्सं० ४. ६. ११. १. $ ऋक्सं० १. ७. १२ १.

उ पुनः । भूम्नात्र जागतत्वम् । 'प्रमन्दिन एकादश कुत्सश्चतुस्त्रिष्टुबन्तं शिष्टा जगत्यः' इति हि सर्वानुक्रमणी* ।

॥ जगत्यो वा एतस्य त्र्यहस्य मध्यंदिनं वहन्ति । तद्वैतच्छन्दो वहति यस्मिन्निविद्धीयते तस्माज्जगतीषु निविदं दधाति । मिथुनानि सूक्तानि शस्यन्ते त्रैष्टुभानि च जागतानि च । मिथुनं वै पशवः पशवश्छन्दोमाः पशूनामवरुद्ध्यै ॥

॥ पञ्च सूक्तानि शस्यन्ते पञ्चपदा पङ्क्तिः पाङ्क्तो यज्ञः पाङ्क्ताः पशवः पशवश्छन्दोमाः पशूनामवरुद्ध्यै ॥

मरुत्वतीयमित्युक्तं निष्केवल्यमथोच्यते —

॥ [¶]त्वामिद्धि हवामहे [†]त्वं ह्येहि चेरव इति ॥

स्तोत्रियानुरूपौ दृचतृचौ । कुतः ।

॥ बृहत् पृष्ठं भवति नवमेऽहनि । [+]यद्वावानेति धाय्याच्युता । [§]अभि त्वा शूर नोनुम इति रथंतरस्य योनिमनु निवर्तयति राथंतरं ह्येतदहरायतनेन ॥

तृतीयेनाह्नातिदिष्ट[1]त्वात् ।

---

[1] 'नाह्नादिष्ट' ख. पाठः.

---

* मं० १. सू० १०१. 'प्रमन्दिन एकादश कुत्स आद्या गर्भस्त्राविण्युपनिषच्चतुस्त्रिष्टुबन्तम्' इति मुद्रितपाठः । ¶ ऋक्सं० ४. ७. २७. १ † ऋक्सं० ६. ४. ३७. २. + ऋक्सं० ८. ३. ५. ६. § ऋक्सं० ५. ३. २१. २.

॥ *इन्द्र त्रिधातु शरणमिति सामप्रगाथः । त्रिवन्नवमेऽहनि नवमस्याह्नो रूपम् । £त्यमूषु वाजिनं देवजूतमिति तार्क्ष्योऽच्युतः ॥

प्रथमः खण्डः ।

॥ §सं च त्वे जग्मुर्गिर इन्द्र पूर्वीरिति सूक्तम् ॥

पञ्चर्चम् ।

॥ गतवन्नवमेऽहनि ॥

जग्मुरिति ।

॥ नवमस्याह्नो रूपम् । ‡कदा भुवन्रथक्षयाणि ब्रह्मेति सूक्तम् ॥

पञ्चर्चम् ।

॥ क्षेतिवत् ॥

क्षयाणीति । अतश्च,

॥ अन्तरूपं क्षेतीव वा । अन्तं गत्वा नवमेऽहनि ॥

इव एव। छन्दोमानामन्तं गत्वा सत्रिगणः सुखं क्षेति निवसति ।

---

* ऋक्सं० ४. ७. २८. ४. £ ऋक्सं० ८. ८. ३६. १. § ऋक्सं० ४. ७. ६. १. ‡ ऋक्सं० ४. ७. ७. १.

॥ नवमस्याह्नो रूपम् । *आसत्यो यातु मघवाँ ऋजीषीति सूक्तम्[1] ॥

एकविंशत्यृचम् ।

॥ सत्यब्रह्मनवमेऽहनि नवमस्याह्नो रूपम् । ⁋तत्त इन्द्रियं परमं पराचैरिति सूक्तम् ॥

अष्टर्चम् ।

अन्ततः खलु तत्त्वानां परमं ब्रह्म तिष्ठति ।

॥ अन्तो वै परममन्तो नवममहर्नवमेऽहनि नवमस्याह्नो रूपम् ॥

॥ तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते ॥

॥ ¶अहं भुवं वसुनः पूर्व्यस्पतिरिति सूक्तम् ॥

एकादशर्चम् ।

॥ अहं धनानि संजयामि शश्वत इति ॥

अस्ति ।

॥ अन्तो वै जितम् ॥

विजयान्तं हि युद्धम् ।

---

[1] 'क्तं ञ्यवन्मैत्रावरुणोक्तम् ॥ एक' ख. पाठः.

---

* ऋक्सं० ३. ५. १६. १. ⁋ ऋक्सं० १. ७. १६. १. ¶ ऋक्सं० ८. १. ५. १.

॥ [1]अन्तो नवममहर्नवमेऽहनि नवमस्याह्नो रूपम् । तदु जागतम् । जगत्यो वा एतस्य त्र्यहस्य मध्यंदिनं वहन्ति तद्धैतच्छन्दो वहति यस्मिन्निविद्धीयते तस्माज्जगतीषु निविदं दधाति । मिथुनानि सूक्तानि शस्यन्ते त्रैष्टुभानि च जागतानि च मिथुनं वै पशवः पशवश्छन्दोमाः पशूनामवरुद्ध्यै ॥

मरुत्वतीयेन सह निष्केवल्यं प्रशंसति —

॥ पञ्च पञ्च सूक्तानि शस्यन्ते पञ्चपदा पङ्क्तिः पाङ्क्तो यज्ञः पाङ्क्ताः पशवः पशवश्छन्दोमाः पशूनामवरुद्ध्यै । तानि द्वेधा ॥

कुर्यात् । तत्र,

॥ पञ्चान्यानि पञ्चान्यानि ॥

एकीकृत्य,

॥ दश सम्पद्यन्ते सा दशिनी विराळन्नं विराळन्नं पशवः पशवश्छन्दोमाः पशूनामवरुद्ध्यै ॥

निष्केवल्यमित्थमुक्त्वा वैश्वदेवं ब्रवीत्यथ —

॥ *तत्सवितुर्वृणीमहे ‡ऽद्या नो देव सवितरिति वैश्वदेवस्य प्रतिपदनुचरौ । राथंतरेऽहनि नवमेऽहनि नवमस्याह्नो रूपम् । दोषो

---

[1] 'अन्तो वै न' घ. पाठः.

---

* ऋक्सं० ४. ४. २५. १. ‡ ऋक्सं ४. ४. २५. ४.

आगादिति सावित्रम् ॥

[¶]सूत्रकारेण पठितं निविद्धानमिदं तृचम् ।

॥ अन्तो वै गतमन्तो नवममहर्नवमेऽहनि नवमस्याह्नो रूपम् ॥

॥ *प्रवां महि द्यवी अभीति द्यावापृथिवीयम् ॥

तृचं निविद्धानम् ।

॥ शुचि उप प्रशस्तय इति ॥

अस्ति ।

॥ शुचिवन्नवमेऽहनि नवमस्याह्नो रूपम् ॥

॥ §इन्द्र इषे ददातु न†स्ते नो रत्नानि धत्तनेत्यार्भवम् ॥

इन्द्र एका द्वे तु तेनो निविद्धानमिदं तृचम् ।

सूत्र्यते हि‡ — 'दोषो आगात् प्रवांम हिद्यवी अभीति तृचाविन्द्र इषे ददातु नस्ते नो रत्नानि धत्तनेत्येका द्वे चे'ति ।

॥ त्रिरा साप्तानि सुन्वत इति ॥

आस्ति ।

॥ त्रिवन्नवमेऽहनि नवमस्याह्नो रूपम् ॥

॥ [‖]बभ्रुरेको विषुणः सूनरो युवेति द्विपदाः शंसति ॥

[¶] आ० श्रौ० सू० ८. ११. ३ * ऋक्सं० ३. ८. ८. ५. § ऋक्सं० ६. ६. २७. ४. [‖] ऋक्सं० ६. २. ३६. १. † ऋक्सं० १. २. २. २. ‡ आ० श्रौ० सू० ८. ११. ३.

ऋचो दश ।

॥ द्विपाद्वै पुरुषश्चतुष्पादाः पशवः पशवश्छन्दोमाः पशूनामवरुद्ध्यै तद्यद् द्विपदाः शंसति यजमानमेव तद् द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति ॥

॥ *ये त्रिंशति त्रयस्पर इति वैश्वदेवम् ॥

पञ्चर्चं निविद्धानम् ।

॥ त्रिवन्नवमेऽहनि ॥

त्रय इति ।

॥ नवमस्याह्नो रूपम् । तान्यु गायत्राणि गायत्रतृतीयसवन एष त्र्यहः ॥

वैश्वदेवं[1] शस्त्रमुक्त्वा प्रब्रवीत्याग्निमारुतम् —

॥ वैश्वानरो न ऊतय इत्याग्निमारुतस्य प्रतिपत् ॥

@सूत्रकारेण पठितं निविद्धानमिदं तृचम् ।

॥ आ प्रयातु परावत इति ॥

अस्ति ।

---

[1] 'देवशस्त्र'. ख. पाठः.

---

* ऋक्सं० ६. २. ३५. १. 'ये त्रिंशतीति वैश्वदेवम्' इति आ० श्रौ० सू० ८. ११.
३. @ आ० श्रौ० स० ८. ११. ४.

॥ अन्तो वै परावतः ॥

परावदिति दूराख्या स्वर्थे ङसिह वै कुतः ।

॥ अन्तो नवममहर्नवमेऽहनि नवमस्याह्नो रूपम् ॥

॥ [*]मरुतो यस्य हि क्षय इति मारुतम् ॥

दशर्चं निविद्धानम् ।

॥ क्षेतिवत् ॥

क्षय इति । अतश्च[1],

॥ अन्तरूपम् । क्षेतीवं वा अंन्तं गत्वा नवमेऽहनि ॥

उक्तार्थम्[§] ।

॥ नवमस्याह्नो रूपम् । [‖]जातवेदसे सुनवाम सोममिति जातवेदस्याच्युता । [¶]प्राग्नये वाचमीरयेति जातवेदस्यम् ॥

पञ्चर्चं निविद्धानम् ।

॥ समानोदर्कं नवमेऽहनि ॥

सनः पर्षदिति बहुकृत्वोऽस्ति ।

---

[1] 'ततश्च'.

---

[*] ऋक्सं० १. ६. ११. १.   [§] Page 258.   [‖] ऋक्सं० १. ७. ८. १.

[¶] ऋक्सं० ८. ८. ४५. १.

॥ नवमस्याह्नो रूपम्[१] ॥

अत्र,

॥ सनः पर्षदति द्विषः सनः पर्षदति द्विष इति शंसति ॥

ततः किम् ।

॥ बहु वा एतस्मिन्नवरात्रे किञ्च किञ्च वारणं क्रियते ॥

बहु विपुलं वारणं निरोधः । किञ्चित् किञ्चिदौपदेशैः प्राकृते निवर्तिते प्रयोगो हस्तरोघोऽनुभूयते वा स्यात् । ततोऽपि किम् ।

॥ शान्त्या एव तद्यत् सनः पर्षदति द्विषः सनः पर्षदति द्विष इति शंसति सर्वस्मादेवैनं तद्देनसः प्रमुञ्चति ॥

तत्तत्र । शंसति यद् एनसः पापात् सर्वस्मादेनान् सत्रिणः होता प्रमुञ्चति । तत् । मुचिरन्तर्णीतण्यर्थः । प्रमोचयति ।

॥ तान्यु गायत्राणि ॥

उ खलु । आग्निमारुतस्य सूक्तानि त्रीणि ।

॥ गायत्रतृतीयसवन एष त्र्यहः ॥

उक्तार्थम्* ।

नवरात्र इति प्रोक्तो दुर्ज्ञानो दुर्वचस्तथा ।
रूपशब्दबहुत्वेन रूपवानिति नामवान् ॥

---

[१] 'रूपं स नः' ख. पाठः.

* page 237.

नामोरुवेत्यपभ्रंशः + + वाळिति वै यथा ।
संहिता शङ्किता गृह्यं क्किनिह्यं दक्षिणा यथा ॥
तक्षणा तवणा मूलं मुतल् मुन्नपुं पुनस्तु पिन् ।
हुङ्कारिकटिटाटीति प्राहुर्बह्वृचकुञ्जराः ॥ (?)
रूपवान् नाम भागोऽयं पञ्चविंशतिखण्डकः ।
पूर्वेणैकोनपञ्चाशच्छतेन सह ते गताः ।
खण्डाः शतं सप्ततिश्च चत्वारश्चेति गृह्यतात् ॥

द्वितीयः खण्डः ।

उरुवा समाप्ता ।

[1]ब्रह्मा वेदश्चतुर्वेदपारायणपरायणः ।
सरस्वतीवल्लभो मां परिपातु चतुर्मुखः ॥
नीलकण्ठाद्रिजाकान्त शिव शम्भो जगत्पते ।
मामुद्धर दयाम्भोधे मग्नं संसारसागरात् ॥
गोविन्द रक्ष मां सम्यक् सम्यग् गोविन्द रक्ष माम् ।
अनन्यशरणं श्रान्तं रक्ष गोविन्द मां सदा ॥
षड्भ्यो नमो नमः षड्भ्यः पुनः षड्भ्यो नमो नमः ।
सप्तविद्याप्रदायिभ्यो गुरुभ्योऽस्तु नमः सदा ॥
[2]उरुवान्तग्रन्थसङ्ख्या षट्सहस्रशतद्वयम् ।

---

[1] इदमादि पद्यचतुष्कं न दृश्यते ख. ङ मातृकयोः ।
[2] 'उरुवान्तर्गतं ग्रन्थं षट्' इति ङ. पाठः.

सहस्रमुरुत्वा द्वे च शते पञ्चसहस्रकम् ॥
वर्णितो नवरात्रोऽथ दशमं वक्ष्यते त्वहः ।

अत्र च,

द्वादशाहमध्यगन्ता दशरात्रस्त्रिभक्तिकः ॥
पृष्ठ्यः षळहः छन्दोमास्त्र्यहश्च दशमं त्विति ।

अत्राद्यंभक्तिं दशमं चतुरादौ प्रशंसति —

॥ पृष्ठ्यं षळहमुपयन्ति ॥

आदौ सत्रिणः । स च,

॥ यथा वै मुखमेवं पृष्ठ्यः षळहः ।

ओष्ठादि प्राक्कण्ठमर्मुखं दे(व ! ह)स्य वै यथा ।
द्वादशा(हः स ! हस्य) मन्तव्य एवं पृष्ठ्योऽभिपूजितः ॥

॥ तद्यथान्तरं मुखस्य जिह्वा तालु दन्ता एवं छन्दोमाः ॥

ङ्यर्थेऽमत्वन्तरे (!) मध्ये[1] वर्त(ते) तालु काकुदम् ।
मुखस्य जिह्वा रसना यथा दन्तास्तथा त्रयः ॥
छन्दोमा द्वादशाहस्य तत्तत्र खलु पूजिताः ।
पृष्ठ्यछन्दोमस्तुतिश्च दशमस्तुतिसिद्धये ॥

॥ अथ येनैव वाचं व्याकरोति येन स्वादु चास्वादु च विजानाति

---

[1] 'मध्य', ख. पाठः.

*तद्दशममहः ॥

येन वागिन्द्रियेण । व्याकृतिरुक्तिः । वाक् शब्दः । स्वादु मृष्टम् । किञ्च,

॥ यथा वै नासिके एवं पृष्ठ्यः षळहः ॥

बिलापेक्षं द्वित्वम् ।

॥ तद्यथान्तरं नासिकयोरेवं छन्दोमाः ॥

अन्तरं छिद्रम् ।

॥ अथ येनैव गन्धान् विजानाति तद्दशममहः ॥

येन घ्राणेन्द्रियेण ।
किञ्च,

॥ यथा वा अक्ष्येवं पृष्ठ्यः षळहः । तद्यथान्तरमक्ष्णः कृष्णमेवं छन्दोमाः ॥

अन्तरम्, अन्तरे मध्ये । कृष्णं मण्डलं[1] मणिः ।

---

[1] 'मण्डमं' ग. घ. पाठः.

---

* तदिति तत्र लुप्तोपमा । यथा सिंहो देवदत्तः व्याघ्रो देवदत्तः अग्निर्माणवकः इति । तद्वत् दशममहः इति यावत् । दशममहरित्यनुवादः । यथा पृष्ठ्यं षळहमुपयन्ति इति । ननु छन्दोमानां पृष्ठ्यावयवत्वात् तदान्तरसंस्तवो युक्तः । आह च - पूर्वस्त्र्यहः पुनश्छन्दोमा इति । दशमस्य पुनरह्नः पृष्ठान्तरत्वं कथमिति । अत्रोच्यते — पार्ष्ठिकं प्रथममहरग्निष्टोमसंस्थम् । आन्तरं च तत् षडहस्य । आहच 'अग्निष्टोमः प्रथमं षोडशी चतुर्थमुक्थ्या इतरे' इति । अविवाक्यमप्यहरग्निष्टोमसंस्थमेव आहच - 'दशमेऽहन्यनुष्टुभाम्' इति प्रक्रम्योपसंहारे 'अग्निष्टोम इदमहः' इति । अतः संस्थासामान्यात् षडहाभ्यन्तरतया स्तुतिः' इति गोविन्दस्वामी ।

॥ अथ यैव कनीनिका येन पश्यति तद्दशममहः ॥

तारा कनीनिका । येनाक्षिगोळद्वयवर्तिना चक्षुरिन्द्रियेण ।
किञ्च,

॥ यथा वै कर्ण एवं पृष्ठयः षळहः । तद्यथान्तरं कर्णस्यैवं छन्दोमाः ॥

अन्तरमवकाशः कर्णस्य गोळद्वयरूपस्य ।

॥ अथ येनैव शृणोति तद्दशममहः ॥

येन श्रोत्रेन्द्रियेण[1] ।
किञ्च,

॥ श्रीर्वै दशममहः ॥

प्राप्यते दशमेनाह्ना श्रीसमृद्धिर्हि सत्रिभिः[2] ।
ततश्च,

॥ श्रियं वा एत आगच्छन्ति ये दशममहरागच्छन्ति ॥

आगतिरनुष्ठानं प्राप्तिश्च ।

॥ तस्माद्दशममहरविवाक्यं* भवति । मा श्रियोऽवच्छादिष्मेति ॥

माङि लुङ् मस् सलोपश्च्लेः सिज्वृद्धिः षत्वमिड् छदेः ।
स्पष्टयति —

॥ दुखवदं हि श्रेयसः ॥

---

[1] 'त्रेण' ख. पाठः. [2] 'श्रीस्समृद्धिर्हि' क. ख. पाठः.

---

* तथाचा श्रौ० सू० — 'नास्मिन्नहनि केनचित् कस्यचिद् विवाच्यमविवाक्यमित्येतदाचक्षते' इति । ८. १२. १०.

*श्रेयस्शब्दादर्शे आद्यच् सुश्रामर्थे वदेश्च खल् ।
श्रेयोयुक्तं वस्तु लोके दुःसहाभिमतं खलु ।
अत्रर्त्विजः स्वकार्यज्ञ (न? ना)न्यापे(क्ष? क्षा) इतीष्यताम् ।
दुःशकत्वे सूत्र्यते यत् संशयेत्यादि तद् भवेत् ॥

†‘संशये बहिर्वेदि स्वाध्यायप्रयोगोऽन्तर्वेदीत्येके न व्यजनेनोपहितेन वार्थं’ इति ।

अह्नः प्रातरनूक्त्यादि स्यादग्निष्टोमसंस्थकम् ।
‡‘दशमेऽहनी’त्यादिसूत्रे प्रोक्तं सर्वमिहेष्यताम् ।

तदाह —

॥ ते ततः सर्पन्ति ते मार्जयन्ते ॥

सृपिणा लक्ष्यते सोमो मृजिना धातुना पशुः ।
प्रसर्पणं सोमयोगि मार्जनं पशुयोगि यत् ॥
¶ततस्तेन प्रकारेण द्विस्त इत्यादरादिह ।

॥ ते पत्नीशालां संप्रपद्यन्ते ॥

पत्नीशालां प्राग्वंशस्थमाहवनीयमुत्तरवेद्यपेक्षया गार्हपत्यम् । पत्नीसंयाजेभ्य ऊर्ध्वं विशेषहोमार्थं गच्छेयुः । सूत्र्यते हि§ — अग्निष्टोम इदमहरूर्ध्वं पत्नीसंयाजेभ्यो गार्हपत्ये जुह्वतीह रमे’त्यादि । तत्र,

॥ तेषां य एतामाहुतिं विद्यात् स ब्रूयात् समन्वारभध्वमिति ॥

---

* श्रेयस इति । हेतावियं षष्ठी । निरपवद्यत्वात् श्रेयसः इत्यर्थः’ इति गो, ‘लोकेऽपि श्रेयसो विद्यैश्वर्यादिनाधिकस्य पुरुषस्याचरणं दुखवदम्’ इति सायणः. † आ० श्रौ० सू० ८. १२ – ११, १२, १३. ‡ आ० श्रौ० सू० ८. १२. १. ¶ ‘ततः पत्नीसंयाजान्तानुष्ठानादूर्ध्वम्’ इति सायणः. § आ० श्रौ० सू० ८. १२. २६, २७. ८. १३. १.

तेषां तु सत्रिणां मध्ये योऽस्य होमस्य वेदिता ।
स वदेज्जुहुतं मां हि सर्वे स्पृशत सत्वराः ॥
अज्ञस्यानधिकारत्वा*ज्ज्ञानप्रौढिस्तु वेदनम् ।
जैमिनिर्हि सूत्रयति‡ व्यासशिष्यो महामुनिः —

'ज्ञाने[1] च वाचनं नह्यविद्वान् विहितोऽस्तीति' कलसिवाचने । किञ्च,

मन्त्रयागकण्टकाख्यकर्म कर्तुं न चार्हति ॥
ऋषिच्छन्दोदैवतानि ब्राह्मणार्थस्वराद्यपि ।
अविदित्वा प्रयुञ्जानो मन्त्रकण्टक उच्यते ॥
मन्त्राणां दैवतं छन्दो निरुक्तं ब्राह्मणानृषीन् ।
कृत्तद्धितादि वाज्ञात्वा यजन्तो यागकण्टकाः ॥
कण्ट् पीडकङ्कतक तपतीति च निर्वचः (?) ।

॥ स जुहुयात् ॥

तैः समारब्धः । केन मन्त्रेण,

। इह रमेह रमध्वमिह धृतिरिह स्वधृतिरग्नेऽवाट् स्वाहावाळिति ॥

व्याचष्टे —

॥ स यदिह रमेत्याहास्मिन्नेवैनांस्तल्लोके रमयति ।

तत्तेन । एनान् सत्रिणः । रमा हि श्रीः ।

॥ इह रमध्वमिति यदाह प्रजामेवैषु तद्रमयति ॥

---

[1] 'ज्ञाते' इति मुद्रितपाठः.

---

* 'समन्वारभध्वमिति । अनेनैतद् गम्यते – सर्वमन्त्रार्थानभिज्ञस्यापि कर्मस्वधिकारोऽस्तीति । आह च यदि नाधीयादिति' इति गोविन्दस्वामी । ‡ ३. ८. १८.

आह यद् रमयति तत् ।

प्रजारते[1] सारतं हि (?) श्रुतिस्मृत्यनुसारिणी ।

॥ इह धृतिरिह स्वधृतिरिति यदाह प्रजां चैव तद्वाचं च यजमानेषु दधाति ॥

आह यद् दधाति तत् ।

प्रजया हि धृतिः प्रीतिः (च य ? ख) धृतिर्वा प्रियात्मिका ।

किञ्च,

॥ अग्नेऽवाळिति रथंतरं स्वाहावाळिति बृहत् ॥

वाळि वृद्धि होता वहते तिवि लोपे तिशि वाळिति (?) ।
रथंतराग्नी संश्लिष्यौ बृहत्सूर्यौ च संगतौ ।

वक्ष्यते हि* — 'अग्निर्वै रथंतरमादित्यो बृहदि'ति ।

स्तौति —

॥ देवानां वा एतन्मिथुनं यद् बृहद्रथंतरे ॥

यत् ये ।

॥ देवानामेव तन्मिथुनेन मिथुनमवरुन्धते ॥

मिथुनं पुत्रदुहित्रादि । अवरुन्धते प्राप्नुवन्ति ।

॥ देवानां मिथुनेन मिथुनं प्रजायन्ते ॥

---

[1] 'पते' ग. घ. पाठः [2] 'वाँ' ग. पाठः [3] 'हि' घ. पाठः

---

* ऐ० ब्रा० २५. ५.

प्रज्ञातिरनुभवः ।

॥ प्रजात्यैँ प्रजायते प्रजया पशुभिर्य एवं वेद ॥

किञ्च,

॥ ते ततः सर्पन्ति ते मार्जयन्ते ॥

*उक्तार्थम् ।

॥ त आग्नीध्रं संप्रपद्यन्ते ॥

होमार्थम् ।

॥ तेषां य एतामाहुतिं विद्यात् स ब्रूयात् समन्वारभध्वमिति ॥

§उक्तार्थम् ।

॥ स जुहुयात् ॥

केन,

॥ उपसृजन् धरुणं मातरं धरुणो धयन् । रायस्पोषमिषमूर्जमस्मासु दीधरत् स्वाहेति ॥

स्तौति —

॥ रायस्पोषमिषमूर्जमवरुन्ध आत्मने च यजमानेभ्यश्च यत्रैवं विद्वानेतामाहुतिं जुहोति ॥

---

* page 269 § page 270

य: यत्र । सोऽवरुन्धे आर्जयति आत्मने स्वस्मै ।
इडन्नमूर्ग्बलं रायस्पोषं तु धनपूर्णता ॥

तृतीयः खण्डः ।

॥ ते ततः सर्पन्ति ॥

ते सत्रिणः । तत आग्नीध्रीयात् सर्पन्ति निर्गच्छेयुः । अथ,

॥ ते सदः संप्रपद्यन्ते ॥

प्रविशेयुः ।

॥ यथायथमन्य ऋत्विजो व्युत्सर्पन्ति ॥

वि नाना ।

॥ संसर्पन्त्युद्गातारः ॥

सं सह मनसाऽव्यस्तुत्यर्थम् । *श्रूयते हि — 'सदः प्रसृप्य मानसेन स्तुवत इति ।

॥ ते सर्पराज्ञा[1] ऋक्षु स्तुवते ॥

त उद्गातारः ।
सर्पराज्ञीति या नाम प्रथिता ब्रह्मवादिनी ।
£'आयं गौ'रिति साद्राक्षीदृचस्तिस्रः समाधिना ॥

---

[1] 'ज्ञ्या' मुद्रितपाठः.

---

* आ० श्रौ० सू० ८. १३. ३. £ ऋक्सं० ८. ८. ४७. १.

सर्पराझ्या[१] इति पदे यलोपः छान्दसस्त्विह* ।
§ दीर्घायुत्वारमङ्गिरस इष्कर्तारं यथा खलु ।
निसो[२] नकारः सकार आयुषश्चेह लुप्यते ।

स्तौति —

॥ इयं वै सर्पराज्ञी ॥

इयं भूमिः ।३ कथम् ।

---

१. 'ज्ञा' घ. पाठः । २. 'नसो' ग. घ. पाठः.

---

* 'सर्पराज्ञी ब्रह्मवादिनी सा यासामृचामृषिः ताः सर्पराज्ञाः सर्पराजन्या ऋचः । ताश्च आयं गौः इति तिस्रः ।

ननु सयकारेण प्रयोगेण भवितव्यम् किमिदं सर्पराज्ञा इति यकारशून्यः प्रयोगः । स्मरति च शब्दवित् 'आण् नद्याः' इति । यणादेशे च यकारो अवश्यम्भावी । अथ यकारशून्यं प्रयुञ्जते इति चेद् अन्यथापि प्रयुञ्जत एव । अत उभयोर्लक्षणयुक्तः प्रयोगोऽनुसरणीयः । अत्रोच्यते— यकारशून्योऽपि प्रयोगोऽस्तीति त्वयाभ्युपगतम् । अस्ति चेत् स एव नियम्यते ।

ननु सयकारोऽपि प्रयोगोऽस्त्येव । स हि लक्षणयुक्तः । तद्युक्तश्च प्रयोगोऽनुसरणीय इत्युक्तम् । उच्यते— 'उक्तस्त्वयैव परिहारो लक्षणयुक्तः प्रयोग इति वदता । कथम् ? सयकारः प्रयोगः उपपद्यत इत्यभिप्रायः साधुः इति । अत्राह— लक्षणं चेन्नाद्रियते किमिति गाव्यादयः शब्दा अपभ्रंशाः । लक्षणयुक्तः प्रयोगस्तत्रानादिरिति चेद् , अत्रापि तुल्यं वक्तव्यो वा विशेषः । अयकारः प्रयोगो दुर्हण उच्यते परमार्थस्तत्र प्रयोगः इह त्वक्षरग्रहणार्थः । ततः किं गाव्यादिनापि शब्देन तत्राभिप्रेतार्थसिद्धिः इत्यत्रानादरः प्रयोगे स्या(१)त् । इह तु स्वाध्यायोऽन्यथा न सिद्ध्यति इत्यभिप्रायः । अनादित्वस्मरणाच्च तत्र गोशब्दः सास्नादिमति साधु. इतरेऽपभ्रंशा इति । किञ्च सावकाशनिरवकाशत्वाच्च न केवलमेतद्वाक्यगतसर्पराज्ञीशब्दं प्रत्ययणादेशस्मरणम् (?) । 'इकोऽचि परतो यणः स्युर्लोकवेदप्रयोगयोः । इक्प्रयोगप्रसङ्गे तु यणसाधुरिति स्मृतिः'(?) ॥ किञ्चालाक्षणिकश्च प्रयोगो वेदे विद्यते— जहाका अणुका इत्येवमादयः । किञ्च प्रयोगमूलं हि लक्षणम् । न लक्षणवशात् प्रयोगः शासितव्यः । अतो विनाशाच्छिन्नमूलत्वात् कैश्चिदेव परिग्रहात् सयकारः प्रयोगस्त्याज्य इति स्थितम्' इति गोविन्दस्वामी ।

'सर्पराज्ञीति भूमेरवतारस्वरूपा काचिद्देवता । तया दृष्टा मन्त्रा अपि सर्पराज्ञीशब्देनोच्यन्ते । अत्र तु ऋक्ष्वत्ति पृथगुपादानात् सर्पराझ्या इति षष्ठ्यन्तत्वाच्च देवतावाच्येवायं शब्दः' इति सायणः । एवञ्च सायणमते सर्पराझ्या इति एव सयकारकः पाठः.

॥ इयं हि सर्पतो राज्ञी ॥

सर्पतो गच्छतो राज्ञी स्वामिनी पृथिवी खलु ।
भूम्या यत्ताः सर्वभोगाः सर्वेषां सर्वदैव हि ।

अत्र कथामाह —

॥ इयं वा अलोमिकेवाग्र आसीत् । सैतं मन्त्रमपश्यदायं गौः पृश्निरक्रमीदिति ॥

अग्रे आदिकाले । मन्त्रं तृचरूपम् । अलोमिकानुत्पन्नौषधिवनस्पतिका । 'ओषधिवनस्पतयो लोमानि भूत्वे'[1]ति ह्यारण्यके* वक्ष्यते ।

॥ तामयं पृश्निर्वर्ण आविशन्नानारूपः ॥

पृश्निर्वर्णो नीलनामा वृक्षसस्यादिवर्णकः ।

॥ यं यं काममकामयत ॥

स स कामः । तामाविशदित्येव । स्पष्टयति —

॥ यदिदं किञ्चौषधयो वनस्पतयः सर्वाणि रूपाणि ॥

तामाविशत् । यदिदमित्यस्य विवरणं सर्वाणीत्यादि । अस्य च ओषधय इत्यादि ।

। पृश्निरेनं वर्ण आविशति नानारूपो यं यं कामं कामयते य एवं वेद[2] ॥

---

[1] 'त्वे आर' घ. पाठः. [2] 'वेद, एनं' ख. पाठः.

* ऐ० आ० २. ४. २.

सः । एनं वेदितारम् । आविशति प्राप्नुयात् ।

अथाह मानसस्तोत्रप्रकारं सम्यगेव ह —

॥ मनसा प्रस्तौति ॥

प्रस्तोता ।

॥ मनसोद्गायति ॥

उद्गाता ।

॥ मनसा प्रतिहरति ॥

प्रतिहर्ता ।

॥ वाचा शंसति ॥

अथोद्गात्रा यदा[1] स्तोत्रं स्तुतं कालेन वै भवेत् ।
इति मत्वा तदाध्वर्यो इत्यध्वर्युं प्रबोध्य च ।
हो होतरिति तेनोक्तो द्विरभ्या[2]समृचं[3] पुनः ।
आयं गौरित्युपांश्वत्र वाचा होताभिशंसति* ॥

तत्र,

॥ वाक् च वै मनश्च देवानां मिथुनं देवानामेव तन्मिथुनेन मिथुनमवरुन्धते देवानां मिथुनेन मिथुनं प्रजायन्ते प्रजात्यै प्रजायते प्रजया पशुभिर्य एवं वेद ॥

---

[1] यथा ख. ग. पाठः. [2] 'ध्या' घ. पाठः. [3] 'चः' ग. पाठः.

* 'यर्हि स्तुतं मन्येताध्वर्यवित्याह्वयीत । हो होतरितीतरः । आयं गौः पृश्निरक्रमीदित्युपांशु तिस्रः पराचीः शस्त्वा व्याख्यास्वरूपेण चतुर्होतॄन् व्याचक्षीत' इत्या० श्रौ० सू० ८. १३. ४, ५, ६.

सः ।

। अथ चतुर्होतॄन् होता व्याचष्टे ॥

मन्त्रश्चतुर्होतृनामा 'तेषां चित्तिः स्रुगा'दिकः ।
व्याख्यानमुच्चैर्वचनं[1] (सीददित्य? आसीद)न्तः पदेषु तु ॥

॥ तदेव तत्स्तुतमनुशंसति ॥

तत् तत्र । तत् तेन । एव पुनः ।
स्तौति —

॥ देवानां वा एतद्याज्ञियं गुह्यं नाम यच्चतुर्होतारः ॥

यज्ञियं यज्ञार्हं[2] रहस्यम् ।

॥ तद्यच्चतुर्होतॄन् होता व्याचष्टे देवानामेव तद्यज्ञियं गुह्यं नाम प्रकाशं गमयति ॥

तत्तत्र[3] ।

॥ तदेनं प्रकाशं गतं प्रकाशं गमयति ॥

तन्नाम कर्तृ[4] ।

॥ गच्छति प्रकाशं य एवं वेद ॥

सः ।

---

[1] 'ना' घ. पाठः. [2] 'यजनार्हं' ग. घ. पाठः. [3] 'त्र । के एवम् । [पुनः स्तौति तदेनं' ख. पाठः. [4] 'तृ नाम' ख. ग. पाठः.

चतुर्होतृज्ञानयुक्तः प्रसिद्धो भुवि वै भवेत् ।
अथ मध्ये प्रसङ्गेन पुरुषार्थं ब्रवीति ह —

॥ यं ब्राह्मणमनूचानं यशो नर्छेदिति ह स्माहारण्यं परेत्य दर्भस्तम्बानुद्ग्रथ्य दक्षिणतो ब्रह्माणमुपवेश्य चतुर्होतॄन् व्याचक्षीत ॥

परापूर्वाद्रिणो ल्यस्तुगरण्यं निर्जनं वनम् ।
साङ्गोपाङ्गवेदपूर्णं यं विप्रं नाप्नुयाद्यशः ॥
स परेत्य वनं शीघ्रं कुशानास्तीर्य भूतले ।
उपवेश्य दाक्षिणतो ब्रह्माणं वेदपारगम् ॥
उच्चैर्वदेत् स्वयं मन्त्रं चतुर्होताख्यमञ्जसा ।
स स्वकीर्त्या पटेनैव[1] छादयेत् सकलां महीम् ॥
*निपातितस्त्वनूचानो लिटः कानजनोर्वचेः ॥

॥ देवानां वा एतद्यज्ञियं गुह्यं नाम यच्चतुर्होतारः । तद्यच्चतुर्होतॄन् व्याचक्षीत देवानामेव तद्यज्ञियं गुह्यं नाम प्रकाशं गमयति तदेनं प्रकाशं गतं प्रकाशं गमयति गच्छति प्रकाशं य एवं वेद ॥

सः । +उक्तार्थम्[2] ।

चतुर्थः खण्डः ।

मानसग्रहभक्षान्ते मनसाप्यायने कृते ।
स्पृशेयुरौदुम्बरीं ते सत्रिणः सदसि स्थिताः ॥
इत्याह —

---

[1] 'पदेनैव' ख. ग. घ. पाठः । [2] 'उक्तार्थानि' ग. घ. पाठः.

* पा० सू० ३. २. १०९. + page 277

॥ अथौदुम्बरीं समन्वारभन्ते । इषमूर्जमन्वारभ इति ॥

स्तौति —

॥ ऊर्ग्वा अन्नाद्यमुदुम्बरः ॥

कथम् ।

॥ यद्वैतद्देवा इषमूर्जं व्यभजन्त तत उदुम्बरः समभवत् ॥

यत् यत्र देशे ततस्तस्माद्देशात् ।

॥ तस्मात् स त्रिः संवत्सरस्य पच्यते ॥

तस्मात् तथाहि । *'कृत्वोर्थप्रयोगे कालेऽधिकरणे' इति सप्तम्यर्थे षष्ठी ।

बहुत्वं त्रिरिति प्रोक्तं पचेरर्थः फलग्रहः ।
फलं गृह्णाति मासेषु द्वादशस्वप्युदुम्बरः ।

शपो यक् ।

॥ तद्यदौदुम्बरीं समन्वारभन्ते इषमेव तदूर्जमन्नाद्यं समन्वारभन्ते ॥

तत् तत्र । तत् ते ।

॥ वाचं यच्छन्ति ॥

वाग्यमं कुर्युः । †सूत्र्यते हि— 'मनसात्मानमाप्याय्यौदुम्बरीं समन्वारभ्य वाचं यच्छन्त्या नक्षत्रदर्शनादि'ति ।

---

* पा० सू० २. ३. ६४. † आ० श्रौ० सू० ८. १३. २३.

स्तौति —

॥ वाग्वै यज्ञः ॥

वाक्साध्यत्वात् ।

॥ यज्ञमेव तद्यच्छन्ति ॥

तत् तेन । यमिः स्थिरीकरणार्थः ।

॥ अहर्न्नियच्छन्ति ॥

उक्थ्येऽमत्यन्तसंयोगेऽहनि वाग्यम इष्यताम् ।

॥ अहर्वै स्वर्गो लोकः ॥

प्रकाशबहुलत्वात् ।

॥ स्वर्गमेव तल्लोकं नियच्छन्ति ॥

तत्तत्र । यमिः परिग्रहार्थः ।

॥ न दिवा वाचं विसृजेरन् ॥

दिवाह्नि । उत्तरार्थोऽनुवादः ।

॥ यद्दिवा वाचं विसृजेरन्नहर्भ्रातृव्याय परिशिंष्युः ॥

यद् यदि । परिशिषिर्दानार्थः । लिङि यासुट् । *‘श्नसोरल्लोपः’ । दद्युः ।

---

* पा० सू० ६. ४. १११.

॥ न नक्तं वाचं विसृजेरन् ॥

विसृजेयुः ।

॥ यन्नक्तं वाचं विसृजेरन् रात्रीं भ्रातृव्याय परिशिंष्युः ॥

यद् यदि । *‘रात्रेश्चाजसावि’ति ङीप् । क्व तर्हि ।

॥ समयाविषितः सूर्यः स्यादथ वाचं विसृजेरन् ॥

समण्डले दिनं सूर्ये नक्तं निर्मण्डले सति ।
समयाविषितः कालस्त्वर्धमण्डलसंयुते ॥

अथ तदा ।

॥ तावन्तमेव तद् द्विषते लोकं परिशिंषन्ति ॥

किञ्चित्प्रकाशं तावन्तं दद्युः कालं तु शत्रवे ।
लोकः स्थानं शिषिर्दाने ¶‘श्नसोरल्लोप’ ‡‘झोऽन्त’ च ॥

॥ अथो खल्वस्तमित एव वाचं विसृजेरन् ॥

अपि वा विसृजेयुस्ते वाचमस्तंगते रवौ ।

॥ तमोभाजमेव तद् द्विषन्तं भ्रातृव्यं कुर्वन्ति ॥

तत्तत्र विभजेद् द्वेष्टा द्वि (ड्) भ्रातृव्यः सपत्नकः ।

किञ्च,

॥ आहवनीयं परेत्य[1] वाचं विसृजेरन् ॥

---

[1] ‘परीत्य’ इति मुद्रितसायणीयपाठः ।

* पा० सू० ४. १. ३१. ¶ पा० सू० ६. ४. १११. ‡ पा० सू० ७. १. ३.

परापूर्वादिणो ल्यप् तु परेऽर्थे परेति च ।

॥ यज्ञो वा आहवनीयः स्वर्गो लोक आहवनीयो यज्ञेनैव तत् स्वर्गेण लोकेन स्वर्गं लोकं यन्ति ॥

एष आहवनीयो हि यज्ञं स्वर्गं च साधयेत् ।
स्वर्गेण स्वर्गसम्प्राप्तिस्तत्त्रैषां भवेदिति ॥

अथ वाग्विसर्गे[1] मन्त्रमाह —

॥ यदिहोनमकर्म यदत्यरीरिचाम प्रजापतिं तत्पितरमप्येत्विति वाचं विसृजन्ते ॥

यद् इह कर्मणि ऊनं विकलम् । अकर्म* अकार्ष्म । $'मन्त्रे घसे'ति च्लिलुक् । यच्चात्यरीरिचाम । णिचो लुङि चङ् । अतिरिक्तं कृतवन्तः स्म । तत् सर्वं प्रजापतिं सर्वस्य पितरं पालकम् अपि साधु एतु गच्छत्वित्यर्थं मत्वा व्याचक्षाणः स्तौति —

॥ प्रजापतिं वै प्रजा अनु प्रजायन्ते । प्रजापतिरूनातिरिक्तयोः प्रतिष्ठा नैनानूनं नातिरिक्तं हिनस्ति ॥

एनाम् सत्रिणः ।

॥ प्रजापतिमेवोनातिरिक्तान्यभ्यत्यर्जन्ति । य एवं विद्वांस एतेन वाचं विसृजन्ते ॥

---

[1] 'र्गे' ख. ङ. पाठः.

---

* 'यदप्यकर्म स्वरूपेणैव तदङ्गं न कृतम्' इति सायणः । $ पा० सू० २. ४. ८०.

ते प्रजापतिमभि(प्रे!प्र)ति । अत्यर्जन्ति* गमयन्ति । निगमयति —

॥ तस्मादेवं विद्वांस एतेनैव वाचं विसृजेरन्$ ॥

अथ पूर्वोक्तचतुर्होतृव्याख्यानं सप्रकारमाह —

॥ अध्वर्यो इत्याह्वयत चतुर्होतृषु वदिष्यमाणः ॥

शसस्सुप्, चतुर्होतॄन्¶ । होता वदिष्यमाणः । वदे(र्लु!लृ)टि †'भासने'ति शानच् कृतः ।

॥ तदाहावस्य रूपम् ॥

अहावस्य शोंसावोमित्यस्य । तदध्वर्यो इति वचनम् । रूपं तुल्यम् ।

॥ ओं होतस्तथा होतरित्यध्वर्युः प्रतिगृणात्यवसितेऽवसिते दशसु पदेषु ॥

पदं वाक्यम् ।

'पदं स्थाने शरे त्राणे पदाङ्के पादचिह्नयोः ।
शब्देऽशुवस्तुवाक्येषु व्यवसायापदेशयोः ।'

इति निघण्टुः‡ ।

तेषामित्यादिदशकेऽध्वर्युः प्रतिगरं वदेत् ।
पञ्चस्वादित ओं होतस्तथा होतश्च पञ्चसु ।

---

[1] 'प्रे' ग. घ. ङ. पाठः.

---

* 'अत्यर्जन्ति अतिशयेन प्राप्नुवन्ति' इति सायणः; 'सृजन्ति' इति गोविन्दस्वामी । $ इह खण्डसमाप्तिः सायणीये दृश्यते । ¶ 'चतुर्होतृषु निमित्तभूतेषु सर्पराज्ञीतृचा-वदिष्यमाणः' इति गोविन्दस्वामी । 'चतुर्होतृनामकेषु मन्त्रेषूच्चैरुच्चारणं कर्तुमुद्युक्तो होता' इति सायणः । † पा० सू० १. ३. ४७. ‡ वैजन्त्यां द्व्यक्षरकाण्डे नपुंसकलिङ्गाध्याये । श्लो १८.

पदेषु वाक्येऽवसिते[१] समाप्तेऽस्त्वेर्लङीट्तिपः[२] ।
अथ प्राह चतुर्होतॄन् पदानि दश वै खलु —

॥ तेषां चित्तिः स्रुगासी३त् । चित्तमाज्यमासी३त् । वाग् वेदिरासी३त् । आधीतं बर्हिरासी३त् । केतो अग्निरासी३त् । विज्ञातमग्नीदासी३त् । प्राणो हविरासी३त् । सामाध्वर्युरासी३त् । वाचस्पतिर्होतासी३त् । मन उपवक्तासी३त् ॥

इत्थं दशपदो मन्त्रश्चतुर्होत्राख्य[३] ईरितः ।
चित्तिर्ज्ञानं मनश्चित्तमाधीतं स्मरणं मतम् ॥
केतो[*] रहस्यं विज्ञातं[§] व्याप्तिर्वाक् च ऋगुच्यते ।
मुखघ्राणगतो वायुः प्राणो गीतिषु सामनो(?)[४] ॥
वाचस्पतिर्देवमन्त्री ह्युद्गातर्युपवक्तृगीः ।
इति यज्ञोपकरणं देवानामिह[५] कीर्त्तितम् ।

ग्रहाख्यमन्त्रमाहाथ पदषट्कसमन्वितम् ।
यस्य प्रतिगरोऽध्वर्योर्नास्ति ब्राह्मणसूत्रयोः ॥

॥ ते वा एतं ग्रहमगृह्णत । वाचस्पते विधे नामन् । विधेम ते नाम । विधेस्त्वमस्माकं [†]नाम्नाद्यां गच्छ । यां देवाः प्रजापतिगृहपतय ऋद्धिमराध्नुवंस्तामृद्धिं रात्स्यामः ॥

---

१. 'पदे वाक्ये त्ववसिते', २. 'पि' ख. पाठः. ३. 'होताख्य' ग. घ. पाठः.
४. 'सामनि' ख. पाठः. ५. 'ति' घ. पाठः.

---

[*] 'चित्तिः सम्यग् ज्ञानं केतुर्ज्ञानमात्रमिति विशेषः' इति सायणः । [§] 'मनसा विज्ञातं विशेषेण निश्चितं यद्वस्तु' इति सायणः । [†] 'नाम्ना द्या'मिति च्छेदः सायणमते ।

इति ग्रहाख्यो मन्त्रः स्यादस्यार्थः कि(ञ्चप?ञ्चिदु)च्यते —

*एतं[1] मानसाख्यं ग्रहम्। हे वाचस्पते[2] नामन्। ङिलुक्, नाम्नि सर्ववाङ्मये। हे विधे निर्वाहक। विधेम परिचरेम। ते तव। नाम रूपम्। विधेः। सम्बुद्ध्यलोपः, हे विधे त्वमस्माकं नाम्ना सुपोऽर्थे टा, नामसु। रूपेषु वपुष्षु। आद्याम् आद्ये[2] त्वलोपः उपभोग्यताम्। गच्छ अन्तर्णीतण्यर्थः गमय। गृहपतिर्येषां ते देवाः समृद्धिं प्रापुः, तां वयं रात्स्यामोऽनुभवेमेति।

इत्यध्वर्युर्ग्रहं श्रुत्वा तस्माद्देशादपव्रजेत्।

सूत्र्यते हि§— 'रात्स्यामः इत्यपव्रजत्यध्वर्युरथ प्रजापतेस्तनूरितर उपांश्वनुद्रवति ब्रह्मोद्यं चे'ति।

॥ अथ प्रजापतेस्तनूरनुद्रवति ॥

होता ब्रूयात् तनूमंत्रमन्नादा चानिमन्त्रितः।
पठिष्यमाणं यत्रोक्तास्तन्वो द्विःषट् प्रजापतेः।

॥ ब्रह्मोद्यं च। अन्नादा चान्नपत्नी च। अन्नादा तदग्निरन्नपत्नी तदादित्यः ॥

---

1. 'वं' ख. पाठः. २. 'ते विधे नामन्' ग. घ. पाठः. ३. 'आदेत् त्वलो' ग. पाठः.

---

* 'ते वा एतामिति मानसग्रहमाह। नामेत्युदकनाम। इह तद्वान् लक्ष्यते। यथा ते त्वा एतं ग्रहमगृह्णत हे बृहस्पते अहमपि तथा विधेयत्वान्नाम्नि सलिले मनोग्रहं गृह्णामीति। यथा च मनोग्रहग्रहणमन्त्रः। अनया त्वपात्रेण समुद्रं रसया प्राजापत्य .... गृह्णामीति। विधेमेत्यात्मनि बहुवचनम्। नामेत्युदकम्। किञ्चास्माकं विधेः क्रियायाः आंथांमृद्धिं हे वाचस्पते गच्छेति। तां विशिनष्टि यां देवा इति। किञ्च वयमपि तामृद्धिं रात्स्यामः' इति गोविन्दस्वामी।

'हे वाचस्पवे बृहस्पते हे विवे जगतो विधातः। हे नामन् सर्वस्य नमयितः सर्ववशी कारयुक्तेत्यर्थः। तादृशस्य ते नाम विधेम। ख्यातिं करवाम। यद्वा नामान्नं हविर्लक्षणं कीर्तिमन्नं च विधेम सम्पादयामः। त्वमप्यस्माकं प्रजापतियुक्तानां देवानां वि(धिः?धेः) कीर्तिमन्नं च सम्पादय। तेनास्मद्दत्तेन नाम्ना हविर्लक्षणेनान्नेन कीर्त्या वा युक्तो द्यां स्वर्गं गच्छ' इति सायणः। § आ० श्रौ० सू० ८.१३.१०, ११.१२.१३.

तत्तत्र । तद् ताम् ।

॥ भद्रा च कल्याणी च भद्रा तत्सोमः कल्याणी तत्पशवः ।
अनिलया चापभया चानिलया तद्वायुः ॥

कुतः ।

॥ न ह्येष कदाच नेलयति ॥

इलेः पचाद्यच्च गुणस्तस्मान्नुडाचि[*] णे ति वः(?) ।

अवतिष्ठते ।

॥ अपभया तन्मृत्युः ॥

कथम् ।

सर्वं ह्येतस्माद् बीभाय ॥

भयं त्वपगतं यस्याः सर्वं मृत्योर्बिभेति हि ।
[¶]'तुजाद्य'भ्यासदीर्घो लिट् ल(णोऽटो) वृद्धि(णलःर्णलि) द्विता ।

॥ अनाप्ता चानाप्या चानाप्ता तत्पृथिव्यानाप्या तद् द्यौः ॥

नववर्षा दुर्गमा भूर्दुष्प्रापः स्वर्ग एव च ।

॥ अनाधृष्या चाप्रतिधृष्या चानाधृष्या तदग्निरप्रतिधृष्या तदादित्यः ॥

अधृष्टिरभिभवः प्रतिधृषिः प्रतीक्षणम् ।

---

[*] पा० सू० ६. ३. ७४. [¶] पा० सू० ६. १. ७.

॥ अपूर्वा चाभ्रातृव्या चापूर्वा तन्मनोऽभ्रातृव्या तत् संवत्सरः ॥

मनसः पूर्वत्र[1] नास्ति न द्वेषो वत्सरस्य च ।
स्वजीवनं प्रार्थयन्ते सर्वे संवत्सरानुगम् ॥

॥ एता वाव द्वादश प्रजापतेस्तन्वः ।

अन्नादा चेत्याद्यभ्रातृव्या चेत्यन्ता ।

॥ एष कृत्स्नः प्रजापतिः ॥

कृत्स्नः सर्वतनूपे(नःत) एष पूज्यः प्रजापतिः ।

॥ तत्कृत्स्नं प्रजापतिमाप्नोति दशममहः ॥

तत् तेन तन्वनुद्रवणेन । इत्यर्थे सुद्वयम् । दशमेऽहनि । प्राप्नोति होता ।

॥ अथ ब्रह्मोद्यं वदन्ति ॥

त्विपो ज्ञि, होता वदेत् । तत् पठति —

॥ अग्निर्गृहपतिरिति हैक आहुः सोऽस्य लोकस्य गृहपतिः । वायुर्गृहपतिरिति हैक आहुः सोऽन्तरिक्षलोकस्यगृहपतिः। असौ वै गृहपतिर्योऽसौ तपत्येष पतिर्ऋतवो गृहाः । येषां वै गृहपतिं देवं विद्वान् गृहपतिर्भवति राध्नोति स गृहपती राध्नुवन्ति ते यजमानाति येषां वा अपहतपाप्मानं देवं विद्वान् गृहपतिर्भवत्यप स गृहपतिः पाप्मानं हतेऽप ते यजमानाः पाप्मानं घ्नते ॥

हते हन्ति घ्नते घ्नन्ति ब्रह्मोद्यमिति वर्णितम् ।

॥ अध्वर्यो अराध्मारात्स्म ॥

---

[1] 'पूर्वमहं नास्ति' ग. घ. पाठः.

अध्वर्युप्रियवाक्यत्वादिदमुच्चैरिहोच्यताम् ।
द्विरुक्तिरध्यायान्तत्वाद् वाक्यं तु सकृदेव हि ।

सूत्र्यते हि[*]– 'अध्वर्यो अराध्स्मेत्युच्चै'रिति ।

होता हृष्टो ब्रवीत्युच्चैरध्वर्यो शृणु सत्रिणः ।
त्वं चाहं चारात्स्म राद्धिं सम्प्राप्ता दाशमीमिति ॥
उक्तादन्यद्दाशमिकं सर्वं सूत्रोक्तमिष्यताम् ॥

द्विरुक्तिरुक्तार्था[§] ॥

पञ्चमः खण्डः ।

इति षड्गुरुशिष्यविरचितायां महिदासैतरेयब्राह्मणवृत्तौ
सुखप्रदायां चतुर्विंशोऽध्यायः ।

* * *

अथ पञ्चविंशोऽध्यायः ।

[‡]वर्णितं दशमं चाहस्तदन्ते वाग्विसर्जनम् ।
यद् 'भूर्भुवःस्व'र्मन्त्रेण सूत्रकारेण सूत्रितम्[¶] ॥
[‖]'नित्यस्त्विह वाग्विसर्ग' इति स्वस्य प्रसङ्गतः ।
व्याहृतित्रयसंयुक्तं मन्त्रवत्त्वग्निहोत्रकम् ।
भूर्भुवःस्वरोमग्निः सूर्यंत्येवं सङ्गतं त्विह ।
अथाग्निहोत्राख्यं कर्म सम्यग्वै विदधाति इ—

---

[*] आ० श्रौ० सू ८. १३. १६. [§] Vol I. page 44. [‡] इतः पूर्वमधोनिर्दिष्टं पद्यमधिकं दृश्यते ग. घ. मातृकयोः.

"विनायकः शूलपाणिर्मुकुन्दः सूर्यो व्यासः शिवयोगीति ये षट् ।
तेभ्यो नमः सप्तविद्यामृतस्य प्रदातृभ्यः स्वाश्रितवत्सलेभ्यः" ॥

[¶] आ० श्रौ० सू० २. ३. १६. [‖] आ० श्रौ० सू० ८. १३. ३०.

॥ उद्धराहवनीयमित्यपराह्ण आह* ॥

अपराह्णे अह्नश्चतुर्थे भागे अन्त्ये[1]। यजमानः कर्तारम् 'ऋत्विजामेक इतरं कालमन्तेवासी वे'त्यादि §शास्त्रेणोक्तं प्रति ब्रूयाद्- आहवनीयार्थमग्निं गार्हपत्यादुत्क्षिप्य हर नयेति। ततः स्तौति-

॥ यदेवाह्ना साधु करोति तदेव तत् प्राङुद्धृत्य तदभये निधत्ते ॥

ङ्यर्थे टा। तत् तत्र। अभये भयरहिते स्थाने अह्नि कृतं साधु कर्म यत् तत् स्थापयन्ति। तथा,

॥ उद्धराहवनीयमिति प्रातराह यदेव रात्र्या साधु करोति तदेव
तत् प्राङुद्धृत्य तदभये निधत्ते ॥

पूर्ववत्। रात्र्या रात्रौ। कथमेतत्।

॥ यज्ञो वा आहवनीयः स्वर्गो लोक आहवनीयः ॥

उक्तार्थम्¶।

॥ यज्ञ एव तत् स्वर्गे लोके स्वर्गं लोकं निधत्ते ॥

तत्तेन। किञ्च,

---

[1] 'न्त्ये कर्ता' घ. पाठः.

---

* तथाचाप० श्रौ० सू०- 'उद्धरेत्येव सायमाह यजमान उद्धरेति प्रातः' इति (६. १. ४.) आश्वलायनश्च - 'उत्सर्गेऽपराह्णे गार्हपत्यं प्रज्वाल्य दक्षिणाग्निमानीय विट्कुलाद् वित्तवतो वैकयोत्वय इत्येके। ध्रियमाणां वा प्रज्वाल्याहवनीयं ज्वलन्तमुद्धरेत्' इति (२. २. १.) § आ० श्रौ० सू० २. ४. २, ३. ¶ page 282

॥ य एवं वेद ॥

सः ।

॥ यो वा अग्निहोत्रं वैश्वदेवं षोळशकलं पशुषु प्रतिष्ठितं वेद वैश्वदेवेनाग्निहोत्रेण षोळशकलेन पशुषु प्रतिष्ठितेन राध्नोति ॥

सः । विश्वे सर्वे देवा यस्य तत् । कला अवस्थाः षट् च दश यस्य तत् । 'ष (ष उ)त्वं दतृदशे'ति ष्टुत्वं मार्गेपादिकश्च ळः । अग्निहोत्रार्थं द्रव्यं पयोऽग्निहोत्रम् । कथम् ।

॥ रौद्रं गवि सत् ॥

अशितपीतादिपरिणामतो गवि धेन्वां सद् विद्यमानं रौद्रं रुद्रदेवत्यम् ।

॥ वायव्यमुपावसृष्टम् ॥

संसृष्टवत्सकं प्रस्नुतस्तनकम् ।

॥ आश्विनं दुह्यमानम् ॥

स्तनतः क्षार्यमाणक्षीरकम् ।

॥ सौम्यं दुग्धम् ॥

स्थालीगतम् ।

॥ वारुणमधिश्रितम् ॥

अग्नावारोपितम् ।

॥ पौष्णं समुद्यन्तम् ॥

पुंस्त्वं छान्दसम् । समुद्गच्छत् ।

॥ मारुतं विष्यन्दमानम् ॥

जलक्षीराग्निसंसर्गे क्वथनं द्विविधं भवेत् ।
ऊर्ध्वभिन्नजलं दुष्टं प्रायश्चित्तं भवेदिह ॥
ऊर्ध्वभिन्नक्षीरकं तु मङ्गलं मारुतं हितम्[१] ।

॥ वैश्वदेवं बिन्दुमत् ॥

विश्वदेवगणप्रीत्यै भवेदुद्भूतबुद्बुदम् ।

॥ मैत्रं शरोगृहीतम् ॥

शरसा करेण पाण्या वा गृहीतं मित्रदैवतम् ।

॥ द्यावापृथिवीयमुद्वासितम् ॥

उद्वासोऽवरोधः ।

॥ सावित्रं प्रक्रान्तम् ॥

उन्नीतम् ।

॥ वैष्णवं ह्रियमाणम् ॥

प्राङ्नीयमानम् ।

---

[१] 'हि यत्' घ, 'हि तत्' ग. ङ. पाठः ।

॥ बार्हस्पत्यमुपसन्नम् ॥

आहवनीयस्थकुशेषु सादितम् ।

॥ अग्नेः पूर्वाहुतिः ॥

सायंप्रातरग्निसूर्यदेवत्याग्नेः प्रियाहुतिः ।

॥ प्रजापतेरुत्तरा ॥

आहुतिरित्येव ।

प्राजापत्योभयत्रेयं प्रीणयित्री प्रजापतेः ।

॥ ऐन्द्रं हुतम् ॥

क्षिप्तमाहवनीये तु पय इन्द्रप्रियङ्करम् ।

निगमयति —

॥ एतद्वा अग्निहोत्रं वैश्वदेवं षोळशकलं पशुषु प्रतिष्ठितम् ॥

*व्याख्यातम् ।

॥ वैश्वदेवेनाग्निहोत्रेण षोळशकलेन पशुषु प्रतिष्ठितेन राध्नोति य एवं वेद ॥

सः ।

प्रथमः खण्डः ।

---

* page. 290.

पयःप्रसङ्गात्तद्दायिधेनुकर्मसु केषुचित् ।
चोद्योत्तरमुखेनेह प्रायश्चित्तं ब्रवीति ह —

॥ यस्याग्निहोत्र्युपावसृष्टा दुह्यमानोपविशेत् का तत्र प्रायश्चित्तिरिति ॥

उपावसृजिर्वत्ससंसर्गार्थः । उपविशेत् निषीदेत् ।

अग्निहोत्रीत्यग्निहोत्रहोमक्षीरप्रदा तु गौः ।
यजमानस्य यस्यैवं स्यात् प्रायश्चित्तिरस्य का ।

प्रायो नाशस्तस्य चित्तिः समाधानं तु कथ्यते ।
*'प्रायस्य चित्तिचित्तयो'रिति सुट् गणसूत्रतः ।

इतिचोद्यसमाप्त्यर्थः परिहारं ब्रवीत्यथ —

॥ तामभिमन्त्रयेत ॥

मन्त्रमुच्चारयन्नेव मन्त्रार्थत्वेन संस्मरन् ।
ईक्षणं तन्मनाः पश्येत् स्यादेतदभिमन्त्रणम् ।

केन,

॥ §यस्माद् भीषा निषीदसि ततो नो अभयं कृधि । पशून् नः सर्वान् गोपाय नमो रुद्राय मीह्ळुष इति ॥

उपांशु ।

॥ तामुत्थापयेत् ॥

तां निषण्णाम् । केन,

---

* पा० सू० ग० ६. १. १५७. § आ० श्रौ० सू० ३. ११. ३.

॥ *उदस्थाद्देव्यदितिरायुर्यज्ञपतावधात् । इन्द्राय कृण्वती भागं मित्राय वरुणाय चेति ॥

॥ अथास्या उदपात्रमूधसि च मुखे चोपगृह्णीयात् ॥

ऊधसि स्तनप्रदेशे । $'एकहलादा'वित्युदकस्योदभावः । समीपे निधानमुपग्रहः । किञ्च,

॥ अथैनां ब्राह्मणाय दद्यात् ॥

अत्रोक्तस्य दानस्य ¶सूत्रोक्तेन 'ब्राह्मणं पाययेद्यस्या भोक्ष्यन् स्याद्यावज्जीवं संवत्सरं वे'ति विप्रपाने(न) विकल्पः‡ ।

॥ सा तत्र प्रायश्चित्तिः ॥

॥ यस्याग्निहोत्र्युपावसृष्टा दुह्यमाना वाश्येत का तत्र प्रायश्चित्तिरिति ॥

वाशृशब्देऽनुदात्तेच्छ्यन् लिङ् त शब्दश्च दुर्ध्वनिः । परिहरति —

॥ अशनायां ह वा एषा यजमानस्य प्रतिख्याय वाश्यते तामन्नमप्यादयेच्छान्त्यै ॥

अशनायां क्षुधं प्रतिख्याय सूचयित्वा । तां कृतवाशनामन्नं यवसम् । सूत्र्यते हि§— 'वाश्यमानायै यवसं प्रयच्छेदि'ति । सूचितक्षुन्नाशः शान्तिः ।

॥ शान्तिर्वा अन्नम् ॥

---

*आ० श्रौ० सू० ३. ११. २. $पा० सू० ६. ३. ५९. ¶आ० श्रौ० सू० ३. ११. ३. ‡'अथैनां तां ब्राह्मणाय दद्यात्' इत्येव गोविन्दस्वामी । §आ० श्रौ० सू० ३. ११. ४.

क्रोधान्धकारितमुखोऽप्यन्नं दृष्ट्वा प्रसीदति ।
पापशान्तिश्चान्नदस्य सर्वे चास्य सुहृत्तमाः ॥

केन,

॥ *सूयवसाद् भगवती हि भूया इति ॥

ऋचा ।

॥ सा तत्र प्रायश्चित्तिः ॥

॥ यस्याग्निहोत्र्युपावसृष्टा दुह्यमाना स्पन्देत का तत्र प्रायश्चित्तिरिति ॥

स्पन्दनं पादविक्षेपः ।
परिहरति —

॥ सा यत्तत्र स्कन्दयेत् तदभिमृश्य जपेत् ॥

स्कन्दनं भूम्यां सेकः । जप्यमाह —

॥ †यदद्य दुग्धं पृथिवीमसृप्त यदोषधीरत्यसृपद्यदापः । पयो गृहेषु पयो अघ्न्यायां पयो वत्सेषु पयो अस्तु तन्मयीति ॥

जपित्वा च,

॥ तत्र यत्परिशिष्टं स्यात्तेन जुहुयाद्यद्यलं होमाय स्यात् ॥

स्कन्नशिष्टं तु होमार्हं यदि स्याज्जुहुयात्ततः ।

॥ यद्यु वै सर्वं सिक्तं स्यादथान्यामाहूय तां दुग्ध्वा तेन जुहुयात् ॥

यद्युवै यदि हि । अन्यां गाम् ।

---

* ऋक्सं० २. ३. २१. ५. † आ० श्रौ० सू० ३. ११. ७.

अन्यस्या अप्यभावे गोः किं कार्यमत आह ह —

॥ आ त्वेव श्रद्धायै होतव्यम् ॥

टार्थे ङे[*]। अन्यगोक्षीराभावे,

पयो दधि यवागूश्च सर्पिरोदनतण्डुलाः ।
सोमो मांसं तथा तैलमापस्तावद्[१] दशैव तु ॥

इति शास्त्रान्तरोक्तैर्द्रव्यैर्जुहुयात्[ℒ]। एषामभावे समिद्भिः। समिधामप्यभावे श्रद्धया मनसा होमः।

श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः।

इति हि गीतोपनिषच्छ्रुतिः[†]।

॥ सा तत्र प्रायश्चित्तिः ॥

श्रद्धायज्ञमथ स्तौति सुशुक्लमनसो मुनेः —

॥ सर्वं वा अस्य बर्हिष्यं सर्वं परिगृहीतं य एवं विद्वानग्निहोत्रं जुहोति ॥

बर्हिष्यं बर्हिषि दत्तं यागयोग्यम्। अस्यानेन[§] विदुषा परिगृहीतम्। [¶]'आशंसायां भूतवच्च'। परिगृहीतं स्यात् ॥

द्वितीयः खण्डः।

---

[१] 'क्षानि' ख पाठः.

[*] 'आङोऽत्राभिविधिरर्थः'। आ श्रद्धायाः इति सायणः। षष्ठ्यर्थे चतुर्थी इति गोविन्दस्वामी। [ℒ] तथाचाप० श्रौ० सू०— 'पयसा पशुकामस्य जुहुयाद् दध्नेन्द्रियकामस्य यवाग्वा ग्रामकामस्यौदनेनान्नाद्यकामस्य तण्डुलैरोजस्कामस्य बलकामस्येत्येके मांसेन यशस्कामस्य सोमेन ब्रह्मवर्चसकामस्याज्येन तेजस्कामस्य इति ६. १५. १. [†] भगवद्गीता १७. ३. [§] 'अस्य पुरुषस्य' इति सायणः। 'अस्यैव श्रद्धधानस्य इति गोविन्दस्वामी। [¶] पा० सू० ३. ३. १३२.

श्रद्धायज्ञं[1] पुनः स्तौति साधनानि प्रदर्शयन्* —

॥ असौ वा अस्यादित्यो यूपः पृथिवी वेदिरोषधयो बर्हिर्वनस्पतय इध्मा आपः प्रोक्षण्यो दिशः परिधयो यद्ध वा अस्य किञ्च नश्यति यन्म्रियते यदपाजन्ति सर्वं हैवैनं तदमुष्मिन् लोके यथा बर्हिषि दत्तमागच्छेदेवमागच्छति य एवं विद्वानग्निहोत्रं जुहोति ॥

अस्य श्रद्धायज्ञस्य । एनं श्रद्धयाग्निं जुह्वतम् । बर्हिषि स्तीर्णे, नश्यति वृक्षादि, अपाजन्ति[2] गवादयो गच्छन्ति, म्रियते कीटादि । किञ्च किञ्चित् अमुष्मिन् परत्र ।

अग्निहोत्रं पशून् सोमान् श्रद्धया कुरुते हि यः ।
तस्य सम्पद्यते सर्वं मनसैव महात्मनः ॥
अतः[3] श्रद्धामयो होमः सर्वत्र सुखदस्त्विति ।
अथाग्निहोत्रयज्ञस्य दक्षिणां प्रब्रवीति ह —

॥ उभयान् वा एष देवमनुष्यान् विपर्यासं दक्षिणा नयति
सर्वं चेदं यादिदं किञ्च ॥

सर्वं चेदमिति व्याख्याद्यदिदंकिञ्चवाक्यतः[4] ।
नरान् ददाति देवेभ्यो मनुष्येभ्यस्तथा सुरान् ॥
दीयन्ते यत्र सुरनरा जगद्दानसमं हि तत्[5] ।

विपर्यासं विपरिपूर्वादस्यतेः क्त्वार्थे णमुल् । विपर्यस्य । कथम्,

---

[1] 'श्रद्धाहोमं', [2] 'अजन्ति' ग. घ. पाठः. [3] 'अत्र' ख. ङ. पाठः. [4] 'वाग्यतः'. [5] 'यत्' घ. पाठः.

---

* 'यथा श्रद्धाहोमः पूर्वमुक्तस्तथा भावनारूपो होमोऽग्निहोत्रप्रशंसार्थमेव प्रदर्श्यते' इति सायणः.

॥ मनुष्यान् वा एष सायमाहुत्या देवेभ्यो दक्षिणा नयति सर्वं चेदं यदिदं किञ्च ॥

कथमेतज्ज्ञायत इत्याह —

॥ एते प्रलीना न्योकस इव शेरे मनुष्या देवेभ्यो दक्षिणा नीताः ॥

[*]नियता ओकसि स्थान इति न्योकस ईरिताः ।
(लि:ली)ङ् श्लेष(सो:णे) कर्तरि क्तो नत्वं स्यादत्र ओदितः[†] ॥
शीङो रुट् शेरते झस्या'ल्लोपस्तः'[‡] शेर ए टितः ।
दीयन्ते यन्नराः सर्वं जगद्दानसमं हि तत् ॥

तथा,

॥ देवान् वा एष प्रातराहुत्या मनुष्येभ्यो दक्षिणा नयति ॥

॥ सर्वं चेदं यदिदं किञ्च ॥

कथमेतत् ।

॥ त एते विविदाना इवोत्पतन्त्यदोऽहं करिष्येऽदोऽहं गमिष्यामीति वदन्तः ॥

विदो लटो 'लिटः कानच्[§]' (छा:जा)नन्तः शयनादितः ।
वदन्तोऽदः करिष्यामो गमिष्यामोऽद इत्यपि ॥

---

[*] 'निवृत्तमोकः स्थानं गृहरूपं येषां ते न्योकसः । मदीयं गृहमित्यभिमानरहिताः' इति सायणः । 'ओकः स्थानं न्योकसः स्थानशून्याः । यद्वा ओक इति निवासनाम । ओचतेर्निवासकर्मणः । न्योकस आश्रितौकसः' इति गोविन्दस्वामी । [†] गं० सू० (पा० ८. १. ४५.) [‡] पा० सू० ७. १. ४१. [§] पा० सू० ३. २. १०६.

उत्पतन्ति ततो ज्ञातं ज्ञानं देवान्वयादिति ।
दीयन्ते यत् सुराः सर्वं जगद्दानसमं हि तत् ॥

ततश्च,

॥ यावन्तं ह वै सर्वमिदं दत्त्वा लोकं जयति तावन्तं ह[1] लोकं जयति य एवं विद्वानग्निहोत्रं जुहोति ॥

हेत्याश्चर्ये । इदं जाग्रत् ।

विद्वान् जुह्वदग्निहोत्रं जगद्दानफलं भजेत् ।

किञ्च,

॥ अग्नये वा एष सायमाहुत्याश्विनमुपाकरोति तद्वाक् प्रतिगृणाति वाग्वागिति ॥

*अग्निर्होता गृहपतिरित्याश्विनस्यादिभूत ऋक् ।
सायमाद्याहुतिश्चाग्नेस्तत्र प्रतिगृणाति वाक् ॥

रात्रौ वाचः पटुत्वं हि वक्तुर्वेहा[2] नहीक्ष्यते ।
वाग् वागिति जनाश्चाहुः श्रुत्वा शब्दं समन्ततः ॥

ततश्च,

॥ अग्निना ह्यस्य रात्र्याश्विनं शस्तं भवति य एवं विद्वानग्निहोत्रं जुहोति ॥

अग्निना सायमाहुतिभाजा । अस्यानेन विदुषा । किञ्च,

---

[1] 'ह वै लोकं' घ. ङ. पाठः.　　[2] 'षा' ख. घ. पाठः.

---

* ऋक्सं० ४. ५. १९. ३.

॥ आदित्याय वा एष प्रातराहुत्या महाव्रतमुपाकरोति तत् प्राणः प्रतिगृणात्यन्नमन्नामिति ॥

तदिदासीयसूक्तं[1] तु[2] निष्केवल्ये महाव्रते ।
आद्यमारण्यके[*] तच्च सूर्यमाहेति वक्ष्यते ।
प्राणः प्रतिगृणात्यत्र त्वन्नमन्नं ह्यशीतयः (?) ।
अन्नात्तु बृंहितः प्राणः प्रोत्साहयति शंसनम् ॥
ततश्च,

॥ आदित्येन हास्याह्ना महाव्रतं शस्तं भवति य एवं विद्वानग्निहोत्रं जुहोति ॥

आदित्येन प्रातः पूर्वाहुतिभाजा ।
अथाब्दिकाग्निहोत्रेऽग्निचित्यालाभं ब्रवीति ह—

॥ तस्य वा एतस्याग्निहोत्रस्य सप्त च शतानि विंशतिश्च संवत्सरे सायमाहुतयः सप्त चो एव शतानि विंशतिश्च संवत्सरे प्रातराहुतयः ॥

च उ पुनः[§] '[¶]ओदिति' प्रगृह्यत्वम् ।
सायं द्वे आहुती नित्यं[3] प्रातर्द्वे आहुतीति च ।
सषष्टित्रिशतस्यात्र चातुर्गुण्यं प्रदर्शितम् ॥
आहुतीनां सहस्रं सचत्वारिंशच्चतुःशतम् ।
ततः किं,

---

[1] 'सूक्ते' ग. घ. पाठः. [2] 'तन्निष्के', [3] 'नित्ये' ख. पाठः.

---

[*] ऐ० आ० १. ३. ४. [§] 'सप्त चो इत्युकारो निपातो वाक्योपन्यासार्थः' इति सायणः । [¶] पा० सू० १. १. १५.

॥ तावत्योऽग्नेर्यजुष्मत्य इष्टकाः ॥

इयत्यश्चेष्टका अग्निचयनस्था यजुर्युताः ।
तेभ्यः स चाग्निर्विज्ञेयो ये यजुर्वेदपारगाः ॥

ततश्च,

॥ संवत्सरेण हास्याग्निना चित्येनेष्टं भवति य एवं विद्वानग्निहोत्रं जुहोति ॥

विदुषा जुह्वतानेन त्वग्निचित्याब्दतः कृता ।
चित्यास्थितेन चित्येन वृद्धिरादावणीह न ॥

तृतीयः खण्डः ।

अथ प्रातरग्निहोत्रमुदिते सूर्यमण्डले ।
कर्तव्यं प्रब्रवीत्येष प्राक् प्रजापतिखण्डतः—

॥ वृषशुष्मो ह वातावत उवाच जातूकर्ण्यो वक्तास्मो वा इदं देवेभ्यो यद्वै तदग्निहोत्रमुभयेद्युरहूयतान्येद्युर्वाव तदेतर्हि हूयत इति ॥

जतूकर्णगोत्रजातो वतावतसुतो मुनिः ।
इहामुत्र च सञ्चारी वृषशुष्मः सुरालयात् ॥
देवेभ्य आगतो दृष्ट्वा फलं तूदितहोमिनाम् ।
उवाचेदमर्थरूपं वक्तास्म ऋषिसंसदि ॥
उभयेद्युः किमन्येद्युरग्निहोत्रमहूयत ।
युष्माभिस्तु मया दृष्टमुदिते जुह्वतां फलम् ॥

महत्ततोऽत्र युष्माभिरुदिते हूयतामिति ।
वृषशुष्मेण चोक्तास्त उदिते होममाचरन् ।
[*]गर्गादियञ् जतूकर्णादपत्येष्वण्[†] वतावतात् ।
हूयते लट् च लोडर्थे हूयतां[¶] तत्तथेति च ॥
[@]वक्तास्मो लुङ् लडर्थे तत्र[$] वै चार्थ एव तु ।

किञ्च,

॥ एतदु हैवोवाच कुमारी गन्धर्वगृहीता वक्तास्मो वा इदं पितृभ्यो यद्धै तदग्निहोत्रमुभयेद्युरहूयतान्येद्युर्वाव तदेतर्हि हूयत इति ॥

कुमारी नाम विदुषी सर्वलोकगातिक्षमा ।
दिवि-दृष्ट्वोदिते सूर्ये जुह्वतां वै महत् फलम् ।
पुनर्भूमिं गन्तुकामा रूपसौन्दर्यमोहितैः ।
गन्धर्वैः पूजिता पृष्टा त्वया कुत्र हि गम्यते ।
साब्रवीन्मम पित्रादेः सकाशमहमेत्य वै ।
वाचं वक्ष्याम्यग्निहोत्रमहूयत कथं हि वः ।
उभयेद्युः किमन्येद्युर्मया दृष्टं महत् फलम् ॥
उदिते जुह्वतां तस्माद्धूयतामुदिते त्विति ।
गन्धर्वमुक्ता सा गत्वा पितॄनुदितहोमिनः ॥
अकारयत्ततो होमः कर्तव्य उदिते त्विति ।
अथोभयेद्युरन्येद्युर्होमरूपं ब्रवीति ह —

॥ एतद्वा अग्निहोत्रमन्येद्युर्हूयते यदस्तमिते सायं जुहोत्यनुदिते प्रातरथैतदग्निहोत्रमुभयेद्युर्हूयते यदस्तमिते सायं जुहोत्युदिते प्रातः तस्मादुदिते होतव्यम् ॥

---

[*] पा० सू० ४. १. १०५. [†] पा० सू० ४. १. ९२. [¶] 'हूयते इत्येव सायणगोविन्दस्वामिनौ'। [@] 'वक्तास्मो वयं वक्ष्यामः' इति सायणः. 'वक्तास्म इत्यात्मनि बहुवचनम् लुडन्तं चैतत्' इति गोविन्दस्वामी। [$] 'यद् वा एतदिति सायणाभिमतः पाठः। तथा च तद्व्याख्या – 'एतद् अग्निहोत्रम्' इति। 'तद् इति वाक्यनिर्देशः' इति गोविन्दस्वामी।

जुहोति यत् ।

अन्येद्युरेककालं स्यादुभयेद्युर्द्विकालकम् ।
वृषशुष्मकुमार्युक्तवाक्यद्वन्द्वात् प्रमाणतः ।

किञ्च,

॥ चतुर्विंशे ह वै संवत्सरेऽनुदितहोमी गायत्रीलोकमाप्नोति द्वादश उदितहोमी । स यदा द्वौ संवत्सरावनुदिते जुहोत्यथ हास्यैको हुतो भवत्यथ य उदिते जुहोति संवत्सरेणैव तत्संवत्सरमाप्नोति य एवं विद्वाननुदिते जुहोति तस्मादनुदिते होतव्यम् ॥

षष्टित्रिशतकालानां चतुर्विंशतिसंख्यया ।
गायत्रीलोक आप्तव्यः स च द्वादशवत्सरे ॥
उदिते जुह्वता प्राप्यस्तद्द्वित्वेऽनुदिते सति ।
चतुर्विंशतिवर्षेणेत्युदिते हूयतां ततः ॥
ननु प्रातर्होमकाले[1]नैवानुदितहोमिनः ।
द्वै[2]गुण्ये सकलं सि(द्ध इ ? द्धमित्यु(क्त ? क्तम्) इतिचेच्छृणु ।
नैव प्रातर्होमषष्टित्रिशतद्वादशान्वयम् ।
ब्रूमः किन्तु सायमेव चतुर्विंशतिवर्षतः ॥
द्वादशाब्द[3]प्राप्यफलमस्य स्यादिति वर्ण्यते ।
सविंशतिसप्तशतकालवाच्यत्र वत्सरः ॥
इति सूक्ष्मेक्षिकादक्षैः प्रोक्तं बह्वृचकुञ्जरैः ।

किञ्च,

॥ एष ह वा अहोरात्रयोस्तेजसि जुहोति योऽस्तमिते सायं जुहोत्युदिते प्रातः ॥

---

[1] 'लो' ख. ग. ङ. पाठः. [2] 'वै' ख. ङ. पाठः. [3] 'ब्दे' घ. पाठः.

कथम् ।

॥ अग्निना वै तेजसा रात्रिस्तेजस्वत्यादित्येन तेजसाहस्तेजस्वत् ॥

रविर्महाप्रकाशोऽह्नि रात्रावग्निः प्रकाशवान् ।

॥ अहोरात्रयोर्हास्य तेजसि हुतं भवति य एवं विद्वानुदिते जुहोति ॥

उदिते जुह्वता तेन[1] हुतं वै तेजसा[2] द्वयोः ।

॥ तस्मादुदिते होतव्यम् ॥

चतुर्थः खण्डः ।

अथोदिते रवौ होमं पुनरेव प्रशंसति —

॥ एते ह वै संवत्सरस्य चक्रे यदहोरात्रे ताभ्यामेव तत् संवत्सरमेति ॥

इति हि युक्तमिति शेषः । तत्त्र । यद् ये ।
संवत्सररथस्यैते चक्रे रात्रिस्तथा दिनम्* ॥
चक्राभ्यामेव स रथो वर्ततामिति युज्यते[3] ।
एवं स्थिते,

---

[1] 'जुह्वतानेन' घ. पाठः. [2] 'तेजसां' ख ङ. पाठः. [3] 'ते । सयो' ख. ङ. पाठः.

* 'एते ह वै संवत्सरस्येति । संवत्सरः प्राप्यः. तं प्राप्तुं यो रथस्तस्य रथ(स्य) चक्रभूते अहोरात्रे । किमर्थमेवं व्यवहितान्वयः षष्ठ्याः कल्प्यते, ताभ्यां संवत्सरमेतीति, श्रवणात् । किञ्च सम्बन्धमात्रे हि षष्ठीं स्मरति पाणिनिः । व्यवहिताव्यवहितत्वं तु पदान्तरवशाद् भवति । तस्माद् व्यवधानमदोषः । संवत्सरशब्देनात्र पुरुषार्थ उपलक्ष्यते तदवाप्त्यु(भ?पा)यभूतावहोरात्राविल्यर्थः' इति गोविन्दस्वामी ।

॥ स योऽनुदिते जुहोति यथैकतश्चक्रेण यायात् तादृक्तत् ॥

एकतो युक्तचक्रेण रथेन तु यथा गतिः ।
स्खलिता स्यादेवमेव जुह्वतोऽनुदिते रवौ ॥

॥ अथ य उदिते जुहोति यथोभयतश्चक्रेण यान् क्षिप्रमध्वानं समश्नुवीत तादृक् तत् ॥

यान् गच्छन् । अश्नुवीत प्राप्नुयात् ।

॥ तदेषाभियज्ञगाथा गीयते ॥

उक्तार्थम्* ।

॥ बृहद्रथन्तराभ्यामिदमेति युक्तं यद् भूतं भविष्यच्चापि सर्वम् । ताभ्यामियादग्नीनाधाय धीरो दिवैवान्यज्जुहुयान्नक्तमन्यदिति ॥

अहर्बृहत् । रात्री रथन्तरम् । ताभ्यामिदं[1] युक्तं सर्वमशेषमेति वर्तते । इदं सर्वमिति व्याचष्टे — यद् भूतं भविष्यच्चापीति । अग्नीनाधाय धीरो-[2]ऽन्यद्दिवा कुर्यात्[3] । नक्तमन्यत् कुर्यात् । स ताभ्यामहोरात्राभ्यां संवत्सर $इव गच्छेदित्यर्थं[4] मत्वा व्याचष्टे —

॥ राथन्तरी वै रात्र्यहर्बार्हतम् । अग्निर्वै रथन्तरमादित्यो बृहत् ॥

ततः किम् ।

॥ एते ह वा एनं देवते ब्रध्नस्य विष्टपं स्वर्गं लोकं गमयतो य एवं विद्वानुदिते जुहोति ॥

---

[1] 'ताभ्यां युक्त', [2] 'धीरो दिवा' ग. घ. पाठः. [3] 'कुर्यात्स' ख. ङ. पाठः. [4] 'र्थमुक्त्वा न्या' घ. पाठः.

---

* Vol. I. Page 605. $ 'इयाद् गच्छेद्' इति स्यात्.

एते अग्निसूर्याख्ये देवते । एनं जुह्वतं ब्रध्नस्यादित्यस्य[1] विष्टपं स्थानम् । गमयतः प्रापयतः ।

॥ तस्मादुदिते होतव्यं तदेषाभियज्ञगाथा गीयते ॥

उक्तार्थम् [*]।

॥ यथा ह वास्थूरिणैकेन यायादकृत्वान्यदुपयोजनाय । एवं यन्ति ते बहवो जनासः पुरोदयाज्जुह्वति येऽग्निहोत्रमिति ॥

ये प्रातरग्निहोत्रं[2] प्रागुदयाज्जुह्वति ते जनासः जनाः बहवः गच्छन्ति यथा रथः अस्थूरिणा ।

रथश्चतुस्तुरङ्गः स्यादग्रे द्वौ द्वौ च पार्श्वतः ।
अश्वाख्यावग्रगौ पार्श्वगौ पृ(ष्टि ? ष्ठ्य)स्थूरिनामकौ ॥

[§]स्थूर्याख्यपार्श्वगहयद्वयरहितेनैकेनाश्वाख्याग्रगहयद्वयेन युक्तः । अन्यत् पार्श्ववाहियुगळम् । उपयोजनाय, उपयोगाय कार्यार्थम् अकृत्वा यायात्[3] स्खलन् गच्छेत् । तथा । किञ्च,

॥ तां वा एतां देवतां प्रयतीं सर्वमिदमनुप्रैति यदिदं किञ्च ॥

एतां सूर्याख्यां देवतां प्रयतीं सम्यग्वर्तमानाम्[£] । इदं सर्वमनुप्रैति

---

[1] 'ब्रध्नस्य विष्टपं' घ. पाठः. [2] 'त्रं पुरोद' घ. ग. पाठः. [3] 'यान्' ख. पाठः.

---

[*] Vol. I. page 605. [§] 'अस्थूरिर्नाम रथस्याश्वः पृष्ठवाही । अन्यदिति लिङ्गमविवक्षितम् । अन्यमस्थूरिमुपयोगायाकृत्वा एकेन अस्थूरिणा युक्तेन रथेन' इति गोविन्दस्वामी । 'अस्थूरिर्नाम अश्वो रथवाजी । यथा लोके कश्चिन्मन्दबुद्धिरुपयोजनाय रथे योजयितुमन्यदकृत्वा अश्वान्तरमसम्पाद्य एकेनैवास्थूरिणाश्वेन रथनियुक्तेन यायात्' इति सायणः । [£] 'प्रयतीं गच्छन्तीम्' इति गोविन्दस्वामिसायणौ ।

अनुगच्छति । मन्त्रश्च भवति 'यस्य प्रयाणमन्वन्य इद्ययु'रिति । स्पष्टयति —

॥ एतस्यै हीदं देवताया अनुचरं सर्वं यदिदं किञ्च ॥

ङसर्थे ङेद्वयम् । अनुचरमनुगन्तृ । इदं भूतजातम् । ततश्च[1] ।

॥ सैषानुचरवती देवता ॥

बहुभिरनुचरैर्युक्ता ।

॥ विन्दते ह वा अनुचरं भवत्यस्यानुचरो य एवं वेद ॥

वेदितानुचरोऽस्य स्यान्महासानुचरस्तथा ।

किञ्च,

॥ स वा एष एकातिथिः ॥

एष सूर्यो जगत्यस्मिन्नेको मुख्योऽतिथिर्महान् ।

॥ स एष जुह्वत्सु वसति ॥

एष सूर्यो हविर्भोक्तुं[2] होमशीलेषु वर्तते ।

॥ तद्यददो गाथा भवति ॥

अदो यदर्थरूपं तत्तत्र गाथा भवत्यपि ।

---

[1] 'ततः सै' ख. पाठः [2] 'क्ता' ख. पाठः

अपदक्रमितगाथा क्वाचित्का लौकिकी मता ।

अनेनसमेनसा सोऽभिशस्तादेनस्वतो वापहरादेनः । एकातिथिमप सायं रुणद्धि बिसानि स्तेनो अप सो जहारेति ॥

अर्थस्तु—

पुरा सप्तर्षयो भूम्यां दुर्भिक्षे द्वादशाब्दिके ।
क्षुत्क्षामदेहाः सरसो बिसान्युद्धृत्य कानिचित् ॥
तेषु नष्टेषु तेऽन्योन्यं शुद्धये शापमब्रुवन्[*] ।

यः बिसानि कमलमूलानि अपजहार अपहृतवान् सः अनेनसमपापम् एनसा पापेनाभिशस्ताद् अभिशंसेत् । नलोपादि छान्दसम् । मिथ्या परिवदेत् । किञ्च एनस्वतो वा पापादपहरात् अपहरेत् । एनः पापम् । गृह्णाति यश्च पापं वाचापि द्रव्योपजीवनात् । यथान्नादेर्भ्रूणहा मार्ष्टीति । किञ्च, स एकातिथिं सायं जुह्वत्सु वसन्तमादित्यमग्निरूपमपरुणद्धि हिंस्यात् ।

निगमयति —

॥ एष ह वै स एकातिथिः स एष जुह्वत्सु वसति ।

एवञ्च,

॥ एतां वाव स देवतामपरुणद्धि योऽलमग्निहोत्राय सन्नाग्निहोत्रं जुहोति ॥

अपरोधोऽभिभवः । तृतीय उपसर्गः ।

होतुं शक्तोऽग्निहोत्रं सन्नजुह्वद् बाधते हि ताम् ।
जुह्वत्स्वथितिरूपेण वर्त्तमानां तु देवताम् ॥

अतश्च,

---

[*] कथा चेयंभारते अनुशासनपर्व्वणि १४२ तमाध्याये दृश्या ।

तमेषा देवतापरुद्धापरुणद्ध्यस्माच्च लोकादमुष्माच्चोभाभ्यां योऽलमग्निहोत्राय सन्नाग्निहोत्रं जुहोति ॥

अपरुद्धाभिभूता सा च्यावयेत् तं द्विलोकतः ।

॥ तस्माद्योऽलमग्निहोत्राय स्याज्जुहुयात् ॥

अलमर्थोऽत्र सामर्थ्यं चतुर्थी चालमन्वयात् ।

॥ तस्मादाहुर्न सायमतिथिरपरुध्य इति ॥

तस्मात् किञ्चातिथेः पूजां सर्वे रात्रौ वदन्ति हि ।
अपरोधः परित्यागो रुधेः क्यप् छान्दसस्त्विह ॥
प्रदर्शनं सायमिति प्रातरप्येवमेव हि ।
प्रासङ्गिकं समापय्य प्रकृतं प्रब्रवीत्यथ —

॥ एतद्ध स्म वै तद्विद्वान् नगरी जानश्रुतेय उदितहोमिनमैकादशाक्षं मानुतन्तव्यमुवाच प्रजायामेनं विज्ञातास्मो यदि विद्वान् वा जुहोत्यविद्वान् वेति ॥

गर्गादेर्मनुतन्तोर्यञ्* ढक् शुभ्रादे¶र्जनश्रुतात् ।
ब्रह्मर्षिर्नगरी नाम§ ह्येतज्जानन्नुवाच ह —
ऐकादशाक्षं राजर्षिं प्रत्यणेकादशाक्षतः ।
संसघैकादशाक्षाख्यमेनं तूदितहोमिनम्[1] ॥
विद्वान् जुहोति किं नेति ज्ञास्यामः खलु सन्ततौ ।
सन्ततिर्यदि वृद्धास्ति जानन्नोचेन्नखल्विति ॥

---

[1] 'नाम्' घ. पाठः.

---

* पा० सू० ४. १. १०५. ¶ पा० सू० ४. १. १२३. § 'जनश्रुताख्यस्य कस्यचिन्महर्षेः पुत्रो जानश्रुतयः । स च राजपुरोहितत्वान्नगरे वसतीति नगरी' इति सायः ।

विज्ञातासो लुटि पदं प्रजा तत्राकरोत्तु किम्* ॥

अत आह —

॥ तस्यो हैकादशाक्षे राष्ट्रमिव प्रजा बभूव ॥

एकादशाक्षादिज्ञ् तस्य बह्वचो राष्ट्रोपमाः प्रजाः ।
आसन् समृद्धिं तां दृष्ट्वा तं विद्वांसं जना विदुः ॥

॥ राष्ट्रमिव ह वा अस्य प्रजा भवति य एवं विद्वानुदिते जुहोति। तस्मादुदिते होतव्यम् ॥

विद्वानुदितहोमी हि प्रजां राष्ट्रोपमां भजेत् ।

पञ्चमः खण्डः ।

* * *

पुनरेवोदिते होमं सप्रकारं प्रशंसति —

॥ उद्यन्नु खलु वा आदित्य आहवनीयेन रश्मीन् संदधाति ॥

उ पुनः ।

दत्तस्य हविषः स्वस्मिन् पाणौ स्थापनसिद्धये ।

तत्र,

॥ स योऽनुदिते जुहोति यथा कुमाराय वा वत्साय वाजाताय स्तनं प्रतिदध्यात तादृक्तत् ॥

---

* इत उत्तरं पत्रमेकं घ मातृकायां लुप्तम् ।

अजाताय उदरादनिर्गताय । प्रतिधानं दानम् ।

॥ अथ य उदिते जुहोति यथा कुमाराय वा वत्साय वा जाताय स्तनं प्रतिदध्यात् तादृक्तत् ॥

जाताय ।

॥ तमस्मै प्रतिधीयमानमुभयोर्लोकयोरन्नाद्यमनु प्रतिधीयतेऽस्माच्च लोकादमुष्माच्चोभाभ्याम् ॥

ङयर्थे ङसिद्वयम् । भ्यां चोसर्थे । अस्मा आदित्याय प्रतिधीयमानं संदीयमानम् । तं यागमनु अस्मिन्नमुष्मिंश्चान्नाद्यं स्थाप्यते । किञ्च,

॥ स योऽनुदिते जुहोति यथा पुरुषाय वा हस्तिने वाप्रयते हस्त आदध्यात्तादृक्तत् ॥

इणः शतुर्ङे । अप्रयते अनागच्छते ।

॥ अथ य उदिते जुहोति यथा पुरुषाय वा हस्तिने वा प्रयते हस्त आदध्यात्तादृक्तत् ॥

प्रयते[1] ।

॥ तमेष एतेनैव हस्तेनोर्ध्वं हृत्वा स्वर्गं लोक आदधाति य एवं विद्वाननुदिते जुहोति ॥

एष सूर्यः एतेन परिचितेन हविर्ग्राहिणा स्वहस्तेन । तं वेदितारं जुह्वतम् ।

---

[1] 'ते गच्छते । त' ङ. पाठः.

॥ तस्मादुदिते होतव्यम् ॥

किञ्च,

॥ उद्यन्नु खलु वा आदित्यः सर्वाणि भूतानि प्रणयति ॥

प्रणीतिः प्रवर्तनम् ।

॥ तस्मादेनं प्राण इत्याचक्षते ।

तस्मात् तथाहि ।

वक्ष्यते ह्यारण्यके[*] – 'प्राणो ह्येष य एष तपति' । [‡]प्राङ्पूर्वाण्णाञो ड इति सूर्यं ब्रह्मवादिनः प्राण इत्याहुरित्यर्थः ।

॥ प्राणे ह्यस्य सम्प्रति हुतं भवति य एवं विद्वानुदिते जुहोति ॥

प्राणे सूर्ये । अस्यानेनोदितहोमिना विदुषा । [£]सम्प्रति सुयुक्तम् ।

॥ तस्मादुदिते होतव्यम् ॥

किञ्च,

॥ एष ह वै सत्यं वदन् सत्ये जुहोति योऽस्तमिते सायं जुहोत्युदिते प्रातः ॥

सत्ये ब्रह्मणि । 'तत् सत्यं सदिति प्राण' इति ह्यारण्यके [§]वक्ष्यते । कथम् ।

---

[*] ऐ० आ० २. २. १. [‡] 'नयत्यमित्योर्धात्वोरन्यत्वेऽप्यक्षरवर्णसामान्यात् प्राण इत्याचक्षते आदित्यम्' इति गोविन्दस्वामी । [£] 'सम्प्रति अञ्जसा तस्मिन् वा काले' इति गोविन्दस्वामी । 'सम्यक्' इति सायणः । [§] ऐ. आ० २. १. ५.

॥ भूर्भुवः स्वरोमग्निर्ज्योतिर्ज्योतिरग्निरिति सायं जुहोति । भूर्भुवः स्वरों सूर्यो ज्योतिर्ज्योतिः सूर्य इति प्रातः सत्यं हास्य वदतः सत्ये हुतं भवति य एवं विद्वानुदिते जुहोति ॥

अस्यानेन ।

॥ तस्मादुदिते होतव्यम् । तदेषाभि यज्ञगाथा गीयते ॥

उक्तार्थम्* ।

॥ प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रम् । दिवाकीर्त्यमदिवा कीर्तयन्तः सूर्यो ज्योतिर्न तदा ज्योतिरेषामिति ॥

उदयात् पुरा प्राग् येऽग्निहोत्रं जुह्वति । †'हुश्नुवो-'रिति यण् । ते प्रत्यहं प्रातरसत्यं[1] वदन्तीति । कीदृशाः दिवा वक्तव्यं सूर्यशब्दमदिवा रात्रौ वदन्तः । कथम् । सूर्यो ज्योतिरिति मन्त्रेण प्रातर्होमः । तदानुदिते काले एषामनुदितहोमिनां सूर्यो ज्योतिर्नास्तीत्यर्थः ॥

इत्यग्निहोत्रमाख्यातमुदिते प्रातरित्यपि ।

षष्ठः खण्डः ।

अथाग्निहोत्रप्रसङ्गाद् व्याहृतित्रितयस्य वै ।
सर्वप्रायश्चित्ततायै सृष्टिक्लृप्तिं[2] ब्रवीति ह —

---

१. 'प्रातरनृतं' ङ. पाठः. २. 'तत्सृष्टिक्लृप्तिं' ग. ङ. पाठः.

---

* Vol. I. Page 605. † पा० सू० ६. ४. ८७.

॥ प्रजापतिरकामयत प्रजायेय भूयान् स्यामिति ॥

उक्तार्थम् ।

॥ स तपोऽतप्यत ॥

तपश्चरत्यर्थः ।

॥ स तपस्तप्त्वेमान् लोकानसृजत पृथिवीमन्तरिक्षं दिवम् ॥

भूर्भुवःस्वराख्यांस्त्रीन् लोकानसृजत् तपसा प्रभुः ।
पुनः स एव तत्रत्यं जिघृक्षुः सारमञ्जसा ॥

॥ तान् लोकानभ्यतपत् ॥

तपसायोजयल्लोकांस्तत्स्थसारोद्गमाय वै ।
स्वर्णकारो यथा सारं जिघृक्षुर्धावयेद्धि तम् ॥

ततः,

॥ तेभ्योऽभितप्तेभ्यस्त्रीणि ज्योतींष्यजायन्त ॥

कुतः किमित्याह —

॥ अग्निरेव पृथिव्या अजायत ॥

अग्निः सारतया जातोऽभितप्ताया भुवस्तदा ।

॥ वायुरन्तरिक्षात् ॥

अजायतेत्येव ।

॥ आदित्यो दिवः ॥

अजायत ।

पुनः स एव तत्रत्यं जिघृक्षुः सारवस्तु वै ।

॥ तानि ज्योतींष्यभ्यतपत् । तेभ्योऽभितप्तेभ्यस्त्रयो वेदा अजायन्त ॥

विविच्याह —

॥ ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः[1] सामवेद आदित्यात् ॥

अजायत ।

वेदोऽत्र विनियोक्तव्यो मन्त्रः कर्मणि घञ् विदेः ।
ऋग्यजुःसामरूपो हि त्रिविधो मन्त्र उच्यते ॥
ऋक् पादबद्धा गीतिस्तु साम गद्यं यजुर्मतम् ।
चतुर्ष्वपि हि वेदेषु मन्त्रोऽयं वर्तते त्रिधा ॥
ऋचां बहुत्वादृग्वेद इत्याद्याख्योक्तिरिष्यताम् ।
पुनः स एव तत्रत्यं जिघृक्षुः सारवस्तु वै ।

॥ तान् वेदानभ्यतपत् । तेभ्योऽभितप्तेभ्यस्त्रीणि शुक्राण्यजायन्त ॥

केषां[2] शुक्रेति नामाभूत्[3] किं कुतश्चात आह ह —

॥ भूरित्येव ऋग्वेदादजायत ॥

---

[1] 'योः । अजायत । साम', [2] 'तेषां', [3] 'भूत् कुत' इ. पाठः.

'ऋत्यकः'[*] ।

॥ भुव इति यजुर्वेदात् ॥

अजायत ।

॥ स्वरिति सामवेदात् ॥

अजायत ।

दीप्तिः शुक्रश्च मत्वर्थे ब्रह्म शुक्रं तु दीप्तिमत् ।
[¶]'स शुक्रस्य तन्वो वेद तिस्र' इत्यध्यगीष्महि ॥
भूर्भुवस्स्वस्त्रिकं शुक्रशब्दवाच्यमितीष्यताम् ।
पुनः स एव शुक्रस्थं जिघृक्षुः सारवस्तु वै ॥

॥ तानि शुक्राण्यभ्यतपत् । तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्त । अकार उकारो मकार इति ॥

अकारोऽभूत्तु भूशुक्राद् भुवःशुक्रादुकारकः ।
स्वःशुक्रात्तु मकारोऽभूदिति वर्णत्रयोद्भवः[§] ॥
कृञः कर्मणि घञ् कार उच्चार्यः शब्द उच्यते ।
[‡]'वर्णात् कारो'ऽथवा मस्त्वञ्ञमङेति निपातितः (?)।

॥ तानेकधा समभरत् ॥

अकारादेस्तु संभार उक्तिसंहितया भवेत् ।

॥ तदेतदोमिति ॥

---

[*] पा० सू० ६. १. १२८. [¶] ऋक्सं० ८. ६. ४. १.. [§] तथाच मनुरप्याह — 'अकारं चाप्युकारं च मकारं च प्रजापतिः । वेदत्रयान्निरवृहद् भूर्भुवः स्वरितीति च' इति (२. ७६.) [‡] पा० सू० वा० ३. ३. १०८,

यत् प्रजापतिना लोकज्योतिर्मन्त्रविशुक्रतः ।
निष्कृष्टं साररूपं तदाद्(गु)णेनोमभूदिति ॥
वाच्यमस्य परं ब्रह्म शब्दब्रह्मोत्तमं त्विदम् ।
*'तस्य वाचकः प्रणव' इति योगानुशासनम् ॥

स्तौति —

॥ तस्मादोमिति प्रणौति ॥

‡'उतो वृद्धिर्लुकि हलि' सामिधेन्यादिषु होत्रादि ।
ओंशब्दस्य प्रसङ्गेन प्रणवाख्यात्र दर्शिता ।

किञ्च,

॥ ओमिति वै स्वर्गो लोकः ॥

§'ओंकारः स्वर्गद्वार'मित्यापस्तम्बो ह्यसूत्रयत् ।

॥ ओमित्यसौ योऽसौ तपति ॥

असौ तपति यः सूर्यः स ओमित्यवधार्यताम् ।

॥ स प्रजापतिर्यज्ञमतनुत ॥

तन्निर्दर्शनार्थः । दृष्टवान्¶ ।

॥ तमाहरत् ॥

संहृतवान् ।

॥ तेनायजत ॥

---

* योः सू० १. २७. ‡ पा० सू० ७. ३. ८९. § आप० ध० १. १३. ६.

¶ 'विस्तारितवान्' इति सायणः ।

यज्ञेनेष्टवान् ।

॥ स ऋचैव हौत्रमकरोत् ॥

हौत्रं होतृवर्गकृत्यम् । उद्गात्राद्यन् ।

॥ यजुषाध्वर्यवम्[1] ॥

अकरोदित्येव । अध्वर्युवर्गकृत्यम् ।

॥ ‡साम्नोद्गीथम् ॥

उद्गातृवर्गकृत्यम् ।

॥ यदेतत् त्रय्यै विद्यायै शुक्रं तेन ब्रह्मत्वमकरोत् ॥

---

[1] 'म् । अध्वर्यु' ङ. पाठः.

---

‡ अत्र गोविन्दस्वामी —

अत्र ऋगादयः शब्दा वेदोपलक्षणार्थाः । वाक्योपक्रमणे वेदशब्दश्रवणात् त्रयो वेदा अजायन्त इति । अनुपजातविरोधित्वात् तदनुवशेनोपसंहारो वर्णनीयः । होत्रादयश्चत्वारो महर्त्विजः । तदीया अर्धिनो मैत्रावरुणादयः । तृतीयिनश्चाच्छावाकादयः । पादिनश्च ग्रावस्तोत्रादयः । आह च — तस्यर्त्विजश्चत्वारस्त्रिपुरुषा इति । हौत्रमिति होत्रादीनां चतुर्णां पदार्थजातं लक्षितम् । तदृग्वेदेनाकरोत् । अकरोदित्यत्र णिलोपो द्रष्टव्यः । अकारयदिति यावत् । एवं यजुषाध्वर्यवं साम्नोद्गीथमिति च । यद्यप्युद्गीथशब्दो भक्तिविशेषवचनस्तथापीह सामवेदविहितपदार्थमात्रोपलक्षणार्थः । एवमुत्तरेष्वप्युद्गीथशब्दप्रयोगेषु वेदितव्यम् । त्रयाणां वेदानां समाहारस्त्रयी । षष्ठ्यर्थे चतुर्थी, त्रय्याः शुक्रेण व्याहृतिब्रह्मत्वमकरोत् । ननु अथर्ववेदेन ब्रह्मत्वं कस्मान्न क्रियेत । ऋग्विदं ऋग्वेदपारंगमेव होतारं वृणीष्व । यजुर्विदमध्वर्युम् । सामविदमुद्गातारम् । अथर्वाङ्गिरोविदं ब्रह्माणम् इत्यथर्वश्रुतिरप्यस्ति । उच्यते — सत्यमस्ति यतः श्रुतिः । यदेतत् त्रय्यै विद्यायै इत्यपिच श्रुतिरस्त्येव । किञ्च वेदेषु तत्र तत्र लोकाग्निव्याहृतिसवनसंस्तुतास्त्रय एव वेदाः । आथर्वणे तु आहवनीयादिसम्बद्धयज्ञकर्मव्यापारो नास्ति । तत्रहि शान्तिकपौष्टिकपुण्याहस्वस्त्ययनायुष्यमङ्गलादिषु प्रायशो व्यापारः । तथाहि न्यायविदः — श्रुतिविरुद्धस्मृत्युदाहरणवेलायामग्नीषोमीयसंस्थावधि भोजनप्रतिषेधप्रतिपादकश्रुतिविरोधित्वेनाथर्ववेदपठितक्रीतराजकभोज्यान्नवचनं स्मृतिपदे चोदाहरन्ति । तदुपपादयिषुर्भट्टाचार्य आह — 'क्रीतराजकभोज्यान्नं च यद्यप्यथर्ववेदेऽस्ति तथापि तस्याहवनीयसम्बद्धयज्ञकर्माधिकाराभावाद्' इति । अतस्तद्वेदविहितब्रह्मत्वं तन्त्रे मन्तव्यम् । तस्माद् यज्ञेषु त्रय्या विद्याया ब्रह्मत्वम् इति स्थितम् । वक्ष्यति त्रय्या विद्ययेति ब्रूयादिति' इति ।

ङसर्थे ङेद्वयम्*।

त्रिरूपमन्त्रसारांशव्याहृतिप्रणवात्मकम् ।
यच्छुक्रं तेन कृतवान् ब्रह्मत्वं स प्रजापतिः ॥
ब्रह्मत्वमोंव्याहृतियुक् प्रोक्तं वेदचतुष्टये ।
एवं यज्ञं स्वयं कृत्वा पुनस्तस्य प्रसिद्धये ॥

॥ स प्रजापतिर्यज्ञं देवेभ्यः संप्रायच्छत् ॥

दाञः शपि लङि यच्छादेशः ।

यज्ञं कुरुत वै शीघ्रमिति देवानतत्वरत् ।

॥ ते देवा यज्ञमतन्वत ।

कर्तव्यतया निश्चिक्युः ।

॥ तमाहरन्त तेनायजन्त त ऋचैव हौत्रमकुर्वन् । यजुषाध्वर्यवम्[1] ॥

अकुर्वन्नित्येव ।

॥ साम्नोद्गीथम् ॥

अकुर्वन् ।

॥ यदेवैतत् त्रय्यै विद्यायै शुक्रं तेन ब्रह्मत्वमकुर्वन् ॥

उक्तार्थम्§ । कथम् ।

॥ ते देवा अब्रुवन् प्रजापतिम् ॥

---

१. 'वम् । साम्नोद्गीथम् । अकुर्वन्नित्येव । यदेवैतत्' ङ. पाठः.

---

* 'वेदत्रयरूपायां विद्यायाम्' इति सायणः । § अत्रैव पार्श्वे ।

कथम् ।

॥ यदि नो यज्ञ ऋक्त आर्तिः स्याद्यदि यजुष्टो यदि सामतो यद्यविज्ञाता सर्वव्यापद्वा का प्रायश्चित्तिरिति ॥

नः अस्माकम् । ऋक्तो होत्रादिभ्यः । आर्तिर्भ्रेषः । अविज्ञाता कुत इदमिति विज्ञा(नही)ना । ‘सर्वव्यापत् सर्वतो भ्रेषः ।

स प्रजापतिरब्रवीद्देवान् ॥

कथम्,

॥ यदि वो यज्ञ ऋक्त आर्तिर्भवति भूरिति गार्हपत्ये जुहवाथ ॥

लोटो लेट्[1] । जुहुत ।

॥ यदि यजुष्टो भुव इत्याग्नीध्रीये ॥

जुहवाथेत्येव ।

सोमेष्वार्तिर्यजुष्टश्चेद् भवेज्जुहुत वै भुवः ।
इत्याग्नीध्रीयवह्नौ तु शान्त्यर्थं सूत्र्यते खलु* ।

‘आग्नीध्रीये सोमेष्वि’ति ।

॥ अन्वाहार्यपचने वा हविर्यज्ञेषु ॥

सोमात् प्राक् तु हविर्यज्ञा इष्टयः पशवस्तथा ।

---

[1] ‘लेट् यदि’ ख. ङ. पाठः.

---

* आ० श्रौ० सू० १. १२. ३२.

भुव इति जुहवाथेत्येव । अन्वाहार्यपचनो दक्षिणाग्निः । सूत्रयति ह्यापस्तम्बः* — 'दक्षिणाग्नावन्वाहार्यं महान्तमपरिमितमोदनं पचति । क्षीरे भवतीत्येके' इति । सूत्र्यते च§— 'यजुष्टो भुव इति दक्षिण' इति । वाशब्दस्त्वर्थे ।

॥ यदि सामतः स्वरित्याहवनीये ॥

आर्तिर्भवति जुहवाथेत्येव ।

॥ यद्यविज्ञाता सर्वव्यापद्वा भूर्भुवःस्वरिति सर्वा अनुद्रुत्याहवनीय एव जुहवाथेति ॥

अनुद्रवणमुक्तिः ।

अथ व्याहृतीः स्तौति —

॥ एतानि ह वै वेदानामन्तःश्लेषणानि यदेता व्याहृतयः ॥

यद्वा या अन्तस्थसंश्लेषहेतुभूता इमाः खलु ।

अत्र दृष्टान्तयति —

॥ तद्यथात्मनात्मानं संदध्याद् यथा पर्वणा पर्व श्लेष्मणा चर्मण्यं वान्यद्वा विश्लिष्टं संश्लेषयेदेवमेवैताभिर्यज्ञस्य विलिष्टं[1] संदधाति ॥

---

[1] 'विश्लिष्टं' इति मूलकोशपाठः सायणीयपाठश्च.

---

* आप० श्रौ० सू० ३. ३. १२, १३. § आ० श्रौ० सू० १. १२. ३२. *

§आत्मा देहः । पर्व सन्धिः । श्लेष्माद्रं मांसम् । चर्मण्यं चर्मणि साधुः । अयःशरत्वादिना[1] (?) विलिष्टं विश्लिष्टम् । किञ्च,

॥ सैषा सर्वप्रायश्चित्तिर्यदेता व्याहृतयः ॥

यद् याः ।

॥ तस्मादेषैव यज्ञे प्रायश्चित्तिः कर्तव्या ॥

तस्मात् तथाहि ।

यज्ञेष्वनुक्तमन्त्रा तु प्रायश्चित्तिर्हि या भवेत् ।
सा व्याहृतित्रयेणैव कर्तव्या सर्वदा भवेत् ॥
भरद्वाजो ह्येतमर्थं[2] स्वसूत्रान्ते ह्यसूत्रयत् ।

'सर्वेषामन्ततो व्याहृतिरिति सिद्धं नम आचार्येभ्यो नम आचार्येभ्य इति' ।

सप्तमः खण्डः ।

प्रायश्चित्तिप्रसङ्गेन ब्रह्मत्वं संगतं त्विह ।
श्रूयते हि† 'जुहोति जपतीति प्रायश्चित्ते ब्रह्माणमि'ति ।
अथ तस्या विधानार्थं चोद्यान्यत्र प्रतायते (?) ।

॥ तदाहुर्महावदाः[3] ॥

घञ् कर्मणि वदेर्वृद्धिर्न वदो वेद उच्यते ।
स वेदस्तु महान् येषां ते तथोक्ता महावदाः‡ ॥
ते चोद्यं ब्रह्मविषयमाहुरेतत् कथं शृणु ।

---

[1] 'अयः शक्त्वादिना' ख, 'अयः शरक्तादिना' ग. घ. पाठः. [2] 'प्येतमर्थं' ग. घ. पाठः.

---

§ 'आत्मशब्देन द्रव्यमात्रं लक्ष्यते' इति गोविन्दस्वामी; 'आत्मशब्दः स्वरूपमात्रवाचित्वात् सर्वद्रव्यपरः' इति सायणश्च । † आ० श्रौ० सू० १. १. १६. ‡ 'महच्छब्देन ब्रह्मोच्यते । ब्रह्म च वेदः । तं ये वदीन्त (अभिधीय ?) ते महावदाः' इति गोविन्दस्वामी; 'महान्तं प्रौढं वेदं वदन्तीति महावदाः' इति सायणः ।

॥ यदृचैव हौत्रं क्रियते यजुषाध्वर्यवं साम्नोऽद्गीथं व्यारब्धा त्रयी विद्या भवत्यथ केन ब्रह्मत्वं क्रियत इति ॥

यद्यदि ।

ऋग्यजुःसामरूपा हि विद्या प्रोक्ता त्रयीति ह ।

व्यारब्धा सङ्गृहीता । अथ तदा ।

परिहरति —

॥ त्रय्या विद्ययेति ब्रूयात् ॥

*त्रय्या इति ङसन्तं तद्युक्तया विद्यया पुनः ।
व्याहृत्यौरूपया ब्रह्मा (?) ब्रह्मत्वं क्रियतेऽत्र[1] वै ॥
ऋग्यजुःसामाथर्वाख्ये प्रोक्तं वेदचतुष्टये ।
ब्रह्मत्वं वेदसारेण व्याहृत्यौरूपकेण ह ॥
†अथर्ववेत्त्ववान् ब्रह्मा वेदेष्वन्येषु भागवान् ।
‡'तस्माद् ब्रह्माणं ब्रह्मिष्ठामि'ति ह्यारण्यके श्रुतम् ॥
ब्रह्मा त्रयीसारकारीति ब्रूयाच्चोदकान् प्रति ।

किञ्च,

॥ अयं वै यज्ञो योऽयं पवते ॥

वै इव ।

वायुवत् स्यादयं ब्रह्मा@ यज्ञस्य परिशोधकः ।

---

[1] 'द्य'. ख. पाठः.

---

* 'त्रय्या- वेदत्रयरूपया' इति सायणः । † पद्यमिदं 'सम्प्रदायविद आहुः' इति नामनिर्देशादृते सायणेनोद्धृतम् । page 671. ‡ ऐ॰ आ॰ ३. २. ३. @ 'यज्ञस्वरूपो वायुसदृशो यज्ञः' इति सायणः ।

ङसः सुः। यज्ञस्य। कथम्।

॥ तस्य वाक् च मनश्च वर्तन्यौ ॥

तस्य यज्ञस्य निर्वाहे वर्तन्यौ द्वौ महापथौ।
वाक्चर्त्विजां मनश्चापि ह्युक्तं प्रस्पष्टयत्यथ—

॥ वाचा च हि मनसा च यज्ञो वर्तते ॥

तत्र च,

॥ इयं वै वागदो मनः ॥

वाक् स्पष्टा[1] पृथिवीव स्याद् व्यक्ताव्यक्तं खवन्मनः।

॥ तद्वाचा त्रय्या विद्ययैकं पक्षं संस्कुर्वन्ति ॥

वाचर्ग्यजुस्सामगया पक्षमेकमिहर्त्विजः।
अलंकुर्वन्ति यज्ञस्य तत्र तत् (सु? 'सं)परी'ति* सुट्।

॥ मनसैव ब्रह्मा संस्करोति¶ ॥

एकं पक्षमित्येव। ‡सूत्र्यते हि—'अबहुभाषी यज्ञमना' इति। वक्ष्यते चारण्यके§ 'ब्रह्माणं ब्रह्मिष्ठं कुर्वीत यो यज्ञस्योल्बणं पश्येदि'ति। ब्रह्मणो वाग्यमं कर्तुं कथामाह प्ररोचयन्—

---

[1] 'ष्टं' ङ. पाठः.

---

* पा० सू० ६. १. १३७. ¶ तथाच छन्दोगाः—'एष एव यज्ञस्तस्य मनश्च वाक् च वर्तनी तयोरन्यतरां मनसा संस्करोति ब्रह्मा वाचा होताध्वर्युरुद्गातान्यतराम्' इति। ‡ आ० श्रौ० सू० १. १२. ३०. § ऐ० आ० ३. २. ३.

॥ ते हैके ब्रह्माण उपाकृते प्रातरनुवाके स्तोमभागान् जपित्वा भाषमाणा उपासते ॥

स्तोमभागाभिधाना हि केचिन्मन्त्रास्तु याजुषाः* ।

एके इति केचिदज्ञा इत्यर्थः । ब्रह्माणः ब्रह्मत्वकारिणः भाषमाणाः यथेच्छं वदन्तः । ह पुरा । केषुचिद् यज्ञेषु । उपासते, लङो लट्, अवर्तन्त§ ।

॥ तद्धैतदुवाच ब्राह्मण उपाकृते प्रातरनुवाके ब्रह्माणं भाषमाणं दृष्ट्वार्धमस्य यज्ञस्यान्तरगुरिति ॥

तत्तेषु भाषमाणेषु यज्ञमध्ये निरङ्कुशम् ।
दृष्ट्वा कश्चिद् ब्राह्मणस्तु ह खेदं वाक्यमुक्तवान्[१] ॥

कथम् । अर्धमस्येत्यादि ।

¶'गातिस्थे'ति सिचो लुक् झिस्तिपस्त्वन्तरगादिति ।
‖यज्ञस्यार्धं नश्यतीह ब्रह्मबह्वभिभाषणात् ।

तत्र दृष्टान्तमाह —

॥ तद्यथैकपात् पुरुषो यन्नेकतश्चक्रो वा रथो वर्तमानो भ्रेषं न्येत्येवमेव स यज्ञो भ्रेषं न्येति । यज्ञस्य भ्रेषमनु यजमानो भ्रेषं न्येति ।

यन् गच्छन् । एकपात् एकेन पादेन युक्तः । एकतश्चक्रः एकपार्श्वे

---

[१] 'वान् अर्धं' ङ. ख. पाठः.

---

* ते च 'रश्मिरसि क्षयाय त्वा' इत्यादयः । § 'उपासते समीपे तिष्ठन्ति' इति सायणः; ¶ पा० सू० २. ४. ७७. ‖ 'ऋत्विग्यजमाना एकं यज्ञभागमन्तरितं कृतवन्तः' इति सायणः; 'अगुरिति बहुवचनमेकस्मिन्नर्थे । यद्वा अन्तर्णीतण्यर्थः । ब्रह्माणो यज्ञस्यार्धं विनाशयितवन्त इति' इति गोविन्दस्वामी ।

चक्रवान् । भ्रेषं स्खलनम् । नियमेन एति प्राप्नोति । यज्ञस्य भ्रेषन्ययने यजमानोऽपि भ्रेषं नीयात् । कथं तर्हि कार्यम् ।

॥ तस्माद् ब्रह्मोपाकृते प्रातरनुवाके वाचंयमः स्यादोपांश्वन्तर्यामयोर्होमात् ॥

आङभिविधौ । तथा,

॥ उपाकृतेषु पवमानेष्वोदृचः ॥

ब्रह्मा वाचंयमः स्यादित्येव । आ उदृचः । उदृक् समाप्तिः । बहिष्पवमानमाध्यंदिनार्भवेष्वेव वान्तम् ।

॥ अथ यानि स्तोत्राणि सशस्त्राण्या तेषां वषट्काराद्वाचंयम एव स्यात्[*] ॥

स्तोत्रेष्वारब्धेषु[1] तत्तच्छस्त्रयाज्यानुवषट्कारान्तं ब्रह्मा वाचंयमः स्यात् । एव पुनः । स्तौति—

॥ तद्यथोभयतःपात् पुरुषो यन्नुभयतश्चक्रो वा रथो वर्तमानो न रिष्यत्येवमेव स यज्ञो न रिष्यति । यज्ञस्यारिष्टिमनु यजमानो न रिष्यति ॥

रिषिर्नाशार्थः ॥

---

[1] 'षु तच्छ' ख. पाठः.

---

§ तथाचा० श्रौ० सू० 'प्रातरनुवाकाद्यान्तर्यामहोमात् । स्तोत्रेष्वतिसर्जनाद्या वषट्कारात् । ओदृचः पवमानेषु' इति । १. १२. १९, २१, २२.

वाग्यमो विहितस्त्वेवं यज्ञे ब्रह्मत्वकारिणः ।

अष्टमः खण्डः ।

॥ तदाहुः ॥

चोद्यस्वरूपमाह —

॥ यद् ग्रहान्मेऽग्रहीत्प्राचारीन्म आहुतीर्मेऽहौषीदित्यध्वर्यवे दक्षिणा नीयन्त उदगासीन्म इत्युद्गात्रेऽन्ववोचन्मेऽशंसीन्मेऽयाक्षीन्म इति होत्रे किंस्विदेव चक्रुषे ब्रह्मणे दक्षिणा नीयन्तेऽकृत्वाहोस्विदेव हरता इति ॥

ग्रहा ऐन्द्रवायवाद्याः । प्रचारो गमनम् । नीयन्ते दातुं काल्यन्ते । उद्गानं साम्न उच्चारणम् । चक्रुषे कृतवते । लिटः क्वसुः । आहोस्वित्, अकृत्वा किञ्चिदपि हरतै सम्भावने लिङर्थे लेट् *'एत ऐ' । 'वैतोऽन्यत्र'† ।

परिहरति —

॥ यज्ञस्य हैष भिषग् यद् ब्रह्मा यज्ञायैव तद् भेषजं कृत्वा हरति[1] ॥

कृत्वा प्रायश्चित्तरूपमादत्ते भेषजं स वै ।

---

[1] 'ति. यद् यः । कृ' घ. पाठः.

---

* पा० सू० ३. ४. ९३. † पा० सू० ३. ४. ९६.

॥ अथो यद् भूयिष्ठेनैव ब्रह्मणा छन्दसां रसेनार्त्विज्यं करोति यद् ब्रह्मा ॥

अथो अपिच । यद् यः । करोति यत् तद् भूयिष्ठेन बहुतमेन इष्टन यिट्[1] । छन्दसां रसेन प्रणवव्याहृतिरूपेण ब्रह्मणा वेदेन ।

॥ तस्माद् ब्रह्मा ॥

अयं हीति शेषः ।
तस्माद्ध्ययं ब्रह्मसंज्ञां लभते चेति गृह्यताम् ।
किञ्च,

॥ अर्धभाग्घ वा एष इतरेषामृत्विजामग्र आस यद् ब्रह्मा ॥

यद् यः ।
वाचा कुर्वन्ति यज्ञेऽन्ये मनसैष करोति तु ।
स्पष्टयति —

॥ अर्धमेव ब्रह्मण आस ॥

यज्ञे कृत्यं बभूव ।

॥ अर्धमितरेषामृत्विजाम् ॥

आसंस्त्येव ।

॥ तस्माद्यदि यज्ञ ऋक्त आर्तिः स्याद् यदि यजुष्टो यदि सामतो यद्यविज्ञाता सर्वव्यापद्वा ब्रह्मण एव निवेदयन्ते ॥

---

[1] 'यिट् च' ग. घ. ङ. पाठः.

समाधानं कुरुष्वेति ऋत्विजस्तं वदन्त्यतः ।

॥ तस्माद्यदि यज्ञ ऋक्त आर्तिर्भवति भूरिति ब्रह्मा गार्हपत्ये जुहुयात् । यदि यजुष्टो भुव इत्याग्नीध्रीये ॥

सोमेषु ।

॥ अन्वाहार्यपचने वा हविर्यज्ञेषु । यदि सामतः स्वरित्याहवनीये यद्यविज्ञाता सर्वव्यापद्वा भूर्भुवःस्वरिति सर्वा अनुद्रुत्याहवनीय एव जुहुयात् ॥

उक्तार्थम्* ।

अथ व्याहृतिसम्बन्धं सोमे ब्रह्मत्वमाह ह —

॥ स प्रस्तोतोपाकृते स्तोत्र आह ब्रह्मंस्तोष्यामः प्रशास्तरिति ॥

प्रसिद्धः ।

॥ स भूरिति ब्रह्मा प्रातस्सवने ब्रूयादिन्द्रवन्तः स्तुध्वमिति भुव इति माध्यंदिने सवने ब्रूयादिन्द्रवन्तः स्तुध्वमिति स्वरिति तृतीयसवने ब्रूयादिन्द्रवन्तः स्तुध्वमिति भूर्भुवःस्वरित्युक्थ्ये वातिरात्रे वा ब्रूयादिन्द्रवन्तः स्तुध्वमिति ॥

व्याचष्टे —

स यदाहेन्द्रवन्तः स्तुध्वमित्यैन्द्रो वै यज्ञ इन्द्रो यज्ञस्य देवता सेन्द्रमेव तदुद्गीथं करोति ॥

---

* page. 321

तत्तेन । उद्गीथं सामकृत्स्नम् । सेन्द्रमिन्द्रसहितम् । अयं च यज्ञः ।

॥ इन्द्रान्माऽगात् ॥

अन्यत्र न गच्छेत् ।

॥ इन्द्रवन्तः स्तुध्वमित्येवैनाँस्तदाह तदाह ॥

तत्तदाह । हे उद्गातार इति ब्रह्मा वदेत् ।
द्विरुक्तिरुक्तार्था* ॥

नवमः खण्डः ।

इति[१] षड्गुरुशिष्यविरचितायां महिदासैतरेयब्राह्मणवृत्तौ
सुखप्रदायां पञ्चविंशोऽध्यायः ।

॥ पञ्चमपञ्चिका समाप्ता ॥

द्वितीयः सम्पुटः समाप्तः

शुभं भूयात्

---

[१] 'ति ब्राह्मण' ख. ग. घ. ङ. पाठः.

---

* page 44. Vol. I.